अथ

नवम स्कंधः

(9.)

Shreemad Bhagvatam

Navam Skandhah

श्रीगणेशायनमः ॥ गुणाश्रयंगुणातीतावाक्षैवरूपवतैकरूपनिधिं तमहंशरणंयामिपरमानंदमाधवं १ त्रिसु
गुणाष्टभिरध्यायैर्वैवस्वतसुतान्वयः नवमेक्रम्यसत्कीर्त्तिप्रसंगायवितन्य २ एवमुक्तोष्टमस्कंधेस

राजोवाच ॥ मन्वंतराणिसर्वाणित्वयोक्तानिश्रुतानिमे वीर्याण्यनंतवीर्यस्यहरेस्तत्रकृता
निच १ योसौसत्यव्रतोनामराजर्षिर्द्रविडेश्वरः ज्ञानंयोतीतकल्पांतेलेभेपुरुषसेवया
सवैविवस्वतःपुत्रोमनुरासीदितिश्रुतं त्वत्तस्तस्यसुताःप्रोक्ताइक्ष्वाकुप्रमुखान्नृपाः तेषांवंशंपृ
थग्ब्रह्मन्वंश्यानुचरितानिच कीर्त्तयस्वमहाभागनित्यंशुश्रूषतांहिनः २ येभूतायेभवि
ष्याश्चभवंत्यद्यतनाश्चये तेषांनःपुण्यकीर्त्तीनांसर्वेषांवदविक्रमान् ३ ॥ सूतउवाच ॥ एवं
परीक्षिताराज्ञासदसिब्रह्मवादिनां पृष्टःप्रोवाचभगवान्शुकःपरमधर्मवित् ४

मेस्सात्वशोधकः कर्त्तपालकत्कादिमन्वादीनांनिरूपणैः ३ सद्धर्मेप्युद्धसत्वानामंतरंगेशसत्कथा स
र्येसोमान्वयाख्यानैरधुनासंगउच्यते ४ १

सूर्य्यपुत्रस्यसुद्युम्नस्यस्त्रीत्वेसति बुधात्पुरूरवःप्रभृतिसोमवंशसंचारंवक्तुंसप्रस्तावमिलोपाख्यानमाह अ
प्रजस्यमनोः पूर्वमित्यादिनायावदध्यायसमाप्तिः पूर्वमिक्ष्वाकुप्रभृतीनामुत्पत्तेःप्राक् १० दुहित्रर्थेम
मकन्यायथाभवेत्तथायजेतिहोतारंसम्यगयाचत पयएवव्रतमाहारोनियतोयस्याः ११ अध्वर्युणा

अप्रजस्यमनोःपूर्वंवसिष्ठोभगवान्किल मित्रावरुणयोरिष्टिंप्रजार्थमकरोद्विभुः १०
तत्रश्रद्धामनोःपत्नीहोतारंसमयाचत दुहित्रर्थमुपागम्यप्रणिपत्यपयोव्रता ११ प्रेषितोऽ
ध्वर्युणाहोताध्यायंस्तत्सुसमाहितः गृहीतेहविषिव्यचरद्वषट्कारंगृणन्द्विजः १२ होतुस्त
द्व्यभिचारेणकन्येलानामसाभवत् तांविलोक्यमनुःप्राहनातिहृष्टमनागुरुम् १३ भग
वन्किमिदंजातंकर्मवोब्रह्मवादिनां विपर्य्ययमहोकष्टंमैवंस्याद्ब्रह्मविक्रिया १४ ॥

होतर्यजेतिप्रेषितोहोतातेनगृहीतेहविषिसतितत् तयाप्रार्थितंध्यायन्व्यचरत् पाठांत
रेतदध्यापयत् वाचावषट्कारंगृणन् वौषडित्युच्चारयन् १२ १३ ब्रह्मविक्रियामंत्रान्यथात्वं १४

त्रयोदशभिरध्यायैःसूर्यवंशोनुवर्ण्यते। एकादशभिरध्यायैःसोमवंशस्ततःपरैः तत्रतुप्रथमेध्यायेवै
वस्वतसुतान्वये। सोमवंशप्रवेशोक्तयेसुद्युम्नःस्त्रीत्वमुच्यते उक्तानुवादपूर्वकंवैवस्वतमनोर्वंशंपृच्छति॥

श्रीशुकउवाच श्रूयतांमानवोवंशःप्राचुर्येणपरंतप नशक्यतेविस्तरतोवक्तुंवर्षशतैरपि
५ परावरेषांभूतानामात्मायःपुरुषःपरः सएवासीदिदंविश्वंकल्पांतेऽन्यन्नकिंचन ६ तस्यना
भेःसमभवत्पद्मकोशोहिरण्मयः तस्मिन्जज्ञेमहाराजस्वयंभूश्चतुराननः ७ मरीचिर्मन
सस्तस्यजज्ञेतस्यापिकश्यपः दाक्षायण्यांततोऽदित्यांविवस्वानभवत्सुतः ८ ततोमनुःश्राद्ध
देवःसंज्ञायामासभारत श्रद्धायांजनयामासदशपुत्रान्सआत्मवान् इक्ष्वाकुनृगशर्यातिदिष्ट
धृष्टकरूषकान् नरिष्यंतंपृषध्रंचनभगंचकविंविभुः ९

मन्वंतराणीतिपंचभिः ५ श्रवुक्तंवंशवक्तुंपूर्वोक्तमेवतावद्वंशप्रवर्तकंश्रीनारायणमारभ्यानुस्मारयति
परावरेषामितिपंचभिः ६ ७ ८ नाभागंचेतिपाठेनभगएवनाभागः ९ ·एमरामएमरामएम

षि१

विगतं तिमिरं माभासः प्रकाशश्चान्यस्य यास्तु तथाभूता दीशः कुर्वंतः २५ २६ प्रसंगं रत्यभिनिवेशं स्त्रीप्रसंगकलुषितमनसः संनस्त

श्रीशुक उवाच ॥ एकदा गिरिशं द्रष्टुमृषयस्तत्र सुव्रताः दिशो वितिमिराभासाः कुर्वंतः समुपागमन् २५
तान्विलोक्यांबिका देवी विवस्त्रा व्रीडिता भृशं भर्तुरंकात्समुत्थाय नीवीमाश्वथ पर्यधात् २६ ऋषयोपि
तयोर्वीक्ष्य प्रसंगं रममाणयोः निवृत्ताः प्रययुस्तस्मान्नरनारायणाश्रमं २७ तदिदं भगवानाह प्रियायाः
प्रियकाम्यया स्थानं यः प्रविशेदेतत्स वै योषिद्भविष्यति २८ तत ऊर्ध्वं वनं तद्धि पुरुषा वर्जयंति हि २९ सा चा
नुचरसंयुक्ता विचचार वनाद्वनं ३० अथ तामाश्रमाभ्याशे चरंतीं प्रमदोत्तमां स्त्रीभिः परिवृतां वीक्ष्य चकमे
भगवान्बुधः ३१ सापि तं चकमे सुभ्रूः सोमराजसुतं पतिं स तस्यां जनयामास पुरूरवसमात्मजं ३२
एवं स्त्रीत्वमनुप्राप्तः सुद्युम्नो मानवो नृप सस्मार स कुलाचार्यं वसिष्ठमिति शुश्रुम ३३ स त
स्य तां दशां दृष्ट्वा कृपया भृशपीडितः सुद्युम्नस्याशयन्पुंस्त्वमुपाधावत शंकरं ३४ तुष्टस्तस्मै स भगवानृ
षये प्रियमाहरन् स्वां च वाचमृतां कुर्वन्निदमाह विशांपते ३५ त्प्रसंगाच्छून्यं नरनारायणाश्रमं ययुः २७
२८ २९ प्रासंगिकमुक्त्वा प्रस्तुतमनुवर्णयति साचेति अनुचरीसंयुक्तेति च वक्तव्ये भूतपूर्वगत्या पुंस्त्वनिर्देशः ३०

श्री श्री श्रीकृष्णाय नमः श्री श्री श्री

१५ प्रपितामहो वसिष्ठः १६ १७ १८ १९ २० २१ २२ २३ २४ रामरामसरामरामराम २४

स्वयं मंत्रविदो युक्तास्तपसा दग्धकिल्विषाः कुतः संकल्पवैषम्यमनृतं विबुधेष्विव १५
तन्निशम्य वचस्तस्य भगवान्प्रपितामहः होतुर्व्यतिक्रमं ज्ञात्वा बभाषे रविनंदनं १६ एत
त्संकल्पवैषम्यं होतुस्ते व्यभिचारतः तथापि साधयिष्ये ते सुप्रजत्वं स्वतेजसा १७ एवं व्यव
सितो राजन्भगवान्स महायशाः अस्तौषीदादिपुरुषमिलायाः पुंस्त्वकाम्यया १८ तस्मै का
मवरं तुष्टो भगवान्हरिरीश्वरः ददाविलाभवत्तेन सुद्युम्नः पुरुषर्षभः १९ स एकदा महारा
ज विचरन्मृगयां वने वृतः कतिपयामात्यैरश्वमारुह्य सैंधवं प्रगृह्य रुचिरं चापं शरांश्च परमा
द्भुतान् दंशितोनुमृगं वीरो जगाम दिशमुत्तरां २० स कुमारो वनं मेरोरधस्तात्प्रविवेश ह यत्रा
स्ते भगवान्शर्वो रममाणः सहोमया २१ तस्मिन्प्रविष्ट एवासौ सुद्युम्नः परवीरहा अपश्यत्स्त्रिय
मात्मानमश्वं च वडवां नृप २२ तथा तदनुगाः सर्वे आत्मलिंगविपर्ययं दृष्ट्वा विमनसोभूवन्वीक्षमाणाः सु ४
परस्परं २३ राजोवाच कथमेवं गुणो देशः केन वा भगवन्कृतः प्रश्नमेनं समाचक्ष्व परं कौतूहलं हि वि २
नः २४

गोविंद गोपाल हरे २४ दामोदर माधव गोवर्द्धनधारिन् २४ ॥ ऽऽ ॥ राम ॥ ऽऽ ॥

भा० स्क० ९ शार्दूलोव्याघ्रः ४ ५ प्रलीनाद्दुर्गणाययस्मिन्समये बभ्रोःकपिलायागोः ६ गांकामन्तोनजघानेतिप्रख्या

एकदाप्राविशद्गोष्ठंशार्दूलोनिशिवर्षति शयानागावउत्थायभीतास्ताबभ्रमुर्व्रजे ४ एकांजग्रा
हबलवान्साचुक्रोशभयातुरा तस्यास्तुक्रंदितंश्रुत्वापृषध्रोभिससारह ५ खड्गमादायतरसाप्र
लीनोडुगणेनिशि अजानन्नच्छिनद्बभ्रोःशिरःशार्दूलशंकया ६ व्याघ्रोपिवृक्णश्रवणोनि
स्त्रिंशाग्राहतस्ततः निश्चक्रामभृशंभीतोरक्तंपथिसमुत्सृजन् ७ तंशशापकुलाचार्यःकृताग
समकामतः नक्षत्रबंधुःशूद्रस्त्वंकर्मणाभवितामुना ९ एवंशप्तस्तुगुरुणाप्रत्यगृह्णात्कृतां
जलिः अधारयद्व्रतंवीरऊर्ध्वरेतामुनिप्रियं १० वासुदेवेभगवतिसर्वात्मनिपरेमले एकां
तित्वंगतोभक्त्यासर्वभूतसुहृत्समः विमुक्तसंगःशांतात्मासंयताक्षोपरिग्रहः यदृच्छयोपप
न्नेनकल्पयन्वृत्तिमात्मनः आत्मन्यात्मानमाधायज्ञानतृप्तःसमाहितः विचचारमही
मेतांजडांधबधिराकृतिः ११

पथितुरक्तंश्रवणइत्याद्युक्तं ७ व्युष्टायांप्रभातायां ८ क्षत्रबंधुरपित्वंनभविताअपितुशूद्रोभवि

म.६ मन्यमानोहतंव्याघ्रंपृषध्रःपरवीरहा अद्राक्षीत्स्वहतांबभ्रुंव्युष्टायांनिशिदुःखितः ८ ६

५

३६ नाभ्यनंदन् स्त्रीत्वेलज्जयामासंमासंनिलीयावस्थानात् ३७ ३८ ॥३९॥ इति नवमे प्रथमः॥१॥ द्वितीये मनुपुत्राणांद्व
वपुत्रोविशगतः करूषकादिपंचानांवंशानाहत्लघुक्रमात् १ इक्ष्वाकुः पूर्वजोयेषां तान् २ तत्र पृषध्रस्य वंशोना

मासंपुमान्स भविता मासंस्त्रीतवगोत्रजः इत्थंव्यवस्थयाकामंसुद्युम्नोऽवतुमेदिनीं ३६ आचा
र्यानुग्रहात्कामंलब्ध्वापुंस्त्वंव्यवस्थया पालयामासजगतीं नाभ्यनंदन्स्मतंप्रजाः॥३७॥ तस्योत्क
लोगयोराजन्विमलश्चसुतास्त्रयः दक्षिणापथराजानोबभूवुर्धर्मवत्सलाः॥३७॥ ततःपरि
णतेकालेप्रतिष्ठानपतिःप्रभुः पुरूरवसउत्सृज्यगांपुत्रायगतोवनं॥३९॥ इतिश्रीमद्भागवतेमहा
पुराणेनवमस्कंधेसोपाख्यानेप्रथमोध्यायः॥ श्रीशुकउवाच॥ एवंगतेऽथसुद्युम्नेमनुर्वैवस्वतः
सुते पुत्रकामस्तपस्तेपेयमुनायांशतंसमाः १ ततोयजन्मनुर्देवमपत्यार्थंहरिंप्रभुं इक्ष्वाकुपू
र्वजान्पुत्रांल्लेभेस्वसदृशान्दश २ पृषध्रस्तुमनोःपुत्रोगोपालोगुरुणाकृतः पालयामासगायत्ता
रात्र्यांवीरासनव्रतः ३

भवस्थितिसहेतुकमाह पृषध्र इत्यादिना कविःकनीयानित्यंतःप्राक्तनेनग्रंथेन स्वरूपाणस्ततस्त्विष्टतोजागरणंवी

रासनंतदेवव्रतंयस्य यत्नः अवहितःसन् गाःपालयामास ३

१८ अग्निवेश्य एव कानीन इति जातुकर्ण्य इति च विख्यातः १९ २० दिष्टस्य पुत्रो नाभागो वक्ष्यमाणान्ना
भागादन्य इति भ्रान्तिव्युदासार्थमनुवादमात्रं २१ २२ २३ अंगिरसोपुत्रो महायोगी संवर्त्तो यं अयाज

वीतिहोत्रस्त्विंद्रसेनात्तस्य सत्यश्रवा अभूत् उरुश्रवाः सुतस्तस्य देवदत्तस्ततोऽभवत् १८ ततोऽ
ग्निवेश्यो भगवानग्निः स्वयमभूत्सुतः कानीन इति विख्यातो जातुकर्णो महानृषिः १९ त
तो ब्रह्मकुलं जातमग्निवेश्यायनं नृप नरिष्यंतान्वयः प्रोक्तो दिष्टवंशमतः शृणु २० नाभा
गो दिष्टपुत्रोऽन्यः कर्म्मणा वैश्यतां गतः भलंदनः सुतस्तस्य वत्सप्रीतिर्भलंदनात् २१ वत्स
प्रीतेः सुतः प्रांशुस्तत्सुतं प्रमितिं विदुः खनित्रः प्रमितेस्तस्माच्चाक्षुषोऽथ विविंशतिः २२ वि
विंशतिसुतो रंभः खनिनेत्रोऽस्य धार्मिकः करंधमो महाराज तस्यासीदात्मजो नृप २३ तस्यावी
क्षित्सुतो यस्य मरुत्तश्चक्रवर्त्यभूत् संवर्त्तोयाजयद्यं वै महायोग्यंगिरःसुतः २४ मरुत्तस्य य
था यज्ञो न तथान्योऽस्ति कश्चन सर्वं हिरण्मयं त्वासीद्यत्किंचास्य च शोभनं २५ अमाद्यदिं
द्रः सोमेन दक्षिणाभिर्द्विजातयः मरुतः परिवेष्टारो विश्वेदेवाः सभासदः २६

यत् स मरुत्तः २४ अस्य यत्किंचित्पात्रादिकमस्ति तत्तु सर्वं हिरण्मयं शोभनमासीत् २५ अमाद्यत् अ

युपयुक्तकरणः दग्धदेहः १२ कवेरपि वशो ना भवेदित्याह कविरिति बंधुभिः सह राज्यं विसृज्य १३ १४ ब्र
ह्मभूयं ब्राह्मणत्वं नृगस्य वंशः पुत्रः सुमतिः ततोभूतज्योतिः ततो वसुः १५ ओघवतः पिता तत्पुत्रोप्योघवान्

एवं व्रतो वनं गत्वा दिष्ट्या दावाग्निसमुत्थितं तेनोपयुक्तकरणो ब्रह्मप्राप परं मुनिः १२ कविः क
नीयान्विषयेषु निःस्पृहो विसृज्य राज्यं सह बंधुभिर्वनं निवेश्य चित्ते पुरुषं स्वरोचिषं विवेश
कैशोरवयाः परं गतः १३ करूषान्मानवादासन्कारूषाः क्षत्रजातयः उत्तरापथगोप्तारो ब्रह्म
ण्या धर्मवत्सलाः १४ धृष्टाद्धार्ष्टमभूत्क्षत्रं ब्रह्मभूयं गतं क्षितौ नृगस्य वंशः सुमतिर्भूतज्यो
तिस्ततो वसुः १५ वसोः प्रतीकस्तत्पुत्र ओघवानोघवत्पिता कन्या चौघवती नाम सुदर्शन उवा
हतां १६ चित्रसेनो नरिष्यंतादृक्षस्तस्य सुतोऽभवत् तस्य मीढ्वांस्ततः कूर्च इंद्रसेनस्तु तत्सुतः १७

त्यर्थः १६ तदेवं त्रिभिः श्लोकैः करूषधृष्टनृगाणां वंशा उक्ताः नरिष्यंतवंशमाह चित्रसेन इति सार्द्धैस्त्रिभिः
ततः इत्यादेर्यत्राधिक्यं स्यात् तत्रानंतर्यं ततः इत्यादिपदं व्याख्येयं यत्रानन्यत्वं तत्र पूर्वस्य परस्यानुषंगादि

टीकानवम ४

भा० न० ६

इति नवमे द्वितीयः ॥ ॥ तृतीये मनुपुत्रस्य शर्य्यातेः कीर्त्यते ऽन्वयः ॥ तत्र सौकन्यमाख्यानं रैवतं च महाद्भुतं ॥ १ ॥ ब्र
ह्मिष्ठो वेदार्थतत्त्वज्ञः तदेवाह ॥ यो वा इति द्वितीयमहः ॥ द्वितीयेह्नि क्रियमाणं कर्म ऊचिवान् उवाच

इति श्रीमद्भागवते महापुराणे नवमस्कंधे तीयोध्यायः ॥ २ ॥ श्रीशुक उवाच ॥ सर्य्यातिर्मानवो
राजा ब्रह्मिष्ठः संबभूव ह यो वा अंगिरसां सत्रे द्वितीयमहरूचिवान् १ सुकन्या नाम तस्यासी
त्कन्या कमललोचना तया सार्द्धं वनगतो ह्यगमच्च्यावनाश्रमं २ सा सखीभिः परिवृता विचि
न्वत्यंघ्रिपान्वने वल्मीकरंध्रे ददृशे खद्योते इव ज्योतिषि ३ ते दैवचोदिता बाला ज्योति
षी कंटकेन वै अविध्यन्मुग्धभावेन सुस्रावासृक् ततो बहिः ४ सकृन्मूत्रनिरोधो ऽ
भूत्सैनिकानां च तत्क्षणात् राजर्षिस्तमुपालक्ष्य पुरुषान्विस्मितो ऽब्रवीत् ५ अ
प्यभद्रं न युष्माभिर्भार्गवस्य विचेष्टितं व्यक्तं केनापि नस्तस्य कृतमाश्रमदूषणं ६

१ तस्य वंशं उत्तानबर्हिरानर्त्त इत्यादिना वक्ष्यति आदौ तावत्कन्यावृत्तांतमाह सुकन्या नामेत्यादि

ति २ ३ ४ ५ भार्गवस्य च्यवनस्याभद्रमपराधं ६

२७ २८ यतः यस्यां तृणविंदोः पुत्रा अभवन् २९ ३० तानेवाह विशाल इति तस्य तृणविंदोः सुताः ३१ सहदेव

मरुत्तस्य दमः पुत्रस्तस्यासीद्राज्यवर्द्धनः सुधृतिस्तत्सुतो जज्ञे सौधृतेयो नरः सुतः २७ तत्सुतः
केवलस्तस्माद्बंधुमान्वेगवांस्ततः बुधस्तस्याभवद्यस्य तृणविंदुर्महीपतिः २८ तं भेजेलंबुषा
देवी भजनीयगुणालयं वराप्सरा यतः पुत्राः कन्या चेडविडाभवत् २९ यस्यामुत्पादयामास वि
श्रवा धनदं सुतं प्रादाय विद्यां परमामृषिर्योगेश्वरः पितुः ३० विशालः शून्यबंधुश्च धूम्रकेतु
श्च तत्सुताः विशालो वंशकृद्राजा वैशालीं निर्ममे पुरीं ३१ हेमचंद्रः सुतस्तस्य धूम्राक्षस्तस्य
चात्मजः तत्पुत्रात्संयमादासीत्कृशाश्वः सहदेवजः ३२ कृशाश्वात्सोमदत्तोऽभूद्योऽश्वमेधै
रिडस्पतिं इष्ट्वा पुरुषमापाग्र्यां गतिं योगेश्वराश्रितः ३३ सोमदत्तिस्तु सुमतिस्तत्सुतो ज
नमेजयः एते वैशालभूपालास्तृणविंदोर्यशोधराः ३४ ॥१

जः देवजेन सहितः पाठांतरे नाममात्रं अर्थस्तु स एव ३२ ३३ वैशालभूपालाः विशालस्यान्वयाज्जा

वाढमित्यभिनंद्यभवानस्मिन्निमज्जतामित्यूचतुः १३ ह्रदं प्रवेशितः तावपितमतिवृद्धं गृहीत्वा प्रवि

वाढमित्यूचतुर्विप्रमभिनंद्यभिषक्तमौ । निमज्जतां भवानस्मिन्ह्रदे सिद्धविनिर्मिते १३ इत्यु
क्तोजरयाग्रस्तदेहोधमनिसंततः ह्रदं प्रवेशितोऽश्विभ्यां वलीपलितविप्रियः १४ पुरुषा
स्त्रयउत्तस्थुरपीच्यावनिताप्रियाः पद्मस्रजः कुंडलिनस्तुल्यरूपाः सुवाससः १५ तान्निरीक्ष्य
वरारोहा सरूपान्सूर्यवर्चसः अजानंती पतिं साध्वी अश्विनौ शरणं ययौ १६ दर्शयित्वा पतिं
तस्यै पातिव्रत्येन तोषितौ ऋषिमामंत्र्य ययतुर्विमानेन त्रिविष्टपं १७ यक्ष्यमाणोथ शर्यातिः
श्च्यवनस्याश्रमं गतः ददर्श दुहितुः पार्श्वे पुरुषं सूर्यवर्चसं १८ राजा दुहितरं प्राह कृतपा
दाभिवंदनां आशिषश्चाप्रयुंजानो नातिप्रीतमना इव १९ चिकीर्षितं ते किमिदं पतिस्त्व
याप्रलंभितो लोकनमस्कृतो मुनिः यत्त्वं जराग्रस्तमसत्यसंमतं विहाय जारं भजसेऽमुमध्वगं २०

ष्टावित्यर्थः १४ १५ अश्विनौ शरणं ययौ युवां पृथक्कुस्थितामत्पतिं दर्शयतमिति प्रार्थयामासेत्यर्थः १६ १७ १८ १९ प्रलंभितो वंचितः हे असति असंभ्रमनभीष्टं २०

(७)च मुष्येयं मम कन्या ख्यातवं त्वये त्युच्यमाने कतिवर्षोरण्यस्याः विवाहः कृतो नवेत्यादिवाक्यैस्तदभिप्रायं ज्ञा
त्वा तस्मै तां दुहितरं प्रादात् ९ १० हे ईश्वरौ सद्वैद्यौ युवां मह्यं वयस्तारुण्यं दत्तं संपादयतं ११ असोम

सुकन्या प्राह पितरं भीता किंचित्कृतं मया हे ज्योतिषी अज्ञानं त्वा निर्भिन्ने कंटकेन वै ७ दुहि
तुस्तद्वचः श्रुत्वा शार्य्यातिर्जातसाध्वसः मुनिं प्रसादयामास वल्मीकांतर्हितं शनैः ८ तदभिप्रा
यमाज्ञाय प्रादाद्दुहितरं मुनेः कृच्छ्रान्मुक्तस्तमामंत्र्य पुरं प्रायात्समाहितः ९ सुकन्या च्यवनं
प्राप्य पतिं परमकोपनं प्रीणयामास चित्तज्ञा अप्रमत्तानुवृत्तिभिः १० कस्यचित्त्वथ कालस्य ना
सत्यावाश्रममागतौ तौ पूजयित्वा प्रोवाच वयो मे दत्तमीश्वरौ ११ ग्रहं ग्रहीष्ये सोमस्य यज्ञे वाम ग्र २
प्यसोमपयोः क्रियतां मे वयो रूपं प्रमदानां यदीप्सितम् १२

योः सोमपानरहितयोरपि वां युवयोः सोमस्य ग्रहं सोमपूर्णपात्रम् ग्रहीष्ये दास्यामीति युवां सोमे
नयस्य इत्यर्थः ऐन्द्रवायवं गृह्णातीत्यादिश्रुतद्रव्यदेवतासंबंधानुपपत्त्या गृह्णातेर्यागपर्य्यवसायित्वा

भा०न ककुद्मीज्येष्ठोयस्मिंस्तत् २९ विभुंब्रह्माणं ३० तल्लब्धःक्षणोऽवसरोयेन आद्यंब्रह्माणं ३१ ३२ तेत्व
८ याहृदयेकृताःसर्वेकालेननिरस्ताःसंहृताः ३३ त्रिनवसप्तविंशतिः चतुर्युगानितैर्विभक्तः ३४ योदेवदे

तस्यपुत्रशतंजज्ञेककुद्मिज्येष्ठमुत्तमं २९ ककुद्मीरेवतींकन्यांस्वामादायविभुंगतः पुत्र्या
वरंपरिप्रष्टुंब्रह्मलोकमपावृतं ३० आवर्त्तमानेगांधर्वेस्थितोलब्धक्षणःक्षणं तदंत
आद्यमानम्यस्वाभिप्रायंन्यवेदयत् ३१ तच्छ्रुत्वाभगवान्ब्रह्माप्रहस्यतमुवाचह ३२
अहोराजन्निरस्तास्तेकालेनहृदयेकृताः तत्पुत्रपौत्रनप्तृणांगोत्राणिचनशृण्महे ३३
देव५ कालोभियातस्त्रिनवचतुर्युगविकल्पितः ३४ तदृच्छदेवदेवांशोबलदेवोमहाबलः क
न्यारत्नमिदंराजन्नररत्नायदेहिभोः ३५ भुवोभारावतारायभगवान्भूतभावनः अ
वतीर्णोनिजांशेनपुण्यश्रवणकीर्त्तनः ३६ इत्यादिष्टोऽभिवंद्याजंनृपःस्वपुरमागतः त्य
क्तंपुण्यजनत्रासाद्भ्रातृभिर्दिक्ष्ववस्थितैः ३७

वस्यांशोऽस्तितस्मैनररत्नायदेहि ३५ तद्देवाहभुवइति ३६ पुण्यजनत्रासात् यक्षभयात्सर्वमे ८

हेसतांकुलस्रतेतेमतिरन्यथातद्विपर्य्ययेएकथमवगता अवसन्ना अध्यवसितेतिवा तदेवाह कुलदू

कथंमतिस्तेवगताऽन्यथासतांकुलप्रसूतेकुलदूषणंत्विदं विभर्षिजारंयदपत्रपाकुलंपितु
श्चभर्तुश्चनयस्यधस्तमः २१ एवंब्रुवाणंपितरंस्मयमानाशुचिस्मिता उवाचतातजामातात
वैवभृगुनंदनः २२ शशंसपित्रेतत्सर्वंवयोरूपाभिलंभनं विस्मितःपरमप्रीतस्तनयांपरिष
स्वजे २३ सोमेनयाजयन्वीरंग्रहंसोमस्यचाग्रहीत् असोमपोरप्यश्विनोश्च्यवनःस्वेनतेज
सा २४ हंतुंतमाददेवज्रंसद्योमन्युरमर्षितः सवज्रंस्तंभयामासभुजमिंद्रस्यभार्गवः २५
अन्वजानंस्ततःसर्वेग्रहंसोमस्यचाश्विनोः भिषजावितियत्पूर्वंसोमाहुत्यावहिःकृतौ २६
उत्तानवर्हिरानर्तोभूरिषेणइतित्रयः सर्य्यातेरभवन्पुत्राआनर्त्ताद्रेवतोभवत् २७ सोऽंतः
समुद्रेनगरींविनिर्मायकुशस्थलीं आस्थितोभुंक्तविषयानानर्त्तादीनरींदम २८ ॥

षणंत्विदमित्यादि २१ २२ २३ २४ सद्यस्तत्क्षणमेवमन्युर्यस्यसइंद्रः २५ २६ २७ विषयान्देशान्

भा० न०
९

हृदियोभागस्त्वमित्यर्थः पाठांतरे हेतातकिमिदंममाभांक्षुः भजाममपितरंतवेत्युक्तवंतः आर्य्योस्त्वाम
हंकिमर्थंददुरित्यर्थः पितांह हेपुत्रक तत तैरुक्तंमाश्राद्दृथाः प्रतारणमात्रंतैःकृतं तास्मन्ना
दरमाकार्षीः नह्यहंदायस्त्वभोगसाधनमित्यर्थः २ तथापितेभगवत्वेनदत्तोहंतवजीवनोपा
यमुपदेक्ष्यामीत्याह इमइतिसपादाभ्यां अभिप्लवःषडहोभवति पृष्ठ्यःषडहोभवतीति विहि

इमेअंगिरसःसत्रमासतेद्यस्तुमेधसः षष्ठंषष्ठमुपेत्याहःकवेमुह्यंतिकर्मणि ३ तांस्त्वं
शंसयस्वक्ते हैवैश्वदेवमहात्मनः तेस्वर्य्यंतोधनंसत्रेपरिशेषितमात्मनः दास्यंति
तेःघतानुगच्छतथासरूक्ततेवान्यथा तस्मैदत्वाययुस्वर्गंतेसत्रपरिशेषितं ४

तेषुषडहेषावत्येमानेषुषष्ठषष्ठमहःकर्म्मोपेत्यप्राप्यकर्म्मणि तदनुष्ठानेसुमेधसोपितेसूक्त
विशेषाज्ञानेनमुह्यंति कवेहेविद्वन् ३ तान्महात्मनोपि इदमित्याद्यौद्वेमितिद्वये यज्ञेनदक्षिणायेति
च त्वंवैश्वदेवेहस्तेसंशयपावय ततःकर्मणिसमाप्तेसति तेस्वर्य्यंत स्वर्गंगच्छंतः स्वसत्रेपरिशेषि
तमवशिष्टमात्मनोधनंतेतुभ्यंदास्यंति अथतस्मात्तानगच्छेति तथेत्यादिसूक्तवाक्यं यथावत्रकृतस

९ त्रपरिशेषितं तत्रावशिष्टंधनं ४

ऽपइति नवमे तृतीयः॥३॥ चतुर्थेमनुपुत्रस्यनभगस्यकथोच्यते तत्सूनोऽम्बरीषस्यकृत्याप्रतिहतायतः
नभगस्यवंशमाह नभगस्यापत्यंनाभागः नाभागादंबरीषोमहाभागवतोऽभूदितिवक्ष्यन् तद्धेतुत्वेनवं
शप्रवर्त्तकस्यनाभागस्यनिष्कपटंचरितंतेनश्रीरुद्रप्रसादमाह यंततमित्यादिना ब्रह्मचारिणं बटुकाले
गुरुकुलेवसंतंनैष्ठिकोऽसाविति मत्वा विभागसमये तस्मैभागमप्रकल्प्यैवभ्रातरःसर्वंदायंविभज्यगृही
तो१

सुतांदत्त्वानवद्यांगींबलायबलशालिने बदर्याख्यंययौराजातप्तुंनारायणाश्रमं॥३६॥इति
श्रीमद्भागवतेमहापुराणेनवमस्कंधेतृतीयोध्यायः॥३॥श्रीशुकउवाच॥नाभागोनभगाप
त्यंयंततंभ्रातरंकविं यविष्ठंव्यभजन्दायंब्रह्मचारिणमागतं १ भ्रातरोऽभांक्तकिंम
ह्यंभजामपितरंतव त्वांममार्यास्तताभांक्षुर्मापुत्रकतदादृथा २

त्वा पश्चाद्गुरुकुलादागतं यंभागार्थिनं कविंविद्वांसं यविष्ठंप्रतिलतं तातंपितरंदायंव्यभजन्नि
त्यर्थः १ एतदेवंप्रश्नोत्तराभ्यांचदर्शयति तत्रनाभागःपृच्छति हेभ्रातरःमह्यंकिमभोक्तव्यभजत
किंभागंमदर्थंयूयंप्रकल्पितवंतः भ्रातरःऊचुः तदाविस्मृतमस्माभिरिदानींतुतवपितरंभजाम
त्वंपितरंगृहाणेत्यर्थः सचपितरंगत्वाआह हेतात आर्याज्येष्ठाःममत्वांमभांक्षुः भागंचक्रुः म

अस्याख्यानस्य स्मरणेफलमाह यएतदिति आत्मनोगतिंच प्राप्नोतीतिशेषः ११ कचिदपिनप्रतिहतोब्रह्म
शापोपिब्राह्मणेन निर्मितः कृत्यानलोपियंनास्पृशत् यतोसौमहाभागवतः अतएवकृतीपुण्यवान्
१२ श्रोतुमिच्छामिचरितमितिशेषः ब्रह्मदंडः कृत्यानलः नप्राभवन्नसमर्थोविभवत् १३ श्रियंसंपदं वि

यएतत्संस्मरेत्प्रातःसायंचसुसमाहितः कविर्भवतिमंत्रज्ञोगतिंचैवतथात्मनः ११ ना
भागादंबरीसोऽभून्महाभागवतःकृती नास्पृशद्ब्रह्मशापोपियंनप्रतिहतःक्वचित् १२
रा वा भगवन्श्रोतुमिच्छामिराजर्षेस्तस्यधीमतः नप्राभवद्यत्रनिर्मुक्तोब्रह्मदंडोदुर
त्ययः १३ श्री क वा अंबरीषोमहाभागःसप्तद्वीपवतीमहीं अव्ययांचश्रियंलब्ध्वा
विभवंचातुलंभुवि मेनेतिदुर्लभंपुंसांसर्वंतत्स्वप्नसंस्तुतं विद्वान्विभवनिर्वाणंतमो
विशतियत्पुमान् १४
भवमैश्वर्य्यं अतुलंनिरुपमं पुंसामतिदुर्लभमपि तत्सर्वंस्वप्नसंस्तुतम् स्वप्नवन्निरूपितम्
चानुपादेयंमेने तत्रहेतुः विभवस्यनिर्वाणंनाशंविद्वान् यत्येनविभवेन तन्नाशेनवापुमांस्तमोविशति

पुरुषः श्रीरुद्रः दृश्यत इति दर्शनं शरीरं कृष्णं दर्शनं यस्य सः वास्तुकं यज्ञभूमिगतं वस्तु धनं ममेत्युवाच ५
तर्हि स्म तदेव ममेदमिति मानवो नाभाग उवाच पुनश्च रुद्र उवाच नौ आवयोरस्मिन्विवादे ते पितरि
प्रश्नः स्यादिति पृष्टवानिति शुकोक्तिः ६ पृष्टस्य तातस्य वाक्यं यज्ञवास्तुगतमिति उच्छिष्टमुर्वरितं क्व

तं कश्चित्स्वीकरिष्यन्तं पुरुषः कृष्णदर्शनः उवाचोत्तरतोभ्येत्य ममेदं वास्तुकं वसु ५ ममेद
मृषिभिर्दत्तमिति तर्हि स्म मानवः स्यान्नौ ते पितरि प्रश्नः पृष्टवान्पितरं तथा ६ यज्ञवास्तु
गतं सर्वमुच्छिष्टमृषयः क्वचित् चक्रुर्हि भागं रुद्राय स देवः सर्वमर्हति ७ नाभागस्तं प्रणम्या
ह तवेश किल वास्तुकं इत्याह मे पिता ब्रह्मन् शिरसा त्वां प्रसादये ८ यत्ते पितावदद्धर्मं त्वं
च सत्यं प्रभाषसे ददामि ते मन्त्रदृशो ज्ञानं ब्रह्म सनातनं ९ गृहाण द्रविणं दत्तं मत्सत्रपरिशेषि
तं इत्युक्त्वान्तर्हितो रुद्रो भगवान्सत्यवत्सलः १०

विदितिदक्षाध्वरे उच्छेषणं भागो वै रुद्र इति श्रुतेश्च किंच स देव ईश्वरः सर्वमप्यर्हति किंतु नयज्ञावशि
ष्टमित्यर्थः ७ ८ श्रीरुद्र उवाच यत्त इति इदं चाख्यानं श्रुतिप्रसिद्धं तथा च बह्वृचब्राह्मणं नाभाने
दिष्टं शंसति नाभानेदिष्टं वै मानवं ब्रह्मचर्यं वसन्तं भ्रातरो निरभजन् सोब्रवीदित्यादि ९ १० ॥

सर्वात्मेति भावो भावनायस्मात् तमात्मनः स्वस्य कर्मणां कलापं समूहं भगवति विदधत् समर्पयन् तन्निष्ठैः भागवतै
र्विप्रैरभिहितः शिक्षितः सन् महीं शशास पालयामास अनादिकृतधर्मापि यथावद्दर्शितः १७ किंच यज्ञाधिष्ठा
तारमीश्वरमश्वमेधैरीजे आराधयामास महाविभूत्या उपचितान्यंगानि दक्षिणाश्च येषु तैः वसिष्ठादिभिः
हेतुभूतैः ततैर्विस्तृतैः धन्वनि धन्वदेशे निरुदके सरस्वतीमभिस्रोतं तस्याः प्रतिलोममित्यर्थः १८ किंच यस्य

एवं सदा कर्मकलापमात्मनः परेऽधियज्ञे भगवत्यधोक्षजे सर्वात्मभावं विदधन्महीमिमां तन्नि
ष्ठविप्राभिहितः शशास ह १७ ईजेऽश्वमेधैरधियज्ञमीश्वरं महाविभूत्योपचितांगदक्षिणैः त
तैर्वसिष्ठासितगौतमादिभिर्धन्वन्यभिस्रोतमसौ सरस्वतीं १८ यस्य क्रतुषु गीर्वाणैः सदस्या ऋत्वि
जो जनाः । तुल्यरूपाश्चानिमिषा व्यदृश्यन्त सुवाससः १९ स्वर्गो न प्रार्थितो यस्य मनुजै
रमरप्रियः शृण्वद्भिरुपगायद्भिरुत्तमश्लोकचेष्टितम् २० ॥

क्रतुषु सदस्यादयो गीर्वाणैः सह भूषणादिभिस्तुल्यरूपा व्यदृश्यन्त सहत्वमिति चतुर्थेनान्वयः
न च देवानां निमिषाभावाद्वैलक्षण्यं यतः अनिमिषाश्च व्यदृश्यन्त न निमिषन्तीति तथा आश्चर्यदर्शनौ
त्सुक्येन तेषां निमिषोपरमादिति भावः १९ यस्य यदीयैर्मनुजैरपि स्वर्गो न प्रार्थितः तस्य तु का वार्त्ता २०

नन्वेवं जानतोपि विभवैषिणो दृश्यंते तत्राह वासुदेव इति भावं भक्तिं प्राप्तः येन भावेन इदं विश्वं लोष्टवद्दृष्टं
तुच्छं स्मृतं १५ भक्तिमेव सर्वेंद्रियाणां भगवत्परत्वकथनेन प्रपंचयति स वा इति त्रिभिः श्रुतिं श्रोत्रं अच्यु
तस्य सत्कथानामुदये श्रवणे चकार इत्यस्य सर्वत्रान्वयः मुकुंदस्य लिंगानामालयानि स्थानानि तेषां

वासुदेवे भगवति तद्भक्तेषु च साधुषु प्राप्तो भावं परं विश्वं येनेदं लोष्टवत्स्मृतं १५ स वै मनः कृ
ष्णपदारविंदयोर्वचांसि वैकुंठगुणानुवर्णने करौ हरेर्मंदिरमार्जनादिषु श्रुतिं चकाराच्यु
तसत्कथोदये मुकुंदलिंगालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेंऽगसंगमं घ्राणं च तत्पाद
सरोजसौरभे श्रीमत्तुलस्या रसनां तदर्पिते पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशप
दाभिवंदने कामं च दास्ये न तु कामकाम्यया यथोत्तमश्लोकजनाश्रया रतिः १६

दर्शने दृशौ नेत्रे श्रीमत्यास्तुलस्यास्तत्पादसरोजेन यत्सौरभं तस्मिन् तदर्पिते तस्मिन्निवेदितान्ने दैका
ंगसंगं कुचंदनादिसेवां दास्ये निमित्ते तत्प्रसादस्वीकाराय न तु कामे काम्यया विषयेच्छया कथं च का
रउत्तमश्लोकजनाश्रया रतिर्यथा भवेत् तथान्येनैव तद्भक्तेषु च परं भावं प्राप्त इत्येतत्स्फुटीकृत भा ९ ४

भा० न० अर्च्चयत् अडागमाभाव आर्षः २६ ब्राह्मणांश्च पूजयामास सिद्धार्थान् आप्तकामान् एवज्ञानपेक्षानपि २७
१२ रूप्याङ्घ्रीणां रूप्यखुराणां पयःशीलादिगुणसंपदो यासां तासां न्यर्बुदानि षट् षष्टिकोटीः २८ तर्हि तदैव दुर्वा

व्रतान्ते कार्त्तिके मासि त्रिरात्रं समुपोषितः स्नातः कदाचित्कालिंद्यां हरिं मधुवनेऽर्च्चयत् २६
महाभिषेकविधिना सर्वोपस्करसंपदा अभिषिच्याम्बराकल्पैर्गंधमाल्यार्हणादिभिः तद्ग
तांतरभावेन पूजयामास केशवं ब्राह्मणांश्च महाभागान्सिद्धार्थानपि भक्तितः २७ गवां रु
क्मविषाणीनां रूप्याङ्घ्रीणां सुवाससां पयःशीलवयोरूपवत्सोपकरसंपदां प्राहिणोत्साधुविप्रेभ्यो वि ४
गृहेषु न्यर्बुदानि षट् भोजयित्वा द्विजानग्रे स्वाद्वन्नं गुणवत्तमं २८ लब्धकामैरनुज्ञातः पारणा
योपचक्रमे तस्य तर्ह्यतिथिः साक्षाद्दुर्वासा भगवानभूत् २९ तमानर्चातिथिं भूपः प्रत्युत्थाना
सनार्हणैः ययाचेऽभ्यवहाराय पादमूलमुपागतः ३० प्रतिनंद्य स तद्याच्ञां कर्त्तुमावश्यकं ग
म० तः निमंज्ज बृहद्ध्यायन्कालिंदीसलिले शुभे ३१
साऽतिथिः साक्षात्प्रत्यक्षोऽभूत् २९ आनर्च अ
र्चितवान् अभ्यवहाराय भोजनाय ३० आवश्यकं नैयमिकं माध्याह्निकं कर्त्तुं गतः बृहद्ब्रह्म गायत्रीम्
३१ १२

आस्तांस्वर्गप्रार्थनाशंकापि यद्यतः मुकुंदंहृदिपश्यतस्तान्कामाविषयानसमर्द्धयंति कथंभूताः स्वाराज्येनस्व
पसुखेनपरिभाविताः अतिशयिताः अतएवसिद्धानामपिदुर्लभाः यानितिपाठे यान्मनुजान् स्वाराज्येत्य
त्रापिद्वितीयांतपाठे मनुजानांविशेषणं यमितिपाठे यंचांबरीषं पश्यतामितिपाठेसिद्धानांविशेषणं २१ एवं

म१ सैर्द्धयंतियत्कामाःस्वाराज्यपरिभाविताः दुर्लभानापिसिद्धानांमुकुंदंहृदिपश्यतः २१ सइ
त्थंभक्तियोगेनतपोयुक्तेनपार्थिवः स्वधर्मेणहरिंप्रीणन्संगान्सर्वान्शनैर्जहौ २२ गृहेषु
दारेषुसुतेषुबंधुषुद्विपोत्तमस्यंदनवाजिवस्तुषु अक्षय्यरत्नाभरणायुधादिष्वनंतकोशे
त्य५ ष्वकरोदसन्मतिं २३ तस्माअदाद्धरिश्चक्रंप्रत्यनीकभयापहं एकांतभक्तिभावेनप्रीतोभृत्या
भिरक्षणं २४ आरिराधयिषुःकृष्णंमहिष्यातुल्यशीलया युक्तःसंवत्सरंवीरोदधारद्वादशीव्र
तम् २५

भगवदाराधनपरस्यतस्यकामाद्युपेक्षानैवचित्रमित्युपसंहरति सइत्थमितिद्वाभ्यां २२ २३ नन्वेवंभ
तोऽसौकथंप्रतिपक्षानजयत् तत्राह तस्माइति २४ तदेवतस्यवैराग्यादिकंहरिभक्तिंचोक्त्वाब्रह्म
दंडोयत्रनप्राभवदितियदुक्तं तदेवद्वादशीव्रतनिष्ठांकथयन्नाह आरिराधयिषुरित्यादियावदध्यायस
माप्तिः २५

 ३९ ४० ४१ क्रुद्धमहिं पावकोदावाग्निरिव ४२ निष्फलं तमुद्वीक्ष्य ४३ अनुषक्तं पृष्ठतः संसक्तं
 योमामतिथिमायातमातिथ्येन निमंत्र्यच अदत्वाभुक्तवांस्तस्यसद्यस्तेदर्शयेफलं ३९
एवंब्रुवाणउत्कृत्यजटांरोषविदीपितः तयासनिर्ममेतस्मैकृत्यांकालानलोपमां ४० ता
मापतंतींज्वलतिमसिहस्तांपदाभुवम् वेपयंतींसमुद्वीक्ष्यनचचालपदान्नृप ४१ प्राग्दि
ष्टंभृत्यरक्षायांपुरुषेणमहात्मना ददाहकृत्यांतांचक्रंक्रुद्धाहिमिवपावकः ४२ तदभिद्र
वदुद्वीक्ष्यस्वप्रयासंचनिष्फलं दुर्वासादुद्रुवेभीतोदिक्षुप्राणपरीप्सया ४३ तमन्वधावद्भ
गवद्रथांगंदावाग्निरुद्धूतशिखोयथाहिम् तथानुषक्तंमुनिरीक्षमाणोगुहांविविक्षुःप्र
ससारमेरोः ४४ दिशोनभःक्ष्मांविवरान्समुद्रांल्लोकान्सपालांस्त्रिदिवंगतःसः यतो
यतोधावतितत्रतत्रसुदर्शनंदुष्प्रसहंददर्श ४५ अलब्धनाथःसयदाकुतश्चित्संत्रस्त
चित्तोऽरणमेषमाणः देवंविरिंचंसमगाद्विधातस्त्राह्यात्मयोनेऽजिततेजसोमां ४६
मेरोर्गुहांविविक्षुरधावत् ४४ ४५ अरणमेषमाणः शरणमिच्छन् अजिततेजसः हरेश्चक्रात् ४६

धर्मसंकरमेवाह यद्यतः ब्राह्मणातिक्रमे दोषः अधर्मः द्वादश्याम पारणेऽपि दोषः ३२ व्रतवैगुण्यं यत्कृ
त्वा अस्मिन्कृते ३३ एवं द्विजैः सह विचार्य निश्चिनोति अंभसेति व्रतस्य पारणे समाप्तिं तत्र अशितमाकुः

मुहूर्तार्द्धावशिष्टायां द्वादश्यां पारणं प्रति चिंतयामास धर्मज्ञो द्विजैस्तद्धर्मसंकटे ३२ ब्राह्मणा
तिक्रमे दोषो द्वादश्यां यदपारणे यत्कृत्वा साधु मे भूयादधर्मो वा न मां स्पृशेत् ३३ अंभसा केवलेना
थ करिष्ये व्रतपारणं प्राहुरब्भक्षणं विप्रा ह्यशितं नाशितं च यत् ३४ इत्यपः प्राश्य राजर्षिश्चिंत
यन्मनसाच्युतं प्रत्याचष्ट कुरुश्रेष्ठ द्विजागमनमेव सः ३५ दुर्वासा यमुनाकूलात्कृत्वावश्यक
मागतः राज्ञाभिनंदितस्तस्य बुबुधे चेष्टितं धिया ३६ मन्युना प्रचलद्गात्रो भ्रुकुटीकुटिलान
नः बुभुक्षितश्च सुतरां कृतांजलिमभाषत ३७ अहो अस्य नृशंसस्य श्रियोन्मत्तस्य पश्यत
धर्मव्यतिक्रमं विष्णोरभक्तस्येशमानिनः ३८

अशितं नेति चाहुः श्रुतिश्च अपोऽश्नाति तन्नैवाशितमिति ३४ प्रत्याचष्ट प्रतीक्षितवान् ३५ ३६ प्रच
लत्कंपमानं गात्रं यस्य भ्रुकुटीभ्याम् कुटीलाभ्याम् कुटिलमाननं यस्य ३७ ३८ रामरामराम ॥

भा० न० ननुसर्वज्ञस्यतवभ्रमः कुतस्तत्राह अहमिति पारदर्शिनः सर्वज्ञा अपियस्यमायानविद्मः २ ५१ हेसत्तामी
२४ प्सितमामा अवहिपाहिपाहि ५२ अपराधंनिवेदयन्प्रार्थयते अजानतेति अघं दुःखं अपचिति
अहंसनत्कुमारश्चनारदोभगवानजः कपिलोपांतरतमोदेवलोधर्मआसुरिः मरीचि
प्रमुखाश्चान्येसिद्धेशाःपारदर्शिनः विदामनवयंसर्वेयन्मायांमाययावृताः २ तस्यविश्वे
श्वरस्येदंशस्त्रंदुर्विषहंहिनः तमेवशरणंयाहिहरिस्तेशंविधास्यति ५० ततोनिराशो
दुर्वासाःपदंभगवतोययौ वैकुंठाख्यंयदध्यास्तेश्रीनिवासःश्रियासह ५१ संदह्यमानोऽजि
तशस्त्रवह्निनातत्पादमूलेपतितःसवेपथुः आहाच्युतानंतसदीप्सितप्रभोकृता
गसंमाऽवहिविश्वभावन ५२ अजाननातेपरमानुभावंकृतंमयाघंभवतःप्रिया
णां विधेहितस्यापचितिंविधातर्मुच्येतयन्नाम्न्युदितेनारकोपि ५३ ॥ ऽऽ ॥

निष्कृतिं मद्भक्तद्रोहे निष्कृतिंनपश्यामीतिचेत्तत्राह यस्यतवनाम्निकीर्त्तितेनरकस्योपि
मुच्यते तस्यतवकिमशक्यमित्तिभावः ५३ ॥ ऽऽ ॥ रामराम ॥ ऽऽ ॥ रामराम ॥ ऽऽ

एतत्सर्वं यस्य भ्रूभंगमात्रेण तिरोभविष्यति कदा क्रीडायाश्चावसाने तदपि कदा द्विपरार्द्धसंज्ञके काले ६७ अतो
वयं सर्वे यस्य नियमं मामाज्ञां प्रपन्नाः प्राप्ताः संतो लोकहितं यथा भवत्येवं तं नियमं मूर्ध्नार्पितं वहामः अतस्त
इकृद्रोहिणं त्वां रक्षितुं न समर्थो हमिति शेषः यत्तदो नित्यसंबंधात् ६८ ६९ श्रीरुद्रोपि प्रत्याचष्टे वयमि

ब्रह्मोवाच ॥ स्थानं मदीयं सह विश्वमेतत् क्रीडावसाने द्विपरार्द्धसंज्ञे भ्रूभंगमात्रेण हि संदिध
क्षोः कालात्मनो यस्य तिरोभविष्यति ६७ अहं भवो दक्षभृगुप्रधानाः प्रजेशभूतेशसुरेशमु
ख्याः सर्वे वयं यन्नियमं प्रपन्ना मूर्ध्नार्पितं लोकहितं वहामः ६८ ॥ श्रीशुक उवाच ॥ प्रत्याख्या
तो विरिंचेन विष्णुचक्रोपतापितः दुर्वासाः शरणं यातः शर्वं कैलासवासिनं ६९ श्रीशंकर उ
वाच ॥ वयं न तात प्रभवाम भूम्नि यस्मिन्परेन्येप्यजजीवकोशाः भवंति काले न भवंति ही
दृशाः सहस्रशो यत्र वयं भ्रमामः १

ति चतुर्भिः भूम्नि महति महत्त्वमवाह यस्मिन्परे परमेश्व
रे अजा ब्रह्माणस्त एव जीवास्तेषां कोशा उपाधिभूताः ब्रह्मांडविग्रहाः ईदृशा दृश्यमाना ब्रह्मांड प्र
माणाः अन्येपि भवंति जायंते न श्यंति च यत्र येषु ब्रह्मांडेषु लोकेशाभिमानिनो वयं भ्रमामः १ ॥

भा० न०
१५

६ इति नवमे चतुर्थो ४ पंचमे विष्णुचक्रात्तु प्रसाद्य प्राणसंकटात् दुर्वासा रक्षितस्तेन यथा तद्वर्ण्यते १
सोद्यममिति छेदः सुलोपः पादपूरणार्थः २ ज्योतिषां नक्षत्रादीनां पतिः सोमस्त्वं मात्राणींद्रियाणि च त्व
त्कृतैवाग्न्यादयः स्वस्वकार्यं कुर्वंतीत्यर्थः ३ सहस्रमराः यस्य हे सहस्रार स्वस्तिशरणं भूयाः इड

ब्रह्मं तत्कृच्छ्रभंगं तेनाभागं तन्न यन्नपं त्वमापय महाभागं ततः शांतिर्भविष्यति ६ इति श्रीमद्भाग
वते महापुराणे नवमस्कंधे अंबरीषचरिते चतुर्थोऽध्यायः ॥ ४ ॥ श्रीशुक उवाच ॥ एवं भगवतादि
ष्टो दुर्वासाश्चक्रतापितः अंबरीषमुपावृत्य तत्पादौ दुःखितोऽग्रहीत् १ तस्य सोद्यममावीक्ष्य पाद
स्पर्शविलज्जितः अस्तावीत्तद्धरेरस्त्रं कृपया पीडितो भृशं ॥ २ ॥ अंबरीष उवाच ॥ त्वमग्निर्भगवान्सू
र्यस्त्वं सोमो ज्योतिषां पतिः त्वमापस्त्वं क्षितिर्व्योम वायुर्मात्रेंद्रियाणि च ॥ ३ ॥ सुदर्शन नमस्तु
भ्यं सहस्राराच्युतप्रिय सर्वास्त्रघातिन्विप्राय स्वस्ति भूया इडस्पते ४ त्वं धर्मस्त्वमृतं सत्यं त्वं य
ज्ञोऽखिलयज्ञभुक् त्वं लोकपालः सर्वात्मा त्वं तेजः पौरुषं परम् ५

स्पते पृथ्वीपते ४ ब्राह्मणरक्षणं तवयुक्तमेवेत्याह त्वं धर्म इति न च तवेयमतिस्तुतिरित्याह पौरुषं पुरुष
स्येश्वरस्य परं तेजः सामर्थ्यं स्वं अयं भावः सत्ये वृत्ते त्या दिश्रुति प्रसिद्धं भगवतः शोभनं दर्शनं तत एव च स

श्रीभागवतटीका ९ १५

५४ न आशासे न स्पृहयामि ५५ इमं च परं च लोकं हित्वा ५६ ५७ प्रतीतं प्राप्तमपि ५८ ५९ आ

श्रीभगवानुवाच ॥ अहं भक्तपराधीनो ह्यस्वतंत्र इव द्विजः साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रि
यः ५४ नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना श्रियं चात्यंतिकीं ब्रह्मन् येषां गतिरहं
परा ५५ ये दारागारपुत्राप्तान्प्राणान्वित्तमिमं परं हित्वा मां शरणं याताः कथं तांस्त्यक्तुमु
त्सहे ५६ मयि निर्बद्धहृदयाः साधवः समदर्शनाः वशी कुर्वंति मां भक्त्या सत्स्त्रियः सत्पतिं
यथा ५७ मत्सेवया प्रतीतं च सालोक्यादिचतुष्टयं नेछंति सेवया पूर्णाः कुतोऽन्यत्काल
विद्रुतं ५८ साधवो हृदयं मह्यं साधूनां हृदयं त्वहं मदन्यं ते न जानंति नाहं तेभ्यो मना
गपि ५९ उपायं कथयिष्यामि तव विप्र शृणुष्व तत् अयं ह्यात्माभिचारस्ते यतस्तं याहि
वै भवान् साधुषु प्रहितं तेजः प्रहर्तुः कुरुतेऽशिवं ६० तपो विद्या च विप्राणां निःश्रेयसकरे
उभे ते एव दुर्विनीतस्य कल्पेते कर्तुरन्यथा ६१

त्मनस्तवैवाभिचारो हिंसा यतोऽभूत् तमेव हि अशिवमनर्थं ६० ६१ रामरामरामरामराम

किंच त्वया भगवन्नियुक्तेन खलानामेव दंडः कार्य्यः साधवस्तु रक्षणीया अतो विप्ररक्षणेनास्माननुगृहाण
त्याह सत्वमिति हे जगत्त्राणस्य सर्वभूतस्त्वं खलानामेव प्रहरणार्थं निरूपितो नियुक्तः अतोऽस्मत्कुलस्य
सत्वं जगत्त्राणखलप्रहाणाय निरूपितः सर्वसहो गदाभृता विप्रस्य चास्मत्कुलदैवहेतवे विधेहि भ
द्रं तदनुग्रहो हि नः ९ यद्यस्ति दत्तमिष्टं वा स्वधर्मो वा स्वनुष्ठितः कुलं नो विप्रदैवं चेद्द्विजो भवतु
विज्वरः ११॥ श्रीशुक उवाच॥ इति संस्तुवतो राज्ञो विष्णुचक्रं सुदर्शनं अशाम्यत्सर्वतो विप्रं प्र
दहद्राजयाच्ञया १२ स मुक्तोऽस्त्राग्नितापेन दुर्वासाः स्वस्तिमांस्ततः प्रशशंस तमुर्वीशं
युंजानः परमाशिषः॥ श्री दुर्वासा उवाच॥ अहो अनंतदासानां महत्वं दृष्टमद्य मे कृताग
सोऽपि यद्राजन्मंगलानि समीहसे १४ दुष्करः को नु साधूनां दुस्त्यजो वा महात्मनाम्
यैः संगृहीतो भगवान्सात्वतामृषभो हरिः १५

दैवहेतवे भाग्यलाभाय विप्रस्य भद्रं विधेहि
तद्देव नोऽनुग्रहः ९ सर्वसुकृतार्पणेन विप्ररक्षां प्रार्थयते यद्यस्तीति द्वाभ्याम् विप्रो दैवं दे
वस्मिंस्तत् १० ११ राज्ञस्तस्यैव याच्ञया १२ १३ १४ १५ ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥ रामराम॥

हे सुनाभ अद्भुतकर्मणां त्वां कः स्तोतुं समर्थः अतस्तुभ्यं केवलं नमो गृणे इत्यन्वयः अद्भुतकर्मत्वमेवाह अखिला
नां कर्मणां सेतवे मर्य्यादारूपाय अत एवाधर्मशीलानामसुराणां धूमकेतवे दाहकाय त्रैलोक्यगोपायती
ति तथा विशुद्धं अत्युज्वलं वर्चस्तेजो यस्य तस्मै ६ तदेव प्रपंचयति त्वत्तेजसेति द्वाभ्यां सूर्य्यादीनां तद्‌दी

नमः सुनाभाऽखिलधर्म्मसेतवे ह्यधर्म्मशीलासुरधूमकेतवे त्रैलोक्यगोपाय विशुद्धवर्चसे
मनोजवायाद्भुतकर्मणे गृणे ६ त्वत्तेजसा धर्म्ममयेन संहृतं तमः प्रकाशश्च धृतो महात्मनां
दूरत्ययस्ते महिमा गिरां पते त्वद्रूपमेतत्सदसत्परात्परं ७ यदा विसृष्टस्त्वमनंजनेन वै वलं
प्रविष्टोऽजित दैत्यदानवम् वाहूदरोर्वंघ्रिशिरोधराणि वृश्चन्नजस्रं प्रधने विराजसे ८

प्रकाशश्च त्वय्येव रूप्यते प्रकाश्यते इति त्वद्रूपम् ७ हे अजित अनंजनेन श्रीहरिणा यदा विसृ
ष्टस्त्वं तदा दैत्यदानवानां वलं प्रविष्टः सन् तेषां वाह्वादीनि भिंदन् विराजसे पाठांतरे ऽजिता
दैत्यदानवा यस्मिंस्तद्वलम् पूर्वपदेन संधिरार्षः ८ ॥ ऽऽ ॥ राम राम राम राम राम ॥ ऽऽ

एवंविधा अनेके गुणा यस्य सः विरिंच्यपदसहितान् भोगान् निरयप्रायान् अपश्यदित्यर्थः ॥ २५ ॥ २६ ॥ २७ ॥ इति नवमे पंच
मः ॥ ५ ॥ षष्ठे ऽंबरीषस्य वंशमुक्त्वा ततः परं ॥ षष्ठाद्यैः षड्भिरध्यायैरिक्ष्वाकोर्वंश उच्यते ॥ तत्र षष्ठे शशादादि मांधात्र

एवंविधानेकगुणः स राजा परात्मनि ब्रह्मणि वासुदेवे क्रियाकलापैः समुवाह भक्तिं ययाविरिं
च्यान्निरयांश्चकार २५ अथांबरीषस्तनयेषु राज्यं समानशीलेषु विसृज्य धीरः वनं विवेशात्म
नि वासुदेवे मनो दधद्ध्वस्तगुणप्रवाहः २६ इत्येतत्पुण्यमाख्यानमंबरीषस्य भूपतेः संकीर्तयन्न
नुध्यायन्भक्तो भगवतो भवेत् ॥ २७ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे ऽंबरीषोपाख्याने पंचमो ऽध्या
यः ॥ ५ ॥ श्रीशुक उवाच ॥ विरूपः केतुमान् शंभुरंबरीषसुतास्त्रयः विरूपात्पृषदश्वोभूत्तत्पुत्रस्तु र
थीतरः १ रथीतरस्याप्रजस्य भार्यायां तंतवेर्थितः अंगिरा जनयामास ब्रह्मवर्चस्विनः सुता
न् २ एते क्षेत्रप्रसूता वै पुनस्त्वांगिरसाः स्मृताः रथीतराणां प्रवराः क्षेत्रोपेता द्विजातयः ३

तो निरूप्यते प्रसंगात्सौभरेश्चाख्या मांधातृतनयापतेः १ तंतवे संतानार्थं २ ये ऽंगिरसा जनिता एते
रथीतरस्य क्षेत्रे प्रसूतत्वेन रथीतरगोत्राः संतः आंगिरसो वीर्येण प्रसूतत्वादांगिरसाश्च पुनरपि र
थीतराणामन्येषां जातानां प्रवराः मुख्याः स्मृताः यतः क्षेत्रोपेताः ब्राह्मणा इत्यर्थः ३ ॥ ऽऽ।

री३

१६ १७ राजेत्यादिश्लोकद्वयं शुकोक्तिः १८ प्रीतोऽस्मीति श्लोकद्वयं पुनश्च विप्रोक्तिः आत्मनि मेधा येनातिथ्ये
न २० भूरियं तत्रस्थो जनः कीर्तयिष्यति २१ २२ तस्य धैर्यातिशयमाह गतो मुनिर्यावता नागतस्तावत्

यन्नामश्रुतिमात्रेण पुमान्भवति निर्मलः । तस्य तीर्थपदः किं वा दासानामवशिष्यते १६ राजन्न
नुगृहीतोऽहं त्वयातिकरुणात्मना । मदघं पृष्ठतः कृत्वा प्राणा यन्मेऽभिरक्षिताः १७ राजा तमकृता
हारः प्रत्यागमनकांक्षया । चरणावुपसंगृह्य प्रसाद्य समभोजयत् १८ सोऽशित्वादृतमानीतमा
तिथ्यं सार्वकामिकं । तृप्तात्मा नृपतिं प्राह भुज्यतामिति सादरं १९ प्रीतोऽस्म्यनुगृहीतोऽस्मि तव
भागवतस्य वै । दर्शनस्पर्शनालापैरातिथ्येनात्ममेधसा २० कर्मावदातमेतत्ते गायंति स्वःस्त्रि
यो मुहुः । कीर्तिं परमपुण्यां च कीर्तयिष्यति भूरियं ॥ २१ ॥ श्रीशुक उवाच ॥ एवं संकीर्त्य राजानं दु
र्वासाः परितोषितः । ययौ विहायसामंत्र्य ब्रह्मलोकमहैतुकं ॥ २२ ॥ संवत्सरोऽत्यगात्तावद्यावता नाग
तो गतः । मुनिस्तद्दर्शनाकांक्षो राजाब्भक्षो बभूव ह २३ गते च दुर्वाससि सोऽम्बरीषो द्विजोपयोगाति
पवित्रमाहरत् । ऋषेर्विमोक्षं व्यसनं च बुद्ध्वा मेने स्ववीर्यं च परानुभावम् २४

न्संवत्सरोऽतिक्रांत इति २३ द्विजस्योपयोगेन अतिपवित्रं आहरत् बुभुजे स्ववीर्यं च धैर्यादि लक्षणं परानु

भा०न० त्यक्तोविधिःसदाचारोयेनतं ९ सतुइक्ष्वाकुःज्ञापकेनवशिष्ठेनराज्यभोगेविरक्तोयोगीसन् तेनयोगेनकलेवरं
१८ त्यक्त्वासयत्परंतत्त्वंतदवाप १० शासनंपालयन्हरिमीजे ११ दैत्यपुरस्यजयात्पुरंजयः इंद्रोवाहोयस्ये
तिइंद्रवाहः ककुदिस्थितत्वात् ककुत्स्थः इतिचशशादस्यत्रीणिनामानि तत्तत्कर्मनिमित्तानि १२ तान्ये

ज्ञात्वापुत्रस्यतत्कर्मगुरुणाभिहितंनृपः देशान्निःसारयामाससुतंत्यक्तविधिंरुषा ९ सतु
विप्रेणसंवादज्ञापकेनसमाचरन् त्यक्त्वाकलेवरंयोगीसतेनोऽवापयत्परं १० पितर्युप
रतेभ्येत्यविकुक्षिःपृथिवीमिमां शासदीजेहरिंयज्ञैःशशादइतिविश्रुतः ११ पुरंजयस्त
सुतइंद्रवाहइतीरितः ककुत्स्थइतिचाप्युक्तःश्रृणुनामानिकर्मभिः १२ कृतांतआ
सीत्समरोदेवानांसहदानवैः पार्ष्णिग्राहोवृतोवीरोदेवैर्दैत्यपराजितैः १३ वचना
द्देवदेवस्यविष्णोर्विश्वात्मनःप्रभोः वाहनत्वेवृतस्तस्यबभूवेंद्रोमहावृषः १४

वव्याचक्षाणआह कृतांतइतिसप्तभिः कृतंविश्वमंतयतीतितथा पार्ष्णिग्राहःसहायः १३ इंद्रोयदि
ममवाहनंस्यात्तर्हिदैत्यान्हनिष्यामीतितेनवाहनत्वेनवृतःसन्इंद्रोलज्जयातदनंगीकुर्वन् वि

ष्णोर्वचनात्तस्यवाहनत्वायमहावृषोबभूवेत्यर्थः ॥ १४

१८

तत्रैवं मनोर्दशपुत्रेषु पृषध्रस्य कविश्च विरक्तत्वात् न वंशप्रवर्तकौ करूषादीनां च सप्तानां वंशास्तारतम्य
क्रमेणोक्ताः इदानीमतिविचित्रमिक्ष्वाकोर्वंशमाह क्षुवतस्त्वित्यादिना यावत्सोमवंशप्रस्तावं क्षुवतः कुर्वतो म
नोर्घ्राणतो जज्ञे श्रद्धायां जनयामास दशपुत्रानिति तु पूर्वोक्तं ग्राकृत्याभिप्रायेण द्रष्टव्यं पुत्राणां शतं ज्येष्ठाः
४ आर्यावर्तः पुण्यभूमिर्मध्यं विंध्यहिमाचलयोः तस्मिन् पुरस्तात्समुद्रपर्यंतमंडलविभागेन पंचविंशति

क्षुवतस्तु मनोर्जज्ञे इक्ष्वाकुर्घ्राणतः सुतः तस्य पुत्रशतज्येष्ठा विकुक्षिनिमिदंडकाः ४ तेषां
पुरस्तादभवन्नार्यावर्ते नृपा नृप पंचविंशतिः पश्चाच्च त्रयो मध्ये परेऽन्यतः ५ स एकदा
ष्टकाश्राद्ध इक्ष्वाकुः सुतमादिशत् मांसमानीयतां मेध्यं विकुक्षे गच्छ मा चिरं ६ तथेति स व
ने गत्वा मृगान् हत्वा क्रियार्हणान् श्रांतो बुभुक्षितो वीरः शशं चाददपस्मृतिः ७ शेषं निवेदया
मास पित्रे तेन च तद्गुरुः चोदितः प्रोक्षणायाह दुष्टमेतदकर्मकं ८

नृपा अभवन् हे नृप तथैव पश्चाच्च पंचविंशतिः मध्ये तु ज्येष्ठास्त्रयः अपरे तु अन्यतः अन्यत्र दक्षि
णोत्तरादिषु ५ विकुक्षिरेव शशाद इति प्रसिद्धिं वक्ष्यति अत्र हेतुमाह स एकदेति चतुर्भिः ६ क्रिया
र्हणान् श्राद्धार्हान् आदत अभक्षयत् ७ तद्गुरुर्वसिष्ठः प्रोक्षणाय श्राद्धोचितसंस्काराय ८ ॥ ५५

भा० न० धुंधुमार इति चेति चकारस्यान्वय २२ २४ अथ तस्मान्निकुंभात्कृशाश्वः २५ भार्याणां शतेन सहस्रस्य
२९ पुत्रार्थमिंद्रदैवत्यामिष्टिं प्रवर्तयामासुः समेत्याश्चर्ये २६ तद्देवाह राजेति षड्भिः तर्षितः त्रषितः सन् गेला

धुंधुमार इति ख्यातस्तत्सुतास्ते च जज्वलुः २३ धुंधोर्मुखाग्निना सर्वे त्रय एवावशेषिताः दृ
ढाश्वः कपिलाश्वश्च भद्राश्व इति भारत २४ दृढाश्वपुत्रो हर्यश्वो निकुंभस्तत्सुतः स्मृतः
बर्हणाश्वो निकुंभस्य कृशाश्वोथास्य सेनजित् २५ युवनाश्वोभवत्तस्य सोनपत्यो वनं ग
तः भार्याशतेन निर्विण्ण ऋषयोस्य कृपालवः इष्टिं स्म वर्तयांचक्रुरैन्द्रीं ते सुसमाहिताः
२६ राजा तद्यज्ञसदनं प्रविष्टो निशि तर्षितः दृष्ट्वा शयानान् विप्रांस्तान् पपौ मंत्रजलं स्वयं
२७ उत्थितास्ते निशम्याथ व्युदकं कलशं प्रभो पप्रच्छुः कस्य कर्मेदं पीतं पुंसवनं जलं २८
राजा पीतं विदित्वाथ ईश्वरप्रहितेन ते ईश्वराय नमश्चक्रुरहो दैवबलं बलम् २९ ॥ ऽऽ

ष्टप्रविष्टः मंत्राभिमंत्रितं जलं पत्न्यै देयं स्वयं पपौ २७ व्युदकं निरुदकं पुंसवनं पुत्रोत्पत्तिकारणं २८
ओ दैवबलमेव मुख्यं बलं पुरुषबलं तु न किंचिदिति वदंत ईश्वराय नमस्कारं चक्रुः २९ ॥ ऽऽ ॥ १९

१५ १६ येऽभिमुखंययुस्तान् यमंदर्शयितुं सदेहानेव भल्लैरनयदित्यर्थः १७ तच्चद्दृष्ट्वान्येदुद्रुवुःस्व
मालयंपाताल १८ इतिएतैः कर्मभिःपुरंजयादिनामभिराहूतः व्याहृतः प्रागितरेराहूतइत्यर्थः

ससन्नद्धोधनुर्दिव्यमादायविशिखान्शिखान् स्तूयमानःसमारुह्ययुयुत्सुःककुदिस्थितः १५
तेजसाप्यायितोविष्णोःपुरुषस्यमहात्मनः प्रतीच्यांदिशिदैत्यानांन्यरुणत्त्रिदशैःपुरं १६ तैस्त
स्याभूत्प्रधनंतुमुलंलोमहर्षणं यमायभल्लैरनयद्दैत्यानयेऽभिययुर्मृधे १७ तस्येषु
पाताभिमुखंयुगांताग्निमिवोल्बणं विसृज्यदुद्रुवुर्दैत्याहन्यमानाःस्वमालयं १८ जित्वा
पुरंधनंसर्वमयच्छद्वज्रपाणये प्रत्ययच्छत्सराजर्षिरितिनामभिराहृतः १९ पुरंज
यस्यपुत्रोऽभूदनेनास्तत्सुतःपृथुः विश्वगंधिस्ततश्चंद्रोयुवनाश्वस्तुतत्सुतः २० श्रा
वस्तस्तत्सुतोयेनश्रावस्तीनिर्ममेपुरी बृहदश्वस्तुश्रावस्तिस्ततःकुवलयाश्वकः २१ यः
प्रियार्थमुतंकस्यधुंधुनामासुरंबली सुतानामेकविंशत्यासहस्रैरहनद्वृतः २२

१९ २० श्रावस्तिःश्रावस्तस्यपुत्रः २१ कुवलयाश्वकएवधुंधुमारइतिख्यातः तत्रकारणमाह यइति

पुत्राणामेकविंशत्यासहस्रैर्वृतःसन्हतवान २४

३५ ३६ ३७ प्रसंगात्सौभरेश्चरितमाह तेषामिति यावत्समाप्तिः तेषांस्वसारःमान्धातुःकन्याः ३८ ननुमहातापस
स्यकुतोविवाहादिप्रसंगः कथंवाजरठंजज्ञेरितिराजकन्याववव्रिरेतत्राह यमुनांतर्जलइतिषड्भिःनृपंमान्धातारं
३९ सोपिमान्धातास्वयंवरेगृह्यतामित्याह ४० सविप्रःस्त्रीणांविप्रियंमांविचिंत्यानेनाहंप्रत्युक्तःअतःआत्मानं

द्रव्यंमंत्रविधिर्यज्ञोयजमानस्तथार्त्विजः धर्मोदेशश्चकालश्चसर्वमेतद्यदात्मकं ३५ यावत्
सूर्यउदेतिस्मयावच्चप्रतितिष्ठति सर्वंतद्यौवनाश्वस्यमान्धातुःक्षेत्रमुच्यते ३६ शशबिंदोर्दु
हितरिबिन्दुमत्यामधान्नृपः पुरुकुत्समंबरीषंमुचुकुंदंचयोगिनं ३७ तेषांस्वसारःपंचाशत्
सौभरिंवव्रिरेपतिं ३८ यमुनान्तर्जलेमग्नस्तप्यमानःपरंतपः निर्वृतिंमीनराजस्यवीक्ष्यमै
थुनधर्मिणः जातस्पृहोनृपंविप्रःकन्यामेकामयाचत ३९ सोप्याहगृह्यतांब्रह्मन्कामंक
न्यास्वयंवरे ४० सविचिंत्याप्रियंस्त्रीणांजरठोयमसंमतः वलीपलितएजत्कइत्यहंप्रत्युदा
हृतः साधयिष्येतथात्मानंसुरस्त्रीणामपीप्सितं किंपुनर्मनुजेंद्राणामितिव्यवसितःप्रभुः ४१

तथासाधयिष्यामीतिव्यवसितोनिश्चितवान् इतिद्वयोरन्वयः अप्रियत्वेहेतुः जरठोवृद्धोवलीभिर्युक्तः
कंपमानशिराः तापसत्वादिनाचासंमतोहमितिकृत्वानेत्यत्यस्यप्रपंचः सुरस्त्रीणामपीप्सितं किंपुनर्म
नुजेंद्राणांयाःस्त्रियस्तासामिति ४१

अयंकंधास्यति कंपास्यतीति दुःखितैर्विप्रैरुक्तेसति तस्यामिष्टामाराधितः इंद्रोमांधातापाता हेवत्स
मारोदीतिब्रुवन् देशिनींतर्ज्जनीमदादित्यर्थः ३१ तस्यपितायुवनाश्वोभिन्नकुक्षिरपिनममार किंतुकाला
न्तरेतपसासिद्धिमन्वगात् ३२ मान्धातुर्महिमानमाह त्रसद्दस्युरितिषड्भिः अंगहेराजन् यस्मान्मान्धातु

ततःकालउपावृत्तेकुक्षिंनिर्भिद्यदक्षिणं युवनाश्वस्यतनयश्चक्रवर्तीजजानह ३० कंधास्य
तिकुमारोयंस्तन्येरोरूयतेभृशं मान्धातावत्समारोदीरितीन्द्रोदेशिनीमधात् ३१ नममा
रपितातस्यविप्रदेवप्रसादतः युवनाश्वोपितत्रैवतपसासिद्धिमन्वगात् ३२ त्रस
दस्युरितीन्द्रोंगविदधेनामयस्यवै यस्मात्त्रसंतिह्युद्विग्नादस्यवोरावणादयः यौवनाश्वोथ
मान्धाताचक्रवर्त्यवनींप्रभुः सप्तद्वीपवतीमेकःशशासाच्युततेजसा ३३ ईजेचयज्ञंक्र
तुभिरात्मविद्भूरिदक्षिणैः सर्वदेवमयंदेवंसर्वात्मकमतीन्द्रियं ३४

दस्यवउद्विग्नाः कंपिताःसंतस्त्रस्यंति अत्रइंद्रोयस्यत्रसद्दस्युरितिनामविदधे समान्धाताअवनीमे
कःशशासेत्युत्तरेणान्वयः अच्युतस्यतेजसाअप्रच्युतेनतेजसेतिवा ३३ आत्मविदपिसर्वज्ञंविलुभी
जेत तमेवंविशिनष्टि सर्वदेवमयमिति सार्द्धेन ३४

आज्यस्तोकैः घृतबिंदुभिः ४६ इदानीं तस्यानुतापपूर्वकं वानप्रस्थाश्रममाह सकदाचिदिति सप्तभिः आत्मनो
मनसो हेतोः आत्मनोपह्नवं तपोहानिं ददर्श ४७ सच्चासौ चरितव्रतश्च योहं तस्य ब्रह्म तपः ४८ मिथुनव्रति
नां दांपत्यधर्मवतां चेत्यदि प्रसंगस्तर्हि तद्व्रतिषु ईश्वरार्थधर्मपरेष्वेव कार्य्य इति शेषः ४९ संगाज्जातं दो

एवं गृहेष्वभिरतो विषयान्विविधैः सुखैः सेवमानो न चातुष्यदाज्यस्तोकैरिवानलः ४६ सकदाचि
दुपासीन आत्मापह्नवमात्मनः ददर्श बह्वृचाचार्य्यो मीनसंगसमुत्थितं ४७ अहो इमं पश्यत मे वि
नाशं तपस्विनः सच्चरितव्रतस्य अंतर्जले वारिचरप्रसंगात्प्रच्यावितं ब्रह्म चिरं धृतं यत् ४८ सं
गं त्यजेत मिथुनव्रतिनां मुमुक्षुः सर्वात्मना न विसृजेद्बहिरिंद्रियाणि एकश्चरन्रहसि चित्त
मनंत ईशे युंजीत तद्व्रतिषु साधुषु चेत्प्रसंगः ४९ एकस्तपस्व्यहमथांभसि मत्स्यसंगात्पंचा
शतासमुत पंचसहस्रसर्गः नांतं व्रजाम्युभयकृत्यमनोरथानां मायागुणैर्हृतमतिर्विष
येर्थभावः ५०

षं प्रपंचयति एक इति पंचाशता भार्य्याभिः संबंधात्पंचाशदासं अभूवमित्यर्थः ततश्च सुतैः पंचसहस्रसर्ग आ
सं प्रत्येकं तासु पुत्रशतरूपेणोत्पन्नैः उभयकृत्यानि ऐहिकपारत्रिकाणि कर्माणि तद्विषयाणां मनोरथानां अर्थे

ततः किं वृत्तं तत्राह मुनिरिति द्वाभ्यां क्षत्त्रा प्रतीहारेण पंचाशतापि राजकन्याभिः स एक एव वरो वृतः ४२ ४३
तस गार्हस्थ्यं वर्णयति चतुर्भिः बह्वृच इति मंत्रसामर्थ्यमुक्तं ताभिः सह रेमे इत्युत्तरेणान्वयः कीदृशः अपार
णीयं दुरंतं यत्तपस्तस्य श्रिया समृद्ध्या अनर्घ्याः परिच्छदा येषु तेषु गृहेषु तथा नानाविधेषूपवनेषु अमला

मुनिः प्रवेशितः क्षत्त्रा कन्यांतःपुरमृद्धिमत् वृतश्च राजकन्याभिरेकः पंचाशता वरः ४२ तासां
तर कलिरभूद्भूयांस्तदर्थेऽपोह्य सौहृदं ममानुरूपो नायं व इति तद्गतचेतसां ४३ स बह्वृचस्ताभि
रपारणीयः तपः श्रियानर्घ्यपरिच्छदेषु गृहेषु नानोपवनामलांभः सरस्सु सौगंधिककान
नेषु महार्हशय्यासनवस्त्रभूषणस्नानानुलेपाभ्यवहारमाल्यकैः स्वलंकृतः स्त्रीपुरु
षेषु नित्यदा रेमेऽनुगायद्द्विजभृंगवंदिषु ४४ यद्गार्हस्थ्यं तु संवीक्ष्य सप्तद्वीपवतीपतिः ॥
विस्मितः स्तंभमजहात्सार्वभौमश्रियान्वितः ४५

न्यंभांसि येषु तेषु सरस्सु च कथंभूतेषु सौगंधिकानां कह्लाराणां काननानि शोभा येषु कथंभूतेषु गृह
दिषु स्वलंकृताः स्त्रियः पुरुषाश्च येषु अनुगायंतो पक्षिणो भृंगाश्च वंदिनश्च येषु कथंभूतः महार्हशय्या
दिभिरुपलक्षितः ४४ स्तंभं गर्वं ४५

पुरुकुत्सस्यवंशंकथयिष्यन्नादौतावत्तस्यविवाहंप्रभावंचाह उरगैर्भ्रातृभिर्यादत्तानर्मदातया २ वध्यान्वधार्हान् सचपुरुकुत्सोनागाल्लब्धवरोऽभूत् वरमाह इदंनर्मदयारसातलनयनादिकंस्मरतांसर्पादभयमिति ३ देहकृत्पिता त्रसद्दस्योःसुतोऽनरण्यइत्यर्थः ४ त्रयःशंकवइवदुःखहेतवोदोषायस्यासौत्रिशंकुः तदु

नर्मदाभ्रातृभिर्दत्तापुरुकुत्साययोरगैः तयारसातलंनीतोभुजगेंद्रप्रयुक्तया २ गं
धर्वानवधीत्तत्रवध्यान्वैविष्णुशक्तिधृक् नागाल्लब्धवरःसर्पादभयंस्मरतामिदं ३ त्रस
द्दस्युःपौरुकुत्सोयोनरण्यस्यदेहकृत् हर्यश्वस्तत्सुतस्तस्मादरुणोथत्रिवंधनः ४ त
स्यसत्यव्रतःपुत्रस्त्रिशंकुरितिविश्रुतः प्राप्तश्चांडालतांशापाद्गुरोःकौशिकतेजसा स
शरीरोगतःस्वर्गमद्यापिदिविदृश्यते पातितोवाक्शिरादेवैस्तेनैवस्तंभितोबलात् ५

क्तंहरिवंशे पितुश्चापरितोषेणगुरोर्दोग्ध्रीवधेनच अप्रोक्षितोपयोगाच्चत्रिविधस्तेव्यतिक्रमइतिप
रिणीयमानविप्रकन्याहरणात्क्रुद्धस्यगुरोःपितुःशापात् कौशिकस्यविश्वामित्रस्यतेजसाप्र
भावेणतेनैवकौशिकेन ५ ॥

न्यासोऽत्र संगत्याग एव वानप्रस्थधर्म इत्यर्थः ॥ ५१ ॥ ५२ ॥ आध्यात्मिकीं गतिं ब्रह्मलिप्सयं ५३ इति श्रीनवमे
षष्ठः ॥ ६ ॥ मान्धातुरन्वयः प्रोक्तः सप्तमे यत्र गीयते पुरुकुत्सस्य चाख्यानं हरिश्चन्द्रस्य चोत्तमं १ पुत्रप्रवरः पुत्रश्रे
ष्ठः सपितामहेन युवनाश्वेन प्रवृत्तः पुत्रत्वेन स्वीकृतः अत एव तस्य मान्धातृप्रवर्ग्यत्वं तत्सुतः अंबरीषस्य सु

एवं वसन् गृहे कालं विरक्तो न्यासमास्थितः वनं जगामानुययुस्तत्पत्न्यः पतिदेवताः ५१ तत्र तप्त्वा
कर्षणमात्म तपस्तीक्ष्णमात्मवान् सहैवाग्निभिरात्मानं युयोज परमात्मनि ५२ ताः स्वपत्युर्महाराज्ञ निरीक्ष्याध्या
त्मिकीं गतिं अन्वीयुस्तत्प्रभावेन अग्निं शांतमिवार्चिषः ५३ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे
सौभर्युपाख्याने षष्ठोऽध्यायः ॥ ६ ॥ श्रीशुक उवाच ॥ मान्धातुः पुत्रप्रवरो योऽम्बरीषः प्रकीर्तितः पि
तामहेन प्रवृतो यौवनाश्वस्तु तत्सुतः हारीतस्तस्य पुत्रोऽभून्मान्धातृप्रवरा इमे १

तः इमे यौवनाश्वांबरीषहारीताः मान्धातृगोत्रस्य प्रवराः अवांतरविशेषप्रवर्तकाः यद्वा यौवनाश्वविशे
षणं पितामहेन मान्धात्रा सह आर्षेयवरणे प्रवृत्तः मान्धातृप्रवराये पां ते इमे अंबरीषयौवनाश्वहारीताः
यथाहाश्वलायनः हरितकुत्सपिंगदर्भभैमगवानामांगिरसांबरीषयौवनाश्वेति मान्धातारं ह्येके ब्रुव
ते अंतीत्यांगिरसं मान्धात्रंबरीषयौवनाश्वेति १ ॥ ऽऽ ॥ राम ॥ ऽऽ ॥ रामऽ ॥ ऽऽ ॥

भा० न० १० ११ राजन्नहेव रूण राजन्यः पशुर्यदा सान्नाहिकः कवचवंधार्हः संग्रामसमर्थः अथन्तदास्तु चिः १२ इ
२३ त्येवं तं तं कालं वंचयता राज्ञा उक्तः प्रार्थितो देवो वरुणस्तं तं कालं प्रत्यैक्षत तेत्यर्थः १३ चिकीर्षितं आत्त

जाता दंता यजस्वेति स प्रत्याहाथ सोऽब्रवीत् यदा पतंत्यस्य दंता अथ मे ध्योभवेदिति १० पशो
र्निपतिता दंता यजस्वेत्याह सोऽब्रवीत् यदा पशोः पुनर्दंता जायंतेऽथ पशुः शुचिः ११ पुनर्जाता
यजस्वेति स प्रत्याहाथ सोऽब्रवीत् सान्नाहिको यदा राजन् राजन्योऽथ पशुः शुचिः १२ इति पु
त्रानुरागेण स्नेहयंत्रितचेतसा कालं वंचयता तं तं मुक्तो देवस्तदैक्षत १३ रोहितस्तदभिज्ञा
य पितुः कर्म चिकीर्षितं प्राणप्रेप्सुर्धनुष्पाणिररण्यं प्रत्यपद्यत १४ पितरं वरुणग्रस्तं श्रु
त्वा जातमहोदरं रोहितो ग्राममेयाय तमिंद्रः प्रत्यषेधत १५ भूमेः पर्य्यटनं पुण्यं तीर्थक्षे
त्रनिरूपणैः रोहिताय दिशच्छक्रः सोऽप्यरण्ये वसत्समां १६

नापशुना वरुणायजनम् १४ ततश्च कुपितेन वरुणेन ग्रस्तं अतएव जातं महदुदरं यस्य तं पि
तरं श्रुत्वा १५ समां वर्षम् १६

पक्षिणोः आडीबकयोः सतोः विश्वामित्रराजसूयदक्षिणाछलेन हरिश्चंद्रं सर्वस्वमपहृत्य पातयामास ततस्त्र
त्वाकुपितो वशिष्ठोपि विश्वामित्रं त्वमाडी भवेति शशाप सोपि त्वं बको भवेति वशिष्ठं शशाप तयोश्च युद्धम
भूदिति प्रसिद्धं ६ हरिश्चंद्रो ह वैधस ऐक्ष्वाको राजाऽपुत्र आसेत्यादि श्रुतिप्रसिद्धं हरिश्चंद्रस्य चरितमा

त्रैशंकवो हरिश्चंद्रो विश्वामित्रवसिष्टयोः यन्निमित्तमभूद्युद्धं पक्षिणोर्बहुवार्षिकं ६ सोनपत्यो
स्य ३ विषण्णात्मा नारदस्योपदेशतः वरुणं शरणं यातः पुत्रो मे जायतां प्रभो यदि वीरो महाराज तेन ते
वक्ष्यायजेऽहमिति ७ तथेति वरुणेनोक्तः पुत्रो जातस्तु रोहितः जातः सुतो ह्यनेनांग मां यजस्वेति सोऽब्रवी
त् यदा पशुर्निर्दशः स्यादथ मेध्यो भवेदिति ८ निर्दशे च समागत्य यजस्वेत्याह सोऽब्रवीत्
यदा पतंत्यस्य दंता अथ मेध्यो भवेदिति ९
इ सोऽनपत्य इत्यादि यावत्समाप्तिः कथं [illegible] शरणं
यातस्तदाह पुत्रो मे जायतां यदि वीरः पुत्रो मे जायेत तर्हि तेनैव पुरुषपशुना त्वा यजे यजामीति भा
षया ७ तथेत्युक्तवता वरुणेन निमित्तेनास्य रोहितनामपुत्रो जातः जाते पुत्रे स वरुणो जातः सुतो मामने
न यजस्वेति अब्रवीत् यदा पशुर्निर्दशः निर्गतदशदिवसः स्यादित्येवं स राजाब्रवीदित्यनुषंगः ८ ९॥

तां गतिमेवाह सार्द्धद्वाभ्यां मनः पृथिव्यां धारयन् ज्ञानकलां ध्यात्वा तया ज्ञानं विनिर्दहन् तां च हित्वा मुक्तबंधनः त
स्याविरित्यन्वयः मनोमूलो हि संसारः मन एवात्र मूलं हि सोम्य मन इति श्रुतेः अतो न शब्दवाच्यायां पृथिव्यां मनो धार
यन् एकीकुर्वन् अपः तेजसा ततेजोऽनिलेन तं च खे आकाशे तच्चाभूतादावहंकारे तं च भूतादिमहंकारं महात्मनि
महतत्त्वे तस्मिन् विषयाकारं व्यावर्त्य ज्ञानकलां ज्ञानांशमात्मत्वेन ध्यात्वा तया धानवृत्तिरूपया आत्मावर

मनः पृथिव्यां तामद्भिस्तेजसापोऽनिलेन तत् खे वायुं धारयंस्तच्च भूतादौ तं महात्मनि
तस्मिन् ज्ञानकलां ध्यात्वा तया ज्ञानं विनिर्दहन् हित्वा तां स्वेन भावेन निर्वाणसुखसंविदा
अनिर्देश्याप्रतर्क्येण तस्थौ विध्वस्तबंधनः २४ ॥ इति श्रीमद्भागवते महापुराणे नवम
स्कंधे हरिश्चंद्रोपाख्याने सप्तमोऽध्यायः ॥ ७ ॥ श्रीशुक उवाच ॥ हरितो रोहितसुतश्चंपस्त
स्माद्विनिर्मिता चंपापुरी सुदेवो ततो विजयो यस्य चात्मजः ॥ १ ॥

कमज्ञानं विनिर्दहन् निर्वाणसुखसंविदा तां च हित्वा मुक्तबंधनः सन् अनिर्देश्येनाप्रतर्क्येण स्वे
न भावेन स्वस्वरूपेण तस्थौ ॥ २४ ॥ इति नवमे सप्तमः ७ ॥ अष्टमे रोहितस्यात्रो वंशो यत्राभवन्नृपः सगरः क
पिलाद्येपान्निर्दग्धा यस्य सुतनवः चंपस्तस्मादभवद्येन चंपापुरी निर्मिता अतः चंपात् सुदेवः १ ॥

द्वितीयेचवर्षेवृत्रहाअभ्येत्याभ्येत्यतथैवतंप्रतिषेधन् किंचित्किंचिदाह १७ १८ १९ वरुणेनमुक्तं उदरंयस्य महत्
कथायस्यसः २० आत्मवान् जमदग्निरध्वर्युरभूत अपास्योमुनिः सामगउद्गाताभूदित्यर्थः २१ उपरिष्टात्

एवंद्वितीयेतृतीयेचतुर्थेपंचमेतथा अभ्येत्याभ्येत्यस्यविरोविप्रोभूत्वाहवृत्रहा १७ षष्ठे
संवत्सरेतत्रचरित्वारोहितःपुरीं उपव्रजन्नजीगर्तादक्रीणात्मध्यमंसुतं १८ शुनःशेफंपशुंपित्रेप्रद
२४ यसमवन्दतः १९ ततःपुरुषमेधेनहरिश्चन्द्रोमहायशाः मुक्तोदरोयजद्देवान्वरुणादीन्मतर्क ६३
थः २० विश्वामित्रोभवत्तस्मिन्होताचाध्वर्युरात्मवान् जमदग्निर्भूद्ब्रह्मावसिष्ठोऽपास्यसा
मगः २१ तस्मैतुष्टोददाविंद्रःशातकौंभमयंरथं शुनःशेफस्यमाहात्म्यमुपरिष्टात्प्रचक्ष्य
ते २२ सत्यसारांधृतिंदृष्ट्वासस्यचभूपतेः विश्वामित्रोभृशंप्रीतोददावविहतांगतिं २३

सभार्य्य १

विश्वामित्रस्तनाख्यानप्रसंगेन २२ अविहताम् गतिंज्ञानम् २३ रामरामरामरामरामराम

भा० न० तस्य द्वे भार्ये सुमतिः केशिनी च तत्र सुमत्याः पुत्राणां प्रभावं मृत्युं चाह सुमत्या इति षड्भिः ८ ९ एष वाजि
२५ हर इति ब्रुवंतोऽभिययुः षष्टिसहस्राणि परिछेदकत्तया संतियेषां उन्मिमेष लोचनोन्मीलितं चकार १० ११
किंचित्तु कपिलस्य कोपाग्निना दग्धा इति वर्णयंति तन्निराकरोति कृतत्र इत्यत्र आह सत्वधामनि शुद्धसत्वम्

सुमत्यास्तनया दृप्ताः पितुरादेशकारिणः हयमन्वेषमाणास्ते समंतान्न्यखनन्म
हीं ८ प्रागुदीच्यां दिशि हयं ददृशुः कपिलांतिके ९ एष वाजिहरश्चौर आस्ते मीलितलो
चनः हन्यतां हन्यतां पाप इति षष्टिसहस्रिणः उदायुधा अभिययुरुन्मिमेष तदा मु
निः १० स्वशरीराग्निना तावन्महेंद्रहृतचेतसः महद्व्यतिक्रमहतता भस्मसादभन्
क्षणात् ११ न साधुवादो मुनिकोपभर्जिता नृपेंद्रपुत्रा इति सत्वधामनि कथं तमो
रोषमयं विभाव्यते जगत्पवित्रात्मनि खे रजो भुवः १२

जगतः पवित्रः शुद्धिकर आत्मा यस्य तस्मिन् कथं विभाव्यते संभाव्यते असंभावनायां दृष्टान्तः
भुवो रजः खे कथं संभाव्यत इति १२ रामराम राम १२ रामरामराम १२ ॥ रामराम २५

अरिभिर्हृताभूर्यस्य २ और्वेण ऋषिणा आत्मानं देहं प्रजावंतम् सगर्भम् ३ गरो विषं तेन गरे
ण सहैव जातः ४ गुरुवाक्येण और्ववचनेन कांश्चिद् हत्वैव विकृतवेषिणं चक्रे तदेवाह मुंडानिति मु

भरुकस्तत्सुतस्तस्माद्वृकस्तस्यापि बाहुकः सोऽरिभिर्हृतभू राजा सभार्यो वनमाविशत् २
वृद्धं तं पंचतां प्राप्तं महिष्यनुमरिष्यती और्वेण जानतात्मानं प्रजावंतं निवारिता ३ आज्ञा
यास्यैव सपत्नीभिर्गरो दत्तोऽन्धसा सह सह तेनैव संजातः सगराख्यो महायशाः ४ सगर
श्चक्रवर्त्यासीत्सागरो यत्सुतैः कृतः यस्तालजंघान्यवनाञ्छकान्हैहयबर्बरान् ना
वधीद्गुरुवाक्येन चक्रे विकृतवेषिणः मुंडाञ्छ्मश्रुधरान्कांश्चिन्मुक्तकेशार्द्धमुंडिता
न् अनंतर्वाससः कांश्चिदबहिर्वाससोऽपरान् ५ सोऽश्वमेधैरयजत सर्ववेदसुरा
त्मकं और्वोपदिष्टयोगेन हरिमात्मानमीश्वरं ६ तस्योत्सृष्टं पशुं यज्ञे जहाराश्वं पुरं
दरः ७

क्तकेशानर्द्धमुंडितांश्च ५ और्वेणोपदिष्टो योगउपायस्तेन ६ ७ एमरामरामरामरामरामरा

भिः

भा० न० १७ पितृव्यखातमनुपथः पंथास्तंययौ भस्मांति भस्मसमीपे १८ अजानंतोऽवजानंतोऽप्यनुप्यावयंत्विति तुष्टाव

२६ षड्भिरीशानमंशुमानेवमाशयः १९ अजनः अजः ब्रह्मापि त्वामद्यापि न पश्यति न च बुध्यते कुतोऽन्यः ॥

आत्मनः स्वस्मात् परं परमेश्वरं कैर्हेतुभिस्तैः समाधियुक्तिभिः समाधिनाप्यपरोक्षं न पश्यंति युक्ति

अयोध्यावासिनः सर्वे बालकान् पुनरागतान् दृष्ट्वा विसिष्मिरे राजन् राजा चाप्यन्वतप्यत

१७ अंशुमांश्चोदितो राज्ञा तुरङ्गान्वेषणे ययौ पितृव्यखातानुपथं भस्मांति ददृशे ह

यं १८ तत्रासीनं मुनिं वीक्ष्य कपिलाख्यमधोक्षजं अस्तौत्समाहितमनाः प्रांजलिः प्र

णतो महान् ॥ १९ ॥ अंशुमानुवाच ॥ न पश्यति त्वां परमात्मनोऽजनो न बुध्यतेऽद्यापि समा

धियुक्तिभिः कुतोऽपरे तस्य मनः शरीर धी विसर्गसृष्टा वयमप्रकाशाः २० ॥ ऽऽ ॥

भिः परोक्षमपि न सम्यगवबुध्यत इत्यर्थः अपरेऽर्वाचीनास्तु कुतस्त्वां पश्येयुः अर्वाचीनत्वे हेतुः त

स्य ब्रह्मणः मनश्च शरीरं च धीश्च सत्त्वतमोरजः कार्याणि ताभिर्ये विविधा देवतिर्यग्नराणां सर्गाः

तेषु सृष्टाः तत्रापि वयं अप्रकाशाः अज्ञाः कुतः पश्येमेत्यर्थः २० ॥ ऽऽ ॥ ऽ२ २६

किंच यस्य येन ईरिता प्रवर्त्तिता तस्य विपश्चितः सर्वज्ञस्य कथं पृथङ्मतिः अरिमित्रादिभेददृष्टिः १३
तदेवं सुमत्याः पुत्रेषु मृतेषु केशिन्याः पौत्रेणाश्वमानीतः पितृव्योद्धरणयत्नश्च कृत इति दर्शयितुमाह
योऽसमंजस इति उक्तः केवलमज्ञैः वस्तुतस्तु समंजस एव स तु केशिन्याः दौत्रस्त्वमिप्रतीतं वारयति

यस्येरिता सांख्यमयी दृढेह नौर्यया मुमुक्षुस्तरते दुरत्ययं भवार्णवं मृत्युपथं विप
श्चितः परात्मभूतस्य कथं पृथङ्मतिः १४ असमंजस आत्मानं दर्शयन्नसमंजसः
जातिस्मरः पुरा संगाद्योगी योगाद्विचालितः आचरन् गर्हितं लोके ज्ञातीनां कर्म वि
प्रियं सरय्वां क्रीडतो बालान् प्रास्यदुद्वेजयन् जनं १५ एवं वृत्तः परित्यक्तः पित्रा स्नेह
मपोह्य वै योगैश्वर्येण बालांस्तान् दर्शयित्वा ततो ययौ १६

तस्यैव नृपस्यात्मनो देहाज्जातः १४ तस्य कथामाह चतुर्भिः असमंजसः पुरा पूर्वजन्मनि योगी सन् संग
हेतोः योगाद्विचालितः अत इदानीं जातिस्मरः सन् संगपरिहाराय जनमुद्वेजयन् लोके गर्हितं च ज्ञातीनां
विप्रियं कर्माचरन् क्रीडतो बालान् सरय्वां प्रास्यत् प्राक्षिपदित्यन्वयः १५ एवंविधं वृत्तं कर्म यस्य सः १६

तस्मात् हे शांत त्वां पुराणं पुरुषं केवलं नमामेत्यन्वयः पुराणपुरुषत्वे हेतुः मायागुणैः कर्मणि विश्वसृष्ट्यादीनि
लिंगानि च ब्रह्मादिरूपाणि यस्य तं प्रशांतत्वे हेतुः सदसद्भ्यां कार्यकारणाभ्यां पुण्यपापाभ्यां विमुक्तं अतः अनाम
रूपं तत्कृतनामरूपशून्यं किंतु ज्ञानोपदेशाय गृहीतः प्रकटितो देहः शुद्धसत्वमूर्त्तिर्येन तं यद्वा हे प्रशांतमायेति
हे अगुणेति च संबोध्य कर्मभिः सृष्ट्यादिकार्यैर्लिंगानि यस्येति योज्यं यद्वा प्रशांता मायागुणादयो यस्मिन् इ

प्रशांतमायागुणकर्मलिंगमनामरूपं सदसद्विमुक्तं ज्ञानोपदेशाय गृहीतदेहं नमाम
हे त्वां पुरुषं पुराणम् २३ त्वन्मायारचिते लोके वस्तुबुद्ध्या गृहादिषु भ्रमंति कामलोभे
र्ष्यामोहविभ्रांतचेतसः २४ अद्य नः सर्वभूतात्मन् कामकर्मेंद्रियाशयः मोहपाशो दृढ
श्छिन्नो भगवंस्तव दर्शनात् २५

त्येकमेव पदं २३ स्वभाग्यं श्लाघन्ते त्वन्मायेति द्वाभ्यां कामादिभिर्विभ्रांतानि चेतांसि येषां ते इमे सर्वे गृ
हादिषु भ्रमंति २४ नः अस्माकं त्वत्कृपयैव घटितात् त्वद्दर्शनात् इति दृढोपि मोहमयः पाशश्छिन्नः कथं
भूतः कामादीनामाशयः आश्रयः त्वत्प्रसादेन कृतार्थोस्मीत्यर्थः २५ रामरामरामरामराम॥

अपरे [illegible] तर्हि किं पश्यंति तदाह ये देहभाजस्ते स्वस्मिन्सम्यक्स्थितमपि त्वां न विदुः किंतु गुणानेव पश्यंति अ
पवान् गुणानपि अपितु तम एव पश्यंति यतस्त्रिगुणा बुद्धिरेव प्रधानं येषां अतो बहिरेव प्रकाशो ज्ञानं येषां बुद्धि
परतंत्रतया जाग्रत्स्वप्नयोर्विषयान् पश्यंति सुषुप्तौ तु तम एव केवलं न तु निर्गुणं त्वां सर्वत्र हेतु निर्गुणं त्वां सर्वत्र
हेतुः यत यतः यस्य लव मायये तिवा मोहितचेतसो येषां ते २१ तथाप्यहं विचारेण ज्ञास्यामीति चेत्तत्राह तं

ये देहभाजस्त्रिगुणप्रधाना गुणान्विपश्यंत्युत वा तमश्च ॥ यन्मायया मोहितचेतसस्त्वां
विदुः स्वसंस्थं न बहिः प्रकाशाः ॥ २१ ॥ तं त्वामहं ज्ञानघनं स्वभावप्रध्वस्तमायागुणभेदमो
हैः सनंदनाद्यैर्मुनिभिर्विभाव्यं कथं विमूढः परिभावयामि ॥ २२ ॥ ॥

तामहं [illegible] विमूढः कथं परिभावयामि विचारयामि कथंभूतं ज्ञानघनं शुद्धज्ञानमूर्तिं स्वत
एव प्रध्वस्तो मायागुणनिमित्तो भेदमोहो येभ्यो तैर्विभाव्यं विचिंत्यं अयं भावः ज्ञानघनत्वात् न ता
वज्ज्ञानविषयत्वं विचारविषयत्वेपि मायागुणैरभिभूतोहं न विचारे समर्थ इति २२ एम साम

भा० न० २ कालंमहत्तुं एयिवान्प्राप्तः तंप्रत्यात्मानंदर्शयामास तेवरदास्मीति गंगयोक्तः सन्स्वमभिप्रायं पूर्वजो १
२८ द्धरणंशशंसकथयामास ३ आह गंगा कोपिगगनात्पतंत्यामेवेगंधारयिता धारयिष्यतिकिं ४ किंच

॥दिलीपस्तत्सुतस्तद्वदशक्तः कालमेयिवान् भगीरथस्तस्यपुत्रस्तेपेससुमहत्तपः
॥२ दर्शयामासतंदेवीप्रसन्नावरदास्मिते इत्युक्तः स्वमभिप्रायंप्रशंसावनतोनृपः ३
कोपिधारयितावेगंपतंत्यामेमहीतले अन्यथाभूतलंभित्वानयास्येरसातलं ४
किंचाहंनभुवंयास्येनरामय्यामृजंत्यघं मृजामितदघंकुत्रराजंस्तत्रविचिंत्यतां ॥पुरा
जोवाच॥ साधवोन्यासिनः शांताब्रह्मिष्ठालोकपावनाः हरंत्यघंतेंगसंगात्तेष्वास्तेह्यघ
भिद्धरिः ६ धारयिष्यतितेवेगंरुद्रस्त्वात्माशरीरिणां यस्मिन्नोतमिदंप्रोतंविश्वंशाटीवतंतुषु ७

आमृजंति क्षालयिष्यंति तत्रोपायंविचिंत्यतां ५ हरंति हरिष्यंति अघंभिन्नत्तीति अघभित् ६ आ
त्मा कथंभूतः यस्मिन्निदंविश्वमोतंग्रथितं ऊर्द्धतंतुषुशाटीपटइव प्रोतंचतिर्य्यक्तंतुषुपटइव अ
२८

ध्वी॥ अश्वंलब्ध्वापितामहांतंप्रत्याहृत्॥ इमेचेति॥ २९॥ तंपरिक्रम्येतिस्पष्टोक्तिः॥ ३०॥ इति श्रीनवमेऽष्टमः॥ ८॥ न
वमेंऽशुमत्तोवंशःखट्वांगावधिवर्ण्यते॥ गंगाभ्रंतत्समानिन्येयस्यपौत्रोभगीरथः॥ यथासगरपौत्रोयत्॥

श्रीशुकउवाच॥ इत्थंगीतानुभावस्तंभगवान्कपिलोमुनिः॥ अंशुमंतमुवाचेदमनुगृह्यधियानृ
प॥ २८॥ श्रीभगवानुवाच॥ अश्वोऽयंनीयतांवत्सपितामहपशुस्तव॥ इमेचपितरोदग्धागंगांभोऽर्ह
न्तिनेतरत्॥ २९॥ तंपरिक्रम्यशिरसाप्रसाद्यहयमानयत्॥ सगरस्तेनपशुनाक्रतुशेषंसमापय
त्॥ ३०॥ राज्यमंशुमतिन्यस्यनिःस्पृहोमुक्तबंधनः॥ और्वोपदिष्टमार्गेणलेभेगतिमनुत्तमां
॥ ३१॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे सगरोपाख्याने अष्टमोऽध्यायः॥ ८॥ श्रीशुक
उवाच॥ अंशुमांश्चतपस्तेपेगंगानयनकाम्यया॥ कालंमहांतंनाशक्नोत्ततःकालेनसंस्थितः॥ १॥

ज्यंदत्वातपस्तेपस्तेपे तथाअंशुमांश्चस्वपुत्रायराज्यंदत्वामहांतंकालंतपस्तेपेइतिचकारस्यार्थः
नाशक्नोत्गंगामानेतुमितिशेषः संस्थितः मृतः १

त्रनंतस्यविशेषणंसंनिवेश्येति त्रैगुण्यंदेहसंबंधं १५ १६ नलस्यसखात्रयात् प्राप्तः तत्सुतः ऋतुपर्णो

संनिवेश्यमनोयस्मिंच्छ्रद्धयामुनयोऽमलाः त्रैगुण्यंदुस्त्यजंहित्वासद्योयातास्तदात्मतां
१५ श्रुतोभगीरथाज्जज्ञेतस्यनाभोपरोऽभवत् सिंधुद्वीपस्ततस्तस्मादयुतायुस्ततोऽभव
त् १६ ऋतुपर्णोनलसखोयोऽश्वविद्यामयान्नलात् दत्वाक्षहृदयंचास्मैसर्वकामस्तुत
त्सुतः १७ ततःसुदासस्तत्पुत्रोमदयंतीपतिर्नृप आहुर्मित्रसहंयंवैकल्माषांघ्रिमुतक्व
चित् वसिष्ठशापाद्रक्षोऽभूदनपत्यःस्वकर्मणा १८ ॥राजोवाच॥ किंनिमित्तोगुरोःशापः
सौदासस्यमहात्मनः एतद्वेदितुमिच्छामःकथ्यतांनरहोयदि ॥१९॥ श्रीशुकउवाच॥
सौदासोमृगयांकिंचिच्चरन्रक्षोजघानह मुमोचभ्रातरंसोऽथगतःप्रतिचिकीर्षया २०

स्यसुतः १७ तत्पुत्रःसौदासः १८ नरहः नरहस्यं १९ मृगयांचरन्किंचिद्रक्षः किंचिद्राक्षसंजघान तस्यभ्रा

तरंमुमोच समतां २०

इत्येवं गंगामुक्त्वा तच्छ्रुत्वेति पाठे श्रावयित्वेत्यर्थः ८ राजाभिहितं तथेत्यंगीकृत्य हरेः पादेन पूतं जलं यस्यास्तां ९
१० ११ प्रसंगाद्गंगामाहात्म्यमाह चतुर्भिः यस्या जलस्पर्शमात्रेण तच्च केवलं देहभस्मभिरेव न साक्षात् ब्रह्मणि

इत्युक्त्वा स नृपो देवं तपसातोषयच्छिवं कालेनाल्पीयसा राजंस्तस्येशः समतुष्यत ८ तथेति रा
ज्ञाभिहितं सर्वलोकहितः शिवः दधारावहितो गंगां पादपूतजलां हरेः ९ भगीरथः स राजर्षि
र्निन्ये भुवनपावनीं यत्र स्वपितॄणां देहा भस्मीभूताः स्म शेरते १० रथेन वायुवेगेन प्रयांतमनु
धावंती देशान्पुनंती निर्दग्धानासिंचत्सगरात्मजान् ११ यज्जलस्पर्शमात्रेण ब्रह्मदंडहता अ
पि सगरात्मजा दिवं जग्मुः केवलं देहभस्मभिः १२ भस्मीभूतांगसंगेन स्वर्याताः सगरात्म
जाः किंपुनः श्रद्धया देवीं ये सेवंते धृतव्रताः १३ न ह्येतत्परमाश्चर्यं स्वर्धुन्या यदिहोदितं अ
नंतचरणांभोजप्रसूताया भवच्छिदः १४

स्वकृतेन दंडेन हता अपि तां श्रद्धया सेवंत इति शेषः १२ तत्र पंचयति भस्मीभूतेनांगेन यः संगस्तेन १३ १४॥

भा० न० अकृतार्थेव द्दीनवत् २६ अकृतार्थं असमाप्तिरिति २७ २८ सर्वभूतानामात्मेति भावनयाआरा
३० धयितुमिच्छुः यद्वा सर्वभूतानामात्मभावेन भूतेषु स्थितमपि गुणैरंतर्हितं ब्रह्मेति संबंधः पाठांतरे त्वं

हुधात्रेज गृहे विप्रं ततस्त्वाहीकृतार्थवत् २६ न भवान्राक्षसः साक्षादिक्ष्वाकूणां महारथः
मदयंत्याः पतिर्वीर नाधर्मं कर्तुमर्हसि देहि मेऽपत्यकामाया अकृतार्थं पतिं द्विजं २७ दे
होऽयं मानुषो राजन्पुरुषस्याऽखिलार्थदः तस्मादस्य वधो वीर सर्वार्थवध उच्यते २८ ए
ष हि ब्राह्मणो विद्वांस्तपःशीलगुणान्वितः आरिराधयिषुर्ब्रह्म महापुरुषसंज्ञितं सर्वभू
तात्मभावेन भूतेष्वंतर्हितं गुणैः २९ सोऽयं ब्रह्मर्षिवर्यस्ते राजर्षिप्रवराद्विभो कथमर्ह
ति धर्मज्ञ वधं पितुरिवात्मजः ३० तस्य साधोरपापस्य भ्रूणस्य ब्रह्मवादिनः कथं वधं
यथा बभ्रोर्मन्यते सन्मतो भवान् ३१

तर्हितः सोयमित्युत्तरेणान्वयः २९ ३० भ्रूणस्य श्रोत्रियस्य गर्भस्य सतः इति वा बभ्रोः गोः सतां मतो भवान् वधं कथं साधु मन्यत इत्यर्थः ३१

अधमनिष्ठं सूदः पाचकः तद्रूपधरः सन् राज्ञोगृहेवर्त्तमानः २१ परिवेष्यमाणमन्नंसविलोक्य एवंनरमां
सव्यवहारेण २२ वसिष्ठएवतंशापंद्वादशवार्षिकंचक्रे २३ रुशतीःतीक्ष्णाअपःस्वपादयोर्जहौ नान्यत्र त
त्रहेतुः दिशइति एवमनेनमित्रसहत्वमपिदर्शितं मित्रस्यकलत्रस्यवाचःसहनात् २४ तदेवंराक्षस

सचिंतयन्नघंराज्ञः सूदरूपधरोगृहे गुरवेभोक्तुकामाय पक्त्वानिन्येनरामिषं २१ प
रिवेष्यमाणंभगवान्विलोक्याऽभक्ष्यमंजसा राजानमशपत्क्रुद्धोरक्षोह्येवंभविष्यसि २२ र
क्षःकृतंतद्विदित्वाचक्रेद्वादशवार्षिकं २३ सोप्यपोंऽजलिनादायगुरुंशप्तुंसमुद्यतः वारि
तोमदयंत्यापोरुशतीःपादयोर्जहौ दिशःखमवनिंसर्वंपश्यन्जीवमयंनृपः २४ रा
क्षसंभावमापन्नःपादेकल्माषतांगतः व्यवायकालेददृशेवनौकौदंपतीद्विजौ २५ ॥

त्वेकल्माषांघ्रित्वेचकारणमुक्त्वास्वकर्मणानपत्यइतियदुक्तं तत्प्रपंचयति व्यवायकालइत्यादिना कर्म
णाऽप्रजइत्यंतेन वनमोकौनिवासोययोस्तौवनौकसौच तौदंपतीच पृथक्पदपाठेसकारलोपश्चार्षः २५

भा० न० स्त्रीभिरावेष्ट्य परशुरामात्परिरक्षितः अतो नारीकवच इत्युक्तः निःक्षत्रे सति तत्र वंशस्य मूलमभवत् अतो मूलक

३१ क इति चोक्तः ४० ४१ प्रसन्नैर्देवैर्वरं वृणीष्वेति उक्ते खट्वांगेनोक्तं प्रथमं तावन्मम मायुः कथ्यतामिति देवैश्चोक्तं

अश्मकान्मूलको जज्ञे यः स्त्रीभिः परिरक्षितः नारीकवच इत्युक्तो निःक्षत्रे मूलकोऽभवत् ४०
ततो दशरथस्तस्मात् पुत्र ऐडविडस्ततः राजा विश्वसहो यस्य खट्वांगश्चक्रवर्त्यभूत् ४१ यो दे
वैरर्थितो दैत्यानवधीद्युधि दुर्जयः मुहूर्तमायुर्ज्ञात्वैत्य स्वपुरं संदधे मनः ४२ न मे ब्रह्मकु
लात्प्राणाः कुलदैवान्न चात्मजाः न श्रियो न मही राज्यं न दाराश्चातिवल्लभाः ४३ न बाल्ये
पि मतिर्मह्यमधर्मे रमते क्वचित् नापश्यमुत्तमश्लोकादन्यत्किंचन वस्त्वहं ४४ देवैः का
मवरो दत्तो मह्यं त्रिभुवनेश्वरैः न वृणे तमहं कामं भूतभावनभावनः ४५

मुहूर्तमात्रमिति तज्ज्ञात्वा देवैर्दत्तेन विमानेन शीघ्रं स्वपुरमेत्य मनः परमेश्वरे संदधे ४२ एतदेव स्वसाधुवृत्ता
स्मरणपूर्वकं तत्कृतेन निश्चयेन दर्शयति नेति सप्तभिः कुलदैवा ब्राह्मकुलात्सकाशान्मे प्राणादयो नातिवल्लभाः ना
तिप्रियाः ४३ ४४ मह्यं मम भूतभावनो हरिस्तस्मिन्नेव भावना यस्य सोहं ते कामं न वृणे ४५ ३१

त्तरणमपियेनविज्ञानजीविष्यामि सोयंयदिभक्षःक्रियते तर्हिमृतकंयथामृतप्रायंमांपूर्वंभक्षय ३२ दिधिषुं
गर्भाधानकर्त्तारं ३४ आधानात् मैथुनात् हेत्रत्र्तप्रद्तमृत्युर्मयाप्रदर्शितः ३५ ३६ ३७ तदेकंकर्मणात्र

यद्ययंक्रियत्तेभक्षस्तर्हिमांखादपूर्वतः नजीविष्येविनायेनत्द्धरणंचमृतकंयथा ३२ एवंक
रुणभाषिण्याविलपंत्याअनाथवत् व्याघ्रःपशुमिवाखादत्सौदासःशापमोहितः ३३ ब्रा
ह्मणीवीक्ष्यदिधिषुंपुरुषादेनभक्षितं शोचंत्यात्मानमुर्वीशमशपत्कुपितासती ३४ यस्मान्मे
भक्षितःपापकामार्त्तायाःपतिस्त्वया तवापिमृत्युराधानात्दकृतप्रज्ञदर्शितः ३५ एवंमित्रस
हंसप्ताापत्तिलोकपरायणा तदस्थीनिसमिद्धेग्नौप्रास्यभर्तुर्गतिंगता ३६ विशापोद्वाद
शाब्दांतेमैथुनायसमुद्यतः विज्ञायब्राह्मणीशापंमहिष्यासनिवारितः ३७ ततऊर्ध्वंसत्यत्या
जस्त्रीसुखंकर्मणाप्रजः वसिष्ठस्तदनुज्ञातोमदयंत्यांप्रजामधात् ३८ सावैसप्तसमागर्भ
मविभ्रन्नव्यजायत जघ्नेश्मनोदरंतस्याःसोऽश्मकस्तेनकथ्यते ३९
प्रजः ३८ अविभ्रद्धारेत्यर्थः नव्यजायत नप्रासूत अतोवसिष्ठएवतस्याउदरमश्मनाजघान सउत्पन्नः

टी॰ रामा॰ ५९

भा॰ न॰ २ ऋषिभिर्वाल्मिकिमुख्यैर्भूरिवर्णितं त्वयामुहुःश्रुतंतथापिसंक्षेपतःकथ्यमानंशृणु ३ ग्रंथकोटिभिराकीर्णं
३२ मद्भुतंरामविक्रमं अध्यायद्वयतोव्याख्यन्नेकेश्लोकेसमस्यति सकोशलेन्द्रःश्रीरामःनोऽस्मानवतात् पातु कथं
भूतः योगुर्वर्थेपितुःसत्यस्यपालनार्थंत्यक्तराज्यःसन् पद्भ्यांचरतिस्मकुमाराभ्यांपद्भ्यांतदेवाह प्रियायाःपाणिनापि
स्पर्शेनाक्ति क्षमाययोस्ताभ्यांप्रतिवनंव्यचरत् हरीन्द्रोहनुमान्सुग्रीवोवा अनुजोलक्ष्मणःताभ्यामजितोऽ

तस्यापिभगवानेषसाक्षाद्ब्रह्ममयोहरिः अंशांशेनचतुर्द्धागात्पुत्रत्वंप्रार्थितःसुरैः रामलक्ष्मणभ
रतशत्रुघ्नाइतिसंज्ञया २ अस्यानुचरितंराजन्नृषिभिस्तत्वदर्शिभिः श्रुतंहिवर्णितंभूरित्वयासीता
पतेर्मुहुः ३ गुर्वर्थेत्यक्तराज्योव्यचरदनुवनंपद्मपद्भ्यांप्रियायाःपाणिस्पर्शाक्षमाभ्यांमृजितप
थरुजोयोहरीन्द्रानुजाभ्यां वैरूप्याच्छूर्पणख्याःप्रियविरहरुषारोपितभ्रूविजृंभत्रस्ताब्धिर्बद्धसे
तुःखलदवदहनःकोशलेन्द्रोऽवतान्नः ४

पनीतापथरुजामार्गश्रमोयस्य शूर्पणख्यावैरूप्यात् कर्ण [illegible]
नासिकाछेदनहेतोः तयाप्रलोभितेनरावणेनापहारात् प्रियेणकलत्रेणविरहस्तेनरूढतयाआरोपितयो
भ्रुवोर्विजृंभेणैवत्रस्तोऽब्धिर्यस्मात् ततस्तच्छिज्ञापनेनबद्धःसेतुर्येनततःखलारावणादयएवदवोवनंत

तत्र हेतुः ॥ यइति ॥ विविक्तिः शांतानींद्रियाणि धीश्च येषां ते देवा अपि ॥ ४६ ॥ अथ तस्मात्प्रकृत्या स्वभावेनात्मनि रूढं गुणेषु संगं विश्वकर्तुर्भावेन हित्वा तमेवाहं प्रपद्ये ॥ ४७ ॥ अन्यभावं देहाद्यभिमानरूपमज्ञानं हित्वा ॥ ४८ ॥ स्वं भावमेवाह ॥ यत्तदिति ॥ शून्यवत्कल्पितं ॥ वागाद्यविषयत्वात् वासुदेव इतियं गृणंति ॥ ब्रह्मण एवमक्रान्नुप्रहार्थमाविष्कृतशक्तेर्वासुदेव

दि १

ये विविक्तेंद्रियधियो देवास्ते स्वहृदि स्थितं ॥ न विंदंति प्रियं शश्वदात्मानं किमुतापरे ॥ ४६ ॥ अथेशमायार
चितेषु संगं गुणेषु गंधर्वपुरोपमेषु ॥ रूढं प्रकृत्यात्मनि विश्वकर्तुर्भावेन हित्वा तमहं प्रपद्ये ॥ ४७ ॥
इति व्यवसितो बुद्ध्या नारायणगृहीतया ॥ हित्वान्यभावमज्ञानं ततः स्वं भावमाश्रितः ॥ ४८ ॥ यत्तद्ब्र
ह्मपरं सूक्ष्ममशून्यं शून्यकल्पितं ॥ भगवान्वासुदेवेति यं गृणंति हि सात्वताः ॥ ४९ ॥ इति श्री
मद्भागवते महापुराणे नवमस्कंधे खट्वांगचरिते नवमोऽध्यायः ॥ ९ ॥ श्रीशुक उवाच ॥ खट्वांगाद्दीर्घबा
हुश्च रघुस्तस्मात्पृथुश्रवाः ॥ अजस्ततो महाराजस्तस्माद्दशरथोऽभवत् ॥ १ ॥

त्वात् ॥ ४९ ॥ इति श्री नवमे नवमः ॥ ९ ॥ दशमे प्राह खट्वांगवंशे श्रीरामसंभवं ॥ तच्चरित्रं च तल्लंकेशं हत्वा योध्या
गमावधि ॥ खट्वांगाद्दीर्घबाहुः ॥ १ ॥

भा॰ नं॰ ३२ इदानीं गुर्वर्थ इति श्लोकं विवृण्वन्नाह यइति कदाचित्कैकेय्यास्तुष्टेन राज्ञा त्वदपेक्षितं दास्यामीति प्रतिश्रुतं
ततः श्रीरामस्य युवराज्याभिषेकसमये तया भरतस्य राज्यं रामस्य च वने वासः प्रार्थितः तदा सत्यपाशेन परिवी
तस्य पितुर्निदेशमाज्ञां शिरसा जगृहे ततो राज्यादिकं त्यक्त्वा सभार्यो वनं ययौ दुस्त्यजस्यापि महर्षेस्त्यागे दृष्टां
तः मुक्तसंगो योगी असन् प्राणानिवेति ८ रक्षो रावणस्य स्वसुः शूर्पणखायाः अशुद्धबुद्धेः सीतां जिघृक्षोः का

यः सत्यपाशपरिवीतपितुर्निदेशं स्त्रैणस्य चापि शिरसा जगृहे सभार्यः राज्यं श्रियं प्रणयिनः सुहृदो नि
वासं त्यक्त्वा ययौ वनमसूनिव मुक्तसंगः ८ रक्षःस्वसुर्व्यकृत रूपमशुद्धबुद्धेस्तस्याः खरत्रिशिरदू
षणमुख्यबंधून् जघ्ने चतुर्दशसहस्रमपारणीयकोदंडपाणिरटमान उवास कृच्छ्रं ९ सीताकथा
श्रवणदीपितहृच्छयेन सृष्टं विलोक्य नृपते दशकंधरेण जघ्नेऽद्भुतैणवपुषाश्रमतोऽपकृष्टो मारी
चमाशु विशिखेन यथा कमुग्रः १०

मातुरया इति वा रूपं व्यकृत्त विकारमनयत् तस्याः खरत्रिशिरोदूषणमुख्यान् बंधून् येषु तांश्चतुर्दशसहस्रं जघा
न अपारणीयमलंघ्यं सकोदंडपाणिर्यस्य सः ९ सीतायाः कथाश्रवणेन दीपितो हृच्छयो यस्य तेन सीतां हरिष्य
ता स्वस्याश्रमादपकर्षणार्थं सृष्टं मारीचं विलोक्य जघान कथंभूतं अद्भुतैणवपुषा स्वर्णहरिणदेहेनो
पलक्षितं अत एव प्रलोभनेनाश्रमतस्तेनापकृष्टः सन् कं दक्षं यथा उग्रः श्रीरुद्रः १० ॥ ऽऽ ॥ ऽऽ ३३

संक्षेपतोवर्णितंरामचरितंआदितआरभ्यविस्तरेणेह विश्वामित्राध्वरइत्यादिनायावदुत्तराध्यायसमाप्तिः
पश्यतएवलक्ष्मणस्यतमप्यनपेक्ष्यैवहताइत्यर्थः यच्छब्दानांसकोपाल्लिंगद्रोग्वत्तादित्यनेनैवान्वयः ५ लोके
येवीरास्तेषांसमितौसमाजे ऐशंत्र्यंबकंधनुरिन्दुयष्टिमिवलीलयैवादायसज्जीतमारोपितंविकृष्यमध्ये

विश्वामित्राध्वरेयेनमारीचाद्यानिशाचराः पश्यतोलक्ष्मणस्यैवहतानैरृतपुंगवाः ५
योलोकवीरसमितौधनुरैशमुग्रंसीतास्वयंवरगृहेत्रिशतोपनीतं आदायवालग
जलीलइवेक्षुयष्टिंसज्जीकृतंन्नृपविकृष्यवभंजमध्ये ६ जित्वानुरूपगुणशीलव
योऽङ्गरूपांसीताभिधांश्रियमुरस्यभिलष्यमाना मार्गेव्रजन्भृगुपतेर्व्यनयत्प्ररूढं
दर्प्पमहीमकृतयस्त्रिरराजवीजाम् ७

वभंज हेनृप उग्रंकठिनंगरिष्ठंतदाह वाहकानांत्रिभिः शतैरुपनीतं वालगजस्यलीलायस्यसः ६ अनुरू
पाणिस्वयोग्यानि गुणशीलादीनियस्यास्तां सीतासंज्ञां पूर्ववदुरसिअभिलष्यमाणोययातांजित्वा धनुर्भंगाम.
हानादभ्रवलण्डुभिन्नस्यभृगुपतेर्दर्पंव्यनयत् अपनीतवान् कथंभूतस्य त्रिः त्रिसप्तकृत्वः राजवीजेभ्यशून्या

भा० न० भाषणमेवाह न त्वामिति द्वाभ्यां एतावत्पर्यंतं तु निश्चितं त्वां न विदामः न जानीमइत्यर्थः इदानीं तु ज्ञातोसी
३४ त्याह यदिति पृथक्पदं यस्येत्यर्थः यद्दशेभ्यः सत्वादिभ्यः सुरगणादयो भवंतिस भवानिति १४ कामं यथेष्टं
प्र जलमाक्रम्यापि प्रयाहि अवमेहं पुरीषप्रायं त्रैलोक्यं रावयति आक्रंदयतीति तथा तं जहि हे वीर यद्यपि त
वज्जलेतिबंधकेन बंधकेन भवति तथापीह सेतुं बध्नीहि तर्हि किमर्थं ते यशसो विस्तारायेत्त देवाह यं से

न त्वां वयं जडधियो नु विदाम भूमन्कूटस्थमादिपुरुषं जगतामधीशं यत्सत्त्वतः सुरगणा रज
सः प्रजेशा मन्योश्च भूतपतयः स भवान्गुणेशः १४ कामं प्रयाहि जहि विश्रवसोऽवमेहं त्रैलो
क्यरावणमवाप्नुहि वीर पत्नीं बध्नीहि सेतुमिह ते यशसो वितत्यै गायंति दिग्विजयिनो यमुपे
त्य भूपाः १५ बद्ध्वोदधौ रघुपतिर्विविधाद्रिकूटैः सेतुं कपीन्द्रकरकंपितभूरुहांगैः सुग्रीवनील
हनूमत्प्रमुखैरनीकैर्लंकां विभीषणदृशाविशदग्रदग्धां १६

तुमुपेत्य दुष्करं कर्माचेत्युत्त्वद्यशो गास्यं
ति १५ तद्वाक्यमभिनंदयत्कृतं तदाह बद्ध्वेति विविधैरद्रीणां कूटैः शृंगैः सेतुं बद्ध्वा अग्रे सीतान्वेषणे
हनुमता पूर्वदग्धां लंकामविशत् कथंभूतैः शृंगैः कपींद्राणां करैः कंपितानि भूरुहाणामंगानि शाखा
दीनि येषु तैः विभीषणस्य दृशा बुद्ध्या कैः सहाविशत् सुग्रीवादयः प्रमुखा येषां तैरनीकैः १६॥ ३४

१० ततश्चरस्तोधमेनरणवृणेनऽसमत्तमपनीतायां प्रियया विमुक्तो भ्रात्रा लक्ष्मणेन सह हृत्कृपणवद्वने च
चार किलिप्रायसन्नित्यनेनप्रकारेणस्त्रीसंगिनां दुःखोदर्कां गतिं प्रख्यापयन् ११ आत्मार्थ्येन कृत्येन कर्म
णा रावणेन सह युद्धेन हतं कृत्वा शास्त्रीयदहनादिकं यस्य तं जटायुषं पुत्र इव दग्ध्वा कबंधस्य गृहणाय प्र
सारितवाहुं रक्षसमहन् अथ वालिनि हते तैः कपिभिर्दर्शितां गतिं बुद्ध्वा अंजनभवाभ्यां मर्चितां ग्रीयस

स्तोधमेन एकवह्निपिनैः समदत्तं वैदेहराजदुहितृय्येपयापितायां भ्रात्रा वने कृपणवत्प्रिय
या विमुक्तः स्त्रीसंगिनां गतिमितिप्रथयंश्चकार ११ दग्ध्वात्मकृत्यहतकृत्यमहन्कबंधं सख्यं
विधाय कपिभिर्दर्शितां गतिं तैः बुद्ध्वाथ वालिनि हते प्लवगेंद्रसैन्यैर्वेलामगात्स मनुजोऽजभ
वार्चितांघ्रिः १२ यद्रोषविभ्रमविवृत्तकटाक्षपातसंभ्रांतनक्रमकरो भयगीर्णघोषः सिं
धुः शिरस्यर्हणं परिगृह्य रूपी पादारविंदमुपगम्य बभाष एतत् १३

सः मनुजो वेलां समुद्रतीरमगात् १२ तत्र त्रिरात्रमुपवासेन प्रतीक्षितोऽपि सिंधुर्यदा नोपस्थितस्तदा यस्य
रोषविभ्रमेण क्रोधलीलया विवृतो यः कटाक्षस्तस्य पातेन संभ्रांता नक्रा मकराश्च यस्मिन् भयेन गीर्णः
ग्रस्तः स्तंभितो घोषो येन सः सिंधुः एतद्वक्ष्यमाणं बभाषे अर्हणमर्घ्यादिकं रूपी मूर्तिमान् १३ ॥ ६६

तेरघुपतेरनीकयाअंगदाद्याः सर्वैरावणाद्यस्त्रभादिभिर्येद्वरूथं सैन्यं तत्र द्वंद्वंयथाभवतितथाभिपत्यसंगमयुद्
मादिभिर्जघ्नुः कान्सीतायाअभिमर्शनहत्तमंगलंयस्यसःरावणःईशोयेषांतान् २० स्ववलस्यनष्टिंनाशमवेक्ष्य
रुष्टःक्रुद्धःसन् यानकंपुष्पकंविमानंकथंवाआरुह्य श्रीराममभिससार अथतेस्वःस्यंदनेस्वर्गस्थेइंद्रस्यरथे

तेऽनीकपारघुपतेरभिपत्यसर्वेद्वंद्वंवरूथमिभपत्तिरथाश्वयोधैः जघ्नुर्द्रुमैर्गिरिगदेषुभिरंग
दाद्याःसीताभिमर्शहततमंगलरावणेशान् २० रक्षस्पतिःस्ववलनष्टिमवेक्ष्यरुष्टआरु
ह्ययानकमथाभिससाररामं स्वःस्यंदनेद्युमतिमातलिनोपनीतेविभ्राजमानमहनत्नि
शितैःक्षुरप्रैः २१ रामस्तमाहपुरुषादपुरीषपर्यंतःकांतासमक्षमसतापहृतास्ववत्तेव्य
क्तंत्रपस्यफलमद्यजुगुप्सितस्ययच्छामिकालइवकर्तुरलंघ्यवीर्यः २२

मातलिना इंद्रसारथिनोपनीते द्युमतिदीप्तियुक्तेविभ्राजमानमहनत् २१ हेपुरुषाद पुरीषरात्त
सपुरीषप्रायययस्मादपहृतास्ववत्त त्वायथात्रसमक्षंगृहंप्रविश्यकिमपिहरतितद्वत्त तस्माज्जु
गुप्सितस्यकर्मणःकर्तुस्तेऽघकालइवालंघ्यवीर्योहंफलंयच्छामि अधर्मकर्तुःपुंसःकालोयथा

ततश्च सा लंका घूर्णा प्रचलिता बभूव कथंभूता. वानरेंद्राणां बलैरुद्धा विहारादयो यस्यां. निर्भज्यमाना
धिषणादयो यस्यां सा तत्र विहारः क्रीडास्थानं कोष्ठं धान्यगारादि श्रीः कोशः द्वारं गृहद्वारं गोपुरं पुरद्वा
रं सदः सभा वलभी प्रासादादिपुरोभागाच्छादिनी विटंकः कपोतपालिका धिषणं वेदिका शृंगाटकं चतुष्पथः

सा वानरेंद्रबलरुद्धविहारकोष्ठश्रीद्वारगोपुरसदोवलभीविटंका निर्भज्यमानधिषण
ध्वजहेमकुंभशृंगाटका गजकुलैर्ह्रदिनीव घूर्णा १७ रक्षःपतिस्तदवलोक्य निकुंभकुंभधूम्रा
क्षदुर्मुखसुरांतनरांतकादीन् पुत्रं प्रहस्तमतिकायविकंपनादीन्सर्वानुगान्समहिनोदथ
कुंभकर्णं १८ तां यातुधानपृतनामसिशूलचापप्राशर्ष्टिशक्तिशरतोमरखड्गदुर्गां सुग्री
वलक्ष्मणमरुत्सुतगंधमादनीलांगदर्क्षपनसादिभिरन्वितोगात् १९ ॥

१७ रक्षःपतिः रावणः पुत्रं इंद्रजितं प्रहस्तादींश्च समहिनोत् प्रायुंक्त १८ असिशूलादिभिर्दुर्गमां तां
यातुधानपृतनां सुग्रीवादिभिरन्वितः श्रीरामोऽभ्यगात् मरुत्सुतो हनुमान् ऋक्षो जांबवान् १९ ॥ ॥

भा० नं० ३० ३१ आत्मनःस्वस्यसंदर्शनेनयआह्लादस्तेनविकसन्मुखपंकजंयस्यास्तांयानेनपुष्पकं भ्रातृभ्यांलक्ष्म
३६ णसुग्रीवाभ्यां ३२ आयुश्चदत्वातेनापिसहैवययौ ३३ गोमूत्रयावकं गोमूत्रपक्वयवान्नभोजिनंभ्रातरं २८

ततोददर्शभगवानशोकवनिकाश्रमे क्षामांस्वविरहव्याधिंशिंशपामूलमास्थितां ३० रा
मःप्रियतमांभार्यांदीनांवीक्ष्यान्वकंपत ३१ आत्मसंदर्शनाह्लादविकसन्मुखपंकजां आ
रोप्यारुरुहेयानंभ्रातृभ्यांहनुमद्युतः ३२ विभीषणायभगवान्दत्वारक्षोगणेशतां लंकामायु
श्चकल्पांतंययौतीर्णव्रतःपुरीं आवकीर्यमाणःकुसुमैर्लोकपालार्पितैःपथि उपगीयमान
चरितःशतधृत्यादिभिर्मुदा ३३ गोमूत्रयावकंश्रुत्वाभ्रातरंवल्कलांबरं महाकारुणिकोऽत्त
प्यज्जटिलंस्थंडिलेशयं ३४ भरतःप्राप्तमाकर्ण्यपौरामात्यपुरोहितैः पादुकेशिरसिन्यस्य
रामंप्रत्युद्यतोग्रजं नंदिग्रामात्स्वशिबिराद्गीतवादित्रनिःस्वनैः ब्रह्मघोषेणचमुहुःपठद्भिर्ब्रह्म
वादिभिः स्वर्णकक्षपताकाभिर्हैमैश्चित्रध्वजैरथैः ॥

स्वशिबिरात्रामंविनाऽयोध्यामप्रविशन् स्वस्यवासंयत्रनिर्मितवान् तस्मात्सकाशाद्गीतादिभिर्युक्तोरामंप्रत्युद्यतः अ

भिमुखंययौब्रह्मघोषेणापूरिताघोषेणपटहैः स्व
र्णरसाक्ताः कक्षाः प्रीतायासांताभिः ॥

३६

स्क्तः क्षीणपुण्यः सुकृतीविमानादिव विमानात्पुष्पकान्न्यपतदितिवा २३ रक्षसस्त्रीणां विलापमा
ह ततइतिपंचभिः मंदंस्वल्पमुदरंयस्यास्तयारावणभार्य्ययासह २४ २५ परैरहिता २६ २७ गध्राणा

एवंक्षिपन्धनुषिसंदधितमुत्तमज्ञेवाराणंसवज्रमिवतंहृदयंविभेद सोऽसृग्वमनदशमु
खैन्न्यपतद्विमानाद्धाहेतिजल्पतिजनेसुकृतीवरिक्तः २३ ततोनिष्क्रम्यलंकायायातुधान्यःस
हस्रशः मंदोदर्य्यासमंतस्मिन्नरुदंत्यउपाद्रवन् २४ स्वान्स्वान्बंधून्परिष्वज्यलक्ष्मणेषुभिर
र्हितान् रुरुदुःसुस्वरंदीनाघ्नंत्यश्चात्मानमात्मना २५ हाहतास्मवयंनाथलोकरावणराव
ण कंयायाच्छरणंलंकात्वद्विहीनापराहिता २६ नवैवेदमहाभागभवान्कामवशंगतः ॥ तेजो
ऽनुभावंसीतायायेननीतोदशामिमां ॥ २७ ॥ कृतैषाविधवालंकावयंचकुलनंदन ॥ देहःकृतोन्नं
गध्राणामात्मानरकहेतवे ॥ २८ ॥ श्रीशुकउवाच ॥ स्वानांविभीषणश्चक्रेकोशलेंद्रानुमोदितः ॥ पितृ
मेधविधानेनयदुक्तंसांपरायिकम् ॥ २९ ॥
मन्नम भक्तः नरकहेतवेनरकभोगाय २८ सापरायिकम् और्द्धदैहिकम २९ रामरामरामरामराम ॥

भा०न०४३ गुरुपत्नीः कैकेय्याद्याः वयस्यानवरजांश्च ४४ ४२ वाशिष्ठाद्यैरभिषिंचत्यः शुचः शोकान् विजह्रुः
३७ भ्रात्राभिनंदितः सोपि सोत्सवां प्राविशत्पुरीं ४३ प्रविश्य राजभवनं गुरुपत्नीः स्वमातरं गुरूंश्च
वयस्यावरजान् पूजितः प्रत्यपूजयत् ४४ वैदेही लक्ष्मणश्चैव यथावत्समुपेयतुः ४५ पुत्रान्स्व
मातरस्तास्ताः प्राणांस्तन्वइवोत्थिताः आरोप्यांकेभिषिंचंत्यो वाष्पौघैर्विजह्रुः शुचः ४६ ज
टानिर्मुच्य विधिवत्कुलवृद्धैः समं गुरुः अभ्यषिंचद्यथैवेंद्रं चतुःसिंधुजलादिभिः ४७ एवं
कृतः शिरःस्नानः सुवासाः स्रग्व्यलंकृतः स्वलंकृतैः सुवासोभिर्भ्रातृभिर्भार्यया बभौ ४८ अ
गृह्णीदासनं भ्राता प्रणिपत्य प्रसादितः ४९ प्रजाः स्वधर्मनिरता वर्णाश्रमगुणान्विताः जुगो
प पितृवद्रामो मेनिरे पितरं च तं ५० त्रेतायां वर्त्तमानायां कालः कृतसमोभवत् रामेराज
निधर्मज्ञे सर्वभूतसुखावहे ५१ वनानि नद्यो गिरयो वर्षाणि द्वीपसिंधवः सर्वे कामदु
घा आसन्प्रजानां भरतर्षभ ५२

पत्ताकाभिः हैमैरितिचत्वारिरथविशेषणानि ३५ पारमेष्ठ्यानिराज्ञार्हाणि छत्रचामरादीनि प्रेम्णाप्रक्लिन्न
हृदयं ईक्षणे च नेत्रे यस्य ३६ नेत्रजैर्जलैः स्नापयन्नाश्लिष्यन् ये ऽर्हसत्तमाः कुलवृद्धास्तेभ्योपि नमनं चक्रे

सदश्वैरुक्मसन्नाहैर्भटैः पुरटवर्मभिः श्रेणीभिर्वीरमुख्याभिर्भृत्यैश्चैव पदानुगैः ३५ पारमे
ष्ठ्यान्युपादाय पण्यान्युच्चावचानि च पादयोर्न्यपतत्प्रेम्णा प्रक्लिन्नहृदयेक्षणः ३६ पादुके
न्यस्य पुरतः प्रांजलिर्बाष्पलोचनः ३७ तमाश्लिष्य चिरं दोर्भ्यां स्नापयन्नेत्रजैर्जलैः रामो लक्ष्म
णसीताभ्यां विप्रेभ्यो ये ऽर्हसत्तमाः तेभ्यः स्वयं नमश्चक्रे प्रजाभिश्च नमस्कृतः ३८ धुन्वंतु उत्त
रासंगान्पतिं वीक्ष्य चिरागतं म उत्तराः कोशला माल्यैः किरंतो ननृतुर्मुदा ३९ पादुके भरतो ऽ
गृह्णाच्चामरव्यजनोत्तमे विभीषणः ससुग्रीवः श्वेतच्छत्रं मरुत्सुतः ४० धनुर्निषंगाञ्छत्रु
घ्नः सीता तीर्थकमंडलुं अबिभ्रदंगदः खड्गं हैमं चर्मर्क्षराण्नृप ४१ पुष्पकस्थो ऽन्वितः स्त्री
भिः स्तूयमानश्च वंदिभिः विरेजे भगवान्राजन्ग्रहैश्चंद्र इवोदितः ४२

३८ ३९ अयोध्याप्रवेशप्रकारमाह पादुके इति सार्धैस्त्रिभिः ४० धनुश्च निषंगौ च तान् ४१ ४२

भा० न० ५ अप्रत्तमदत्तं विश्यप्रविश्य तमोऽज्ञानं हंसि ६ न्यस्तदण्डैर्मुनिभिरर्पितौ चित्ते न्यस्तावङ्घ्री यस्य तेष्वर्पितावं
३८ घ्री येनेतिवा ७ ८ ९ असंविदः अज्ञान

ते तु ब्रह्मण्यदेवस्य वात्सल्यं वीक्ष्य संस्तुतं प्रीताः क्लिन्नधियस्तस्मै प्रत्यर्प्येदं बभाषिरे ॥५॥ ब्राह्मणा ऊ
चुः अप्रत्तं नस्त्वया किं नु भगवन्भुवनेश्वर यन्नोन्तर्हृदयं विश्य तमो हंसि स्वरोचिषा ६ नमो ब्रह्मण्य
देवाय रामायाकुण्ठमेधसे उत्तमश्लोकधुर्य्याय न्यस्तदण्डार्पिताङ्घ्रये ७ कदाचिल्लोकजिज्ञासुर्गू
ढो रात्र्यामलक्षितः चरन्वाचोऽशृणोद्रामो भार्य्यामुद्दिश्य कस्यचित् ८ नाहं बिभर्मि त्वां दुष्टाम
सतीं परवेश्मगां स्त्रीलोभी बिभृयात्सीतां रामो नाहं भजे पुनः ९ इति लोकाद्बहुमुखाद्दुरारा
ध्यादसंविदः पत्या भीतेन सा त्यक्ता प्राप्ता प्राचेतसाश्रमं १० अन्तर्वत्न्यागते काले यमौ सा सुषुवे
सुतौ कुशो लव इति ख्यातौ तयोश्चक्रे क्रियां मुनिः ११ अङ्गदश्चित्रकेतुश्च लक्ष्मणस्यात्मजौ स्मृ
तौ तक्षः पुष्कल इत्यास्तां भरतस्य महीपते सुबाहुः श्रुतसेनश्च शत्रुघ्नस्य बभूवतुः १२

प्राचेतसो वाल्मीकिस्तस्याश्रमं प्राप्ता १० अन्तर्वत्नी गर्भिणी सती क्रियाजातकर्माद्याः ११ १२ रामरम ३८

५३॥५४॥५५॥इतिश्रीनवमेदशमः १०॥ततस्त्वेकादशेऽयोध्यामावसन्ननुजैः सह॥यज्ञादियज्ञकारेशोरामस्तद

नाधिव्याधिजराग्लानिदुःखशोकभयक्लमाः॥मृत्युश्चानिच्छतांनासीद्रामेराजन्यधोक्षजे॥५३॥
एकपत्नीव्रतधरोराजर्षिचरितःशुचिः॥स्वधर्मंगृहमेधीयंशिक्षयन्स्वयमाचरत्॥५४॥प्रेम्णा
नुवृत्त्याशीलेनप्रश्रयावनतासती॥धियाह्रियाचभावज्ञाभर्तुःसीताहरन्मनः॥५५॥इतिश्रीम
द्भागवतेमहापुराणेनवमस्कंधेश्रीरामानुचरितेदशमोध्यायः॥१०॥श्रीशुकउवाच॥भगवा
नात्मनात्मानंरामउत्तमकल्पकैः सर्वदेवमयंदेवमीजआचार्यवान्मखैः १ होत्रेऽददाद्दिशंप्रा
चींब्रह्मणेदक्षिणांप्रभुः अध्वर्यवेप्रतीचींचउदीचींसामगायसः २ आचार्यायददौशेषांयाव
तीभूस्तदंतरा मन्यमानइदंकृत्स्नंब्राह्मणोर्हतिनिःस्पृहः ३ इत्ययंतदलंकारवासोभ्यामव
शेषितः तथाराज्ञ्यपिवैदेहीसौमंगल्यावशेषिता ४

नुवर्णिते १ २ तदंतरातासांदिशांमध्येयावतीभूः तां
ब्राह्मणएवार्हतीतिमन्यमानः ३ अयंश्रीरामः तत्तदासौमंगल्यमाभरणादिकं तावन्मात्रमवशेषितंयस्याः

सातद्व्यतिरिक्तंहिरण्यादिसर्वंददावित्यर्थः ४

भा०न० एवंविधं लीलाप्रयोजनं दर्शयन् प्रणमति यस्येति यशः नृपाणां युधिष्ठिरादीनां सदस्सु ऋषयो मार्कंडेयादयो
३६ गायंति. दिगिभेंद्राणां पटस्त्वदाभरणरूपं तत्पर्यंतं व्याप्तमित्यर्थः नाकपालाः देवाः वसुपालाश्च वसुधापा
लास्तेषां किरीटैर्जुष्टं पादांबुजं यस्य तं रघुपति पागेतरे तत्रस्य रघुपतेर्जुष्टं पादांबुजं प्रपद्यइत्यर्थः २१ सरामः

यस्यामलं नृपसदस्सु यशोऽधुनाऽपि गायंत्यघघ्नमृषयो दिगिभेंद्रपट्टं तं नाकपालवसुपा
लकिरीटजुष्टपादांबुजं रघुपतिं शरणं प्रपद्ये २१ सयैः स्पृष्टोऽभिदृष्टो वा संविष्टोऽनुगतोपि वा
कोशलास्ते ययुः स्थानं यत्र गच्छंति योगिनः २२ पुरुषो रामचरितं श्रवणैरुपधारयन् आनृश
राम स्यपरो राजन् कर्मबंधैर्विमुच्यते ॥२३॥ राजोवाच ॥ कथं स भगवान् रामो भ्रातॄन्वा स्वयमात्मनः
तस्मिन्वा ते न्ववर्तंत प्रजाः पौराश्च ईश्वरे २४ श्रीबादरायणिरुवाच ॥ अथादिशद्दिग्विजये
भ्रातॄंस्त्रिभुवनेश्वरः आत्मानं दर्शयन्स्वानां पुरीमैक्षत सानुगः ॥

संविष्टः उपवेशितः अनुगतो वा यैः ते कोशलदेशवासिनः सर्वे पि यत्र योगिनो गच्छंति तत्स्थानं ययुः २२ आ
नृशंस्यपरः उपशमनिष्ठः सन् विमुच्यते २३ स रामः स्वयं कथमवर्तत भ्रातॄन्प्रति वा कथमवर्तत कथं भ्रता
न् आत्मनः आत्मांशभूतान् तस्मिन्वा ईश्वरे ते भ्रात्रादयः कथं नु अनंतरं कथमवर्तंतेति प्रश्नत्रयं २४ अत्र श्रीरा

मस्य भ्रात्रादिषु वृत्तिप्रकारमाह अथेति अथाभि
३६ षासनस्वीकारानंतरं अनेनैव भ्रातॄणामपि तदा ॥

१३ १४ १५ ईश्वरोपिशुचोरोद्धुंनाशक्नोत १६ नचात्रविचित्रमेतदित्याह स्त्रीपुंसोःप्रसंगः आसक्तिःत्रासमा
वहतीतितथाविभक्तेरलुक् आर्षः पाठांतरेसुगमं किमुतेत्यप्रासंगिकोक्तिः १७ अग्निहोत्रमजुहोत् १८ आत्म

गंधर्वान्कोटिशोजघ्नेभरतोविजयेदिशां तदीयंधनमानीयसर्वंराज्ञेन्यवेदयत् १३ शत्रु
घ्नश्चमधोःपुत्रंलवणंनामराक्षसं हत्वामधुवनेचक्रेमथुरांनामवैपुरीं १४ मुनौनिक्षिप्यतन
यौसीताभर्त्राविवासिता ध्यायंतीरामचरणौविवरंप्रविवेशह १५ तच्छ्रुत्वाभगवान्रामोरुंधन्न
पिधियाशुचः स्मरंस्तस्यागुणांस्तांस्तान्नाशक्नोद्रोद्धुमीश्वरः १६ स्त्रीपुंप्रसंगएतादृक्सर्वत्र
त्रासमावहः अपीश्वराणांकिमुतग्राम्यस्यगृहचेतसः १७ ततऊर्ध्वंब्रह्मचर्यंधारयन्नजुहोत्प्र
भुः त्रयोदशाब्दसाहस्रमग्निहोत्रमखंडितं १८ स्मरतांहृदिविन्यस्यविद्धंदंडककंटकैः स्वपादपल्ल
वंरामआत्मज्योतिरगात्ततः १९ नेदंयशोरघुपतेःसुरयाच्ञयात्तलीलातनोरधिकसाम्यविमुक्तधाम्नः
रक्षोवधोजलधिबंधनमस्त्रपूगैःकिंतस्यशत्रुहननेकपयःसहायाः २०

ज्योतिर्निजंधाम १९ जलधिबंधनमस्त्रपूगैः
अरक्षसांवधइतीदंकविभिराश्चर्यमिववर्णितमपियशः स्तुतिर्नभवति तत्रहेतुः अधिकसाम्याभ्यांविमुक्तंधा

मप्रभावोयस्यतस्यकिंकपयःसाहाय्याः अतःसुग्रीवाद्या
अपयशोयथालीलामात्रंतथैवेदमपियुक्तंचेतत्तदित्या
हसुरयाचयाचञया आत्तास्वीकृतालीलार्थातनुर्येन २०

भा॰ न॰ ४० वासःसांमणिगणानांच अंशुकैर्दीप्तिभिः चित्रं चैतन्यं तद्वदुल्लासैरुज्ज्वलैः यद्वा चिदिति क्वचित्क्वचिद्वैदू
र्यस्तंभादिषु यथाशोभमुज्ज्वलैर्मुक्ताफलैर्मंडिताइत्यर्थः कांताः कमनीयाः कामोपपत्तयोभोगसाधनानिताभिः

स्थलैर्मारकतैः स्वच्छैर्भ्राजत्स्फटिकभित्तिभिः चित्रस्रग्भिः पट्टिकाभिर्वासोमणिगणांशुकैः
मुक्ताफलैश्चिदुल्लासैः कांतकामोपपत्तिभिः धूपदीपैः सुरभिभिर्मंडितं पुष्पमंडनैः स्त्रीपुं
भिः सुरसंकाशैर्जुष्टं भूषणभूषणैः तस्मिन्स भगवान्रामः स्निग्धया प्रियये ष्टया रेमे स्वा
रामधीराणामृषभः सीतया किल ॥२८॥ बुभुजे च यथाकालं कामान्धर्ममपीडयन् व
र्षपूगान्बहून्नॄणामभिध्याताङ्घ्रिपल्लवः २९॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे ए
कादशोध्यायः ॥११॥ श्रीशुक उवाच ॥ कुशस्य चातिथिस्तस्मान्निषधस्तत्सुतो नभः पुंडरी
रीकोथ तत्पुत्रः क्षेमधन्वाभवत्ततः १

नृषणानां भूषणभूतः २८ नृणांमध्येयद्वानभिध्याततमंघ्रिपल्लवं यस्येति ॥२९॥ इति नवमेएकादशः ॥११॥ टि॰ श्रीः ८
द्वादशेरामपुत्रस्य कुशस्यान्वय उच्यते एवमिक्ष्वाकुपुत्रस्य शशादस्येरितोन्वयः ॥ कुशस्य श्रीरामपुत्रस्या ४०

त्तानुसारितया रत्निरुक्ता पुरीं वर्णयति त्रिभिः गंधोदकैर्मदबिंदुभिश्च आसिक्ता मार्गा यस्यां सुतराम
तामिव समृद्धां वेति वितर्के पाठांतरे नातितरां कामोन्मत्तां गामिवेत्यर्थः २५ पौराणां तस्मिन् रतिमाह
तमुपेयुरिति वराहरूपेण त्वयोद्धृतामिमां पृथ्वीं पाहीति २६ प्रजानां तस्मिन् रतिमाह ततः प्रजा इति २७

आसिक्तमार्गां गंधोदैः करिणां मदशीकरैः स्वामिनं प्राप्तमालोक्य मत्तां वा सुतरामिव
प्रासादगोपुरसभाचैत्यदेवगृहादिषु विन्यस्तहेमकलशैः पताकाभिश्च मंडितां शृंगैः
सचंद्ररश्मिभिः पट्टिकाभिः सुवाससं आदर्शैरंशुकैः स्रग्भिः कृतकौतुकतोरणां २५ त
मुपेयुस्तत्र तत्र पौरा अर्हणपाणयः आशिषो युयुजुर्देव पाहीमां प्राक् त्वयोद्धृतां २६ ततः
प्रजा वीक्ष्य पतिं चिरागतं दिदृक्षयोत्सृष्टगृहाः स्त्रियो नराः आरुह्य हर्म्याण्यरविंदलोचन
मतृप्तनेत्राः कुसुमैरवाकिरन् २७ अथ प्रविष्टः स्वगृहं जुष्टं स्वैः पूर्वराजभिः अनंताखि
ललोकाढ्यमनर्घ्योरुपरिच्छदम् विद्रुमोदुंबरद्वारैर्वैडूर्यस्तंभपंक्तिभिः ॥

स्वयं कृष्णमवर्त्तेत तस्योत्तरमाह अथेति यावत्समाप्ति स्वगृहं प्रविष्टः सन् तस्मिन् रेमे इति पंचमेनान्वयः
गृहं वर्णयति सार्द्धैस्त्रिभिः अनंताये अखिलारत्नादीनां कोशास्तैराढ्यं अनर्घ्योरवः परिच्छदा यस्मिन् विद्रुम
ध्यो॥

मयात्दुंबरादेरदल्यायेषु तेह्यरैः स्वच्छैः स्थलैस्तत्री
यातानां मंडितं इति तृतीयेनान्वयः ॥

भा०न० १० ११ १२ तत्तस्मादमित्रजित् १३ १४ १५ निष्ठां वंशस्य स्थिति तस्यात्र्यंतः १६ तदेवाह इक्ष्वाकूणामि

४१

बृहद्बलस्य भविता पुत्रो नाम्ना बृहद्रणः उरुक्रियस्ततस्तस्य वत्सवृद्धो भविष्यति १० प्र
तिव्योमस्ततो भानुर्दिवाको वाहिनीपतिः सहदेवस्ततो वीरो बृहदश्वोथ भानुमान् ११ प्रती
काश्वो भानुमतः सुप्रतीकोथ तत्सुतः भविता मरुदेवोथ सुनक्षत्रोथ पुष्करः १२ तस्यांतरी
क्षस्तत्पुत्रः सुतपास्तदमित्रजित् बृहद्भानुः सुतस्तस्य बर्हिस्तस्मात्कृतंजयः १३ रणंजय
स्तस्य सुतः संजयो भविता ततः तस्माच्छाक्योथ शुद्धोदो लांगलस्तत्सुतः स्मृतः १४ ततः प्र
सेनजित्तस्मात् क्षुद्रको भविता ततः कुनको भविता तस्मात्सुरथस्तनयस्ततः १५ सुमित्रो
नाम निष्ठांत एते वार्हद्बलान्वयाः १६ इक्ष्वाकूणामयं वंशः सुमित्रांतो भविष्यति यतस्तं प्रा
ऐ ३ प्य राजानं संस्थां प्राप्स्यति वै कलौ ॥१७॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे श्रीरामवंशानुकी
र्तने द्वादशोऽध्यायः ॥१२॥ श्रीशुक उवाच ॥ निमिरिक्ष्वाकुतनयो वसिष्ठमवृतर्त्विजं ॥ आरभ्य सत्रं सोऽप्याह
शक्रेण प्रागवृतोस्मि भोः ॥१॥

ति ॥१७॥ इति नवमे द्वादशो ॥१२॥ इक्ष्वाकोरेव पुत्रस्य निमेर्वंशस्त्रयोदशे ॥ वर्ण्यंते जज्ञिरे यत्र ब्रह्मज्ञा जनकादयः निमे

अर्के संभवः अर्कस्यांशात्संभूतः २ ३ हिरण्यनाभः कथंभूतः जैमिनिः शिष्यो योगाचार्य्यस्तदाह यतः
सकाशात्कौशल्यो याज्ञवल्क्य ऋषिराध्यात्मं योगमध्यगात् महांतमुदयं सिद्धयो यस्मिन् तं हृदयग्रंथि

देवानीकस्ततो हीनः पारिपात्रोथ तत्सुतः ततो बलः स्थलस्तस्माद्वज्रनाभोऽर्कसंभवः २
खगणस्तत्सुतस्तस्माद्विधृतिश्चाभवत्सुतः ३ ततो हिरण्यनाभोभूद्योगाचार्य्यस्तु जैमिनेः
शिष्यः कौशल्य आध्यात्मं याज्ञवल्क्योध्यगाद्यतः योगं महोदयमृषिर्हृदयग्रंथिभेदकं
४ पुष्यो हिरण्यनाभस्य ध्रुवसंधिस्ततोभवत् सुदर्शनोथाग्निवर्णः शीघ्रस्तस्य मरुः सु
तः ५ योसावास्ते योगसिद्धः कलापग्राममाश्रितः कलेरंते सूर्यवंशं नष्टं भावयिता पुनः ६
तस्मात्प्रसुश्रुतस्तस्य संधिस्तस्याप्यमर्षणः महस्वांस्तत्सुतस्तस्माद्विश्वबाहुरजायत ७ ते
तः प्रसेनजित्तस्मात्तक्षको भविता सुतः ततो बृहद्बलो यस्तु पित्रा ते समरे हतः ८ एते हीक्ष्वाकुभू
पाला अतीताः शृण्वनागताः ९

भेदकं च ४ ५ मरुं विशिनष्टि योऽसाविति पुनर्भावयिता भावयिष्यति ६ ७ पित्रा अभिमन्युना ८ ९

१० निमिं विदेह एव सन्तु उष्यतां वसतु कामं यथेष्टं एवं सति युष्माभिः प्रार्थितं जीवितमस्य भविष्यति न च देह
बंध इति भावः सर्वत्राध्यात्मसंस्थितो लोचनयोः स्थितः सन् उन्मेषणनिमेषाभ्यां तत्र वर्त्तकत्वेन लक्षितो व

देहं नावरुरुत्सेऽहं दुःखशोकभयावहं सर्वत्रास्य यतो मृत्युर्मत्स्यानामुदके यथा ॥१०॥ देवा
ऊचुः ॥ विदेह उष्यतां कामं लोचनेषु शरीरिणां उन्मेषणनिमेषाभ्यां लक्षितोऽध्यात्मसंस्थितः
११ अराजकभयं नॄणां मन्यमाना महर्षयः देहं ममंथुस्स्म निमेः कुमारः समजायत १२
जन्मना जनकः सोऽभूद्वैदेहस्तु विदेहजः मिथिलो मथनाज्जातो मिथिला येन निर्मिता १३
तस्मादुदावसुस्तस्य पुत्रोऽभून्नंदिवर्द्धनः ततः सुकेतुस्तस्यापि देवरातो महीपते १४ तस्मा
द्बृहद्रथस्तस्य महावीर्यः सुधृत्पिता सुधृतेर्धृष्टकेतुर्वै हर्यश्वोऽथ मरुस्ततः १५ मरोः प्र
तीपकस्तस्माज्जातः कृतिरथो यतः देवमीढस्तस्य सुतो विश्रुतोऽथ महाधृतिः १६

र्त्तेरन्निति शेषः ११ तदेवमृतादपि निमेर्देहाद्वंशप्रवृत्तिं दर्शयति अराजकभयमिति १२ तस्यान्वर्थानि त्रीणि नामा
न्याह जन्मनेति असाधारणेन जननेन एव जनकः यद्वा स्वदेहद्वारा जनकत्वात् निमिः जनकोऽभूदित्यर्थः मिथिला
येन निर्मितेत्यनेन व्युत्पत्त्यन्तरमप्युक्तं १३ १४ सुधृत् सुधृतिस्तस्य पिता १५ १६

प्र १

तंक्रस्यमखंनिर्वर्त्यप्रतिपालयः प्रतीक्षस्वेति गृहपतिर्निमिः २ इदंजीवितंचलमस्थिरंविद्वान् ३ इंद्रस्यम
मखंनिवर्त्ययोगतोगुरुः शिष्यस्यव्यतिक्रममन्यायंवीक्ष्यनिमेर्देहः पतत्वित्यशपत् ४ ५ उर्वशीदर्शनात्क

तंनिवर्त्ययोगमिच्छामितावन्मांपरिपालय तत्सीमासीद्गृहपतिःसोपीन्द्रस्याकरोन्मखं २ निमि
श्चलमिदंविदन्सत्रमारभतात्मवान् ऋत्विग्भिरपरैस्तावन्नागमद्यावतागुरुः ३ शिष्यव्यति
क्रमंवीक्ष्यनिर्वर्त्यगुरुरागतः अशपत्पततोद्देहोनिमेः पंडितमानिनः ४ निमिःप्रतिददौशा
पंगुरवेधर्मवर्जिने तवापिपततादेहोलोभाद्धर्ममजानतः ५ इत्युत्ससर्जस्वंदेहंनिमिर
ध्यात्मकोविदः मित्रावरुणयोर्जज्ञेउर्वश्यांप्रपितामहः ६ गंधवस्तुषुतद्देहंनिधायमुनिस
त्तमाः समाप्तेसत्रयागेऽथदेवानूचुःसमागतान् ७ राज्ञोजीवतुदेहोयंप्रसन्नाःप्रभवोयदि
तथेत्युक्तेनिमिःप्राहमाभून्मेदेहबंधनं ८ यस्ययोगंनवांछंतिवियोगभयकातराः भ
जंतिचरणांभोजंमुनयोहरिमेधसः ९

न्नेरेतस्ताभ्यांकुंभेनिषिक्तं तस्मात्प्रपितामहोवसिष्ठोजज्ञे तदाहमित्रावरुणयोरिति तथाचश्रुतिः कुंभे
रेतःसिषिचतुःसमानमिति ६ ७ यदिप्रसन्नाःप्रभवःसमर्थास्तर्हिजीवत्वित्यूचतुः मुनयोयस्यदेह
स्ययोगंनवांछंति अपितुमोक्षायैवभजंति ९

प्र ३

भा० न० योगेश्वरा याज्ञवल्क्यादयस्तेषां प्रसादेन ॥२७॥ इति नवमे त्रयोदशः ॥१३॥ चतुर्दशादिभिः सोमवंशमाहस-
६३ समाप्तिः यस्मिन्नैलादयो भूपाः कीर्त्यंते पुण्यकीर्तयः चतुर्दशे गुरोः पत्न्यां तारायां सोमजो बुधः

एते वै मैथिला राजन्नात्मविद्याविशारदाः ॥ योगेश्वरप्रसादेन द्वंद्वैर्मुक्ता गृहेष्वपि ॥२७॥
इति श्रीमद्भागवते महापुराणे नवमस्कंधे सूर्यवंशानुकीर्तने त्रयोदशोऽध्यायः ॥१३॥ श्रीशुक
उवाच ॥ अथातः श्रूयतां राजन्वंशः सोमस्य पावनः यस्मिन्नैलादयो भूपाः कीर्त्यंते पु
ण्यकीर्तयः १ सहस्रशिरसः पुंसो नाभिह्रदसरोरुहात् जातस्यासीत्सुतो धातुरत्रिः
पितृसमो गुणैः २ तस्य दृग्भ्योऽभवत्पुत्रः सोमोऽमृतमयः किल विप्रौषध्युडुगा
णां ब्रह्मणा कल्पितः पतिः ३ सोऽयजद्राजसूयेन विजित्य भुवनत्रयं पत्नीं बृह
स्पतेर्दर्पात्तारां नामाहरद्बलात् ४ यदा स देवगुरुणा याचितोऽभीक्ष्णशो मदात्तो
नात्यजत्तत्कृते यज्ञे सुरदानवविग्रहं ५

त्र जातस्त्वैलः षड्वंश्यामायुर्मुख्यानजीजनत् १ २ दृग्भ्य आनंदाश्रुभ्यः अत एवामृतमयः किले
ति आश्चर्ये पाठांतरे दर्शनत्वात् वक्ष्यमाणादेर्यस्यमाह विप्रेति ३ सोमपुत्रो बुध इति कथा हरिणा

इह पत्नीमिति सार्द्धैर्नवभिः ४ तत्कृतेन त्रिभिः ५

६३

१७॥१८॥१९॥ २०॥२१॥ तस्य केशिध्वजस्य भानुमान् ॥२२॥ तत्तस्मात् सुपार्श्वकः ॥२३॥२४॥ अ

कृतिरातस्ततस्तस्मान्महारोमोथतत्सुतः स्वर्णरोमासुतस्तस्य ह्रस्वरोमाव्यजायत १७ ततःसीर
ध्वजोजज्ञेयज्ञार्थंकर्षतोमहीं सीतासीराग्रतोजातास्तस्मात्सीरध्वजःस्मृतः १८ कुशध्वजस्त
स्यपुत्रस्ततोधर्मध्वजोनृप धर्मध्वजस्यद्वौपुत्रौकृतध्वजमितध्वजौ १९ कृतध्वजात्केशिध्व
कृ४ जःखांडिकस्तुमितध्वजात् २० तध्वजसुतोराजन्नात्मविद्याविशारदः खांडिक्यःकर्मतत्त्वज्ञोभी
तःकेशिध्वजाद्द्रुतः २१ भानुमांस्तस्यपुत्रोभूच्छतद्युम्नस्तुतत्सुतः शुचिस्तत्तनयस्तस्मात्स
नद्वाजस्ततोभवत् २२ ऊर्ध्वकेतुःसनद्वाजादजोऽथपुरुजित्सुतः अरिष्टनेमिस्तस्यापिश्रु
तायुस्तत्सुपार्श्वकः २३ ततश्चित्ररथोयस्य क्षेमाधिर्मिथिलाधिपः तस्मात्समरथस्तस्य
सुतःसत्यरथस्ततः २४ आसीदुपगुरुस्तस्मादुपगुप्तोऽग्निसंभवः वस्वनंतोऽथतत्पुत्रो
युयुधोयत्सुभाषणः २५ श्रुतस्ततोजयस्तस्माद्विजयोऽस्मादृतःसुतः शुनकस्तत्सुतो
जज्ञेवीतहव्योधृतिस्ततः २६ बहुलाश्वोधृतेस्तस्य कृतिरस्यमहावशीः २७

ग्निसंभवः अग्नेरंशात्संभृतः युयुधस्मात्सुभाषणः २५ २६ २७ रामरामरामरामरामरामरान

भा० नं० ४४

रहं एकांते १३ १४ १५ पुरूरवसः उर्वश्यामायुःप्रमुखाः षट्पुत्रा जाता इति वक्तुं कथामाह तस्येत्यादिना

ब्रह्मातां रह आहूय समप्राक्षीच्च सांत्वयन् सोमस्येत्याह शनकैः सोमस्तं तावदग्रहीत् १३ त
स्यात्मयोनिरकृत बुध इत्यभिधां नृप बुद्ध्या गंभीरया येन पुत्रेणापोडुराण्मुदं १४ ततः पु
रूरवा जज्ञे इलायां य उदाहृतः १५ तस्य रूपगुणौदार्यशीलद्रविणविक्रमान् श्रुत्वोर्वशी
न्द्रभवने गीयमानान्सुरर्षिणा १६ तदंतिकमुपेयाय देवी स्मरशरार्दिता मित्रावरुणयोः
शापादापन्ना नरलोकतां ॥ निशम्य पुरुषश्रेष्ठं कंदर्पमिव रूपिणं धृतिं विष्टभ्य ललना उपत
स्थे तदंतिके ॥१७॥ स तां विलोक्य नृपतिर्हर्षेणोत्फुल्ललोचनः ॥ उवाच श्लक्ष्णया वाचा देवीं हृ
ष्टतनूरुहः ॥१८॥ पुरूरवा उवाच ॥ स्वागतं ते वरारोहे आस्यतां करवाम किं संरमस्व मया सा
कं रतिर्नौ शाश्वतीः समाः ॥१९॥

यावत्समाप्तिः १६ ननु देवी कथं मनुष्यस्यांतिकमुप
गच्छेत् तत्राह मित्रावरुणयोः शापान्नरलोकतां मनुष्यभावमापन्ना सती १७ १८ नौ आवयो रति

४४

(दृग्भ्यः आनंदाश्रुभ्यः अतएवामृतमयः किलेति आश्चर्ये सुः)) सुराणांदानवानांचविग्रहेकारणमाह शुक्रे
इति असुरैस्सहितउडुपमग्रहीदित्यर्थः संधिरार्षः गुरोःसुतंवृहस्पतिमग्रहीत् ६ अंगिरसःसकाशात्प्रा

शुक्रोवृहस्पतेर्द्वेषादग्रहीत्सासुरोडुपं हरोगुरुसुतंस्नेहात्सर्वभूतगणावृतः ६ सर्वदे
वगणोपेतोमहेंद्रोगुरुमन्वयात् सुरासुरोविनाशोऽभूत्समरस्तारकामयः ७ निवेदितोऽङ्गो
ऽङ्गिरसासोमंनिर्भर्त्स्यविश्वकृत् तारांस्वभर्त्रेप्रायच्छदंतर्वत्नीमवैत्यपि ८ त्यजत्यजाशुदुष्प्र
ज्ञेमत्क्षेत्रादाहितंपरैः नाहंत्वांभस्मसात्कुर्यांस्त्रियंसांतानिकोऽसति ९ तत्याजव्रीडितातारा
अ५ कुमारंकनकप्रभं स्पृहामांगिरसश्चक्रेकुमारेसोमएवच १० ममायंनतवेत्युच्चैस्तस्मिन्विवद
मानयोः पप्रच्छुरृषयो देवानैवोचेव्रीडितातुसा ११ कुमारोमातरंप्राहकुपितोऽलीकल
ज्जया किंनवोचस्यसद्वृत्तेआत्मावद्यंवदाशुमे १२

प्रविद्धोहरइतिप्रसिद्धः ७ निवेदितोविज्ञापि
तः विश्वकृत्ब्रह्मा अवैत् अबुध्यत ८ वृहस्पतिराह त्यजत्यजेति परैराहितंगर्भं गर्भे त्वत्कृते भस्मीकरिष्य
तीतिबिभ्यतींप्रत्याह नाहमि सांतानिकः संतानार्थी सांतानिके इतिपाठे हे असति त्वमित्यर्थः ९ १० ११ १२

सद्मंमम २६ महारात्रे मध्यरात्रे महानिशाद्वेघटिके रात्रेर्मध्यमयोरितिस्मृतेः २७ जिगमिषोस्तस्याः परुषोक्ति
ऋ० न० माह हतास्मीति साह्येन नपुंसा नपुंसकेन यथा नारी तथात्रस्तः शेते २८ विद्युतः विशिष्टद्युतिमंतः व्यद्यो
४५

अपश्यन्नुर्वशीमिंद्रो गंधर्वाख्यमचोदयत् उर्वशीरहितं मह्यं मास्थानं नातिशोभने २६ ते
उपेत्य महारात्रे तमसि प्रत्युपस्थिते उर्वश्या उरणौ जह्रुर्न्यस्तौ राजनि जायया २७ निशम्या
क्रंदितं देवी पुत्रयोर्नीयमानयोः हतास्म्यहं कुनाथेन नपुंसा वीरमानिना यद्विस्रंभादहं
नष्टा हृतापत्या च दस्युभिः यः शेते निशि संत्रस्तो यथा नारी दिवा पुमान् इति वाक्सायकै
र्विद्धः प्रतोत्रैरिव कुंजरः निशि निस्त्रिंशमादाय विवस्त्रोऽभ्यद्रवद्रुषा २८ ते विसृज्योरणौ
तत्र व्यद्योतंत स्म विद्युतः आदाय मेषावायांतं नग्नमैक्षत सा पतिं २९ ऐलोऽपि शयने
जायामपश्यन्विमना इव तच्चित्तो विक्लवः शोचन्बभ्रामोन्मत्तवन्महीं ३०

तेनदीप्तिमकुर्वतः यद्वा तदैव तः प्रकाशंति स्मेत्यर्थः नग्नमैक्षत अतो भार्याभंगान्निर्जगा
मेतिज्ञेयम् २९ ३० ॥ ४५

यस्य तवांकांतरं वक्ष आसाद्य रिरंसया रंतुमिच्छया ह स्फुटं न च्यवते नापयाति यद्यस्मादिति वा २० शापा
वसाने भाषाभंगमिषेण जिगमिषोस्तस्या भाषाबंधमाह एतावितिद्वाभ्यां उरणकौ मेषौ न्यासो निक्षेपरू

उर्वश्युवाच ॥ कस्यास्त्वयि न सज्जेत मनो दृष्टिश्च सुंदर यदंगांतरमासाद्य च्यवते ह रिरंसया २०
एतावुरणकौ राजन् न्यासौ रक्षस्व मानद संरंस्ये भवता साकं श्लाघ्यः स्त्रीणां वरः स्मृतः २१ घृतं मे वी
र भक्ष्यं स्यान्नेक्षे त्वान्यत्र मैथुनात् विवाससं तत्तथे ति प्रतिपेदे महामनाः २२ अहो रूपमहो
भावो नरलोकविमोहनं को न सेवेत मनुजो देवीं त्वां स्वयमागतां २३ तया स पुरुषश्रेष्ठो रमय
न्त्या यथार्हतः रेमे सुरविहारेषु कामं चैत्ररथादिषु २४ रममाणस्तया देव्या पद्मकिंजल्क
गंधया तन्मुखामोदमुषितो मुमुदेऽहर्गणान्बहून् २५

पौरुषाय श्लाघ्यः स एव स्त्रीणां वरः स्मृतः अतो विजातीयत्वेन दोष इति भावः २१ हे वीर घृतं भक्ष्यं स्यात् अ
मृतं वा आज्यमिति श्रुतेर्देवानां चामृताशित्वात् मैथुनादन्यत्र विवाससं त्वां नेक्षिष्ये इति प्रतिपेदे अंगीकृतवा
न् २२ तदेवाह अहो इति २३ २४ पद्मकिंजल्कस्य गंध इव गंधो यस्यास्तस्या मुखामोदेन मुषितः प्रलोभितः

तं सांत्वयति संवत्सरांतरति ३६ अपराणीतिवचनादंतर्वत्नीमुपालक्ष्य ३७ ३८ ३९ अनेनाग्निनाक
र्मकृत्वा तद्द्वारोर्वशीं प्राप्स्यतीत्यभिप्रायेणाग्निस्थालीं ददुः सतु तां स्थालीमेवोर्वशीं मन्यमानस्तया सहितो
वने विचरन् नेयमुर्वशी किंत्वग्निस्थालीत्यबुध्यत ४० ततश्च तां स्थालीं वने स्थापयित्वा गृहान् गत्वा नित्यं त

संवत्सरांते हि भवानेकरात्रं मयेश्वरः वत्स्यत्यपत्यानि च ते भविष्यंत्यपराणि भोः ३६ अंतर्वत्नी
मुपालक्ष्य देवीं स प्रययौ पुरीं ३७ पुनस्तत्र गतोऽब्दांते उर्वशीं वीरमातरं उपलभ्य मुदा युक्तः समु
वास तया निशां ३८ अथैनमुर्वशी प्राह कृपणं विरहातुरं गंधर्वानुपधावेमांस्तुभ्यं दास्यंति मामि
ति ३९ तस्य संस्तुवतस्तुष्टा अग्निस्थालीं ददुर्नृप उर्वशीं मन्यमानस्तां सोऽबुध्यत चरन्वने ४०
स्थालीं न्यस्य वने गत्वा गृहानाध्यायतो निशि त्रेतायां संप्रवृत्तायां मनसि त्रय्यवर्त्तत ४१ स्थाली
स्थानं गतोऽश्वत्थं शमीगर्भं विलक्ष्य सः तेन द्वे अरणी कृत्वा उर्वशीलोककाम्यया ॥

मेव ध्यायतस्तस्य मनसि त्रेतायां त्रयी प्रवर्त्तत कर्मबोधकं वेदत्रयं प्रादुरभूत् ४१ ततः स्थालीस्थानं
गतः सन् सम्यागर्भे जातमश्वत्थं विलक्ष्य अस्मिन्नसावग्निरस्तीति विशेषेण लक्षयित्वा तेनाश्वत्थे
न द्वे अरणी कृत्वाऽग्निं ममंथेति शेषः शमीगर्भादग्निं मथंतीति श्रुतेः ॥ ऽऽ ॥ ऽऽ ॥ ऽऽ ॥

तस्याः सखीश्च पंच वीक्ष्य सूक्तं शोभनवचनं अहो जायेत्यादि ३१ तदेवार्थत आह अहो इति द्वाभ्यां अनि
र्वृत्य सत्कृत्तां निर्वृतिमप्राप्य पाठांतरे मां निर्वृतिमगमयित्वा मंत्राननुक्त्वेति वा वचांसि कृणवामहै गोष्ठि
करवामहै ३२ सुदेहोऽतिकमनीयोऽयं मम देहः ३३ पुरूरवा मा मृथा इत्यादि तस्याः सूक्तं तदप्यर्थत आह

स तां वीक्ष्य कुरुक्षेत्रे सरस्वत्यां च तत्सखीः पंच प्रहृष्टवदनाः प्राह सूक्तं पुरूरवाः ॥३१॥ अहो जा
ये तिष्ठ तिष्ठ घोरे न त्यक्तुमर्हसि मां त्वमद्याप्यनिर्वृत्य वचांसि कृणवामहै ॥३२॥ सुदेहोऽयं पत
त्यत्र देवि दूरं हृतस्त्वया खादंत्येनं वृका गृध्रास्त्वत्प्रसादस्य नास्पदं ३३ ॥उर्वश्युवाच॥ मा मृथाः
पुरुषोसि त्वं मा स्म त्वाद्युर्वृका इमे क्वापि सख्यं न वै स्त्रीणां वृकाणां हृदयं यथा ॥३४॥ स्त्रियो ह्यकरु
णाः क्रूरा दुर्मर्षाः प्रियसाहसाः घ्नंत्यल्पार्थेपि विस्रब्धं पतिं भ्रातरमप्युत ॥ विधायालीकविस्रं
भमज्ञेषु त्यक्तसौहृदाः नवं नवमभीप्संत्यः पुंश्चल्यः स्वैरवृत्तयः ॥३५॥

मा मृथा इति चतुर्भिः मा म्रियस्व पुरुषोऽसि अतो धैर्यमावहेति भावः इमे वृकाः प्रसिद्धाः इंद्रियाणि
वा त्वेति त्वां मा स्म अद्युर्भक्षयेयुः इंद्रियवश्यो मा भवेत्यर्थः ३४ प्रिये निमित्ते साहसं येषां ताः ३५ ॥ ८८ ॥

भा० न० इति नवमे चतुर्दशः ॥१४॥ ततः पंचदशे गाधिरैलपुत्रान्वयेऽजनि ॥ यज्ञोऽहित्र सुतो रामः कार्त्तवीर्यमहन्नृपा ॥१॥ सुग्रह
६७ त्वायश्रल्यादिके मेरणश्रुतायुप्रभृतिषु सोवंशुनाह ॥ श्रुतायोरित्यादिना ॥ एकः एकसंज्ञः ॥ श्रमितः ॥ श्रमितसंज्ञः २

इति श्रीमद्भागवते महापुराणे नवमस्कंधे टीकायां चतुर्दशोऽध्यायः ॥१४॥ श्रीशुक उवाच ॥ ऐलस्य चोर्व
गा२ शीगर्भात्षडासन्नात्मजा नृप आयुः श्रुतायुः सत्यायुरयोऽथ विजयो जयः १ श्रुतायोर्वसुमान्पु
त्रः सत्यायोश्च श्रुतंजयः रयस्य सुत एकश्च जयस्य तनयोमितः २ भीमस्तु विजयस्याथ कांच
नहोत्रकस्ततः तस्य जह्नुः सुतो गंगां गंडूषीकृत्य योऽपिवत् ३ जह्नोः पुरुस्तु तत्पुत्रो बलाको
ऽस्यात्मजोऽजकः ततः कुशः कुशस्यापि कुशांबोऽमूर्त्तयो वसुः कुशनाभश्च चत्वारो गाधिरासी
त्कुशांबजः ४ तस्य सत्यवतीं कन्यामृचीकोऽयाचत द्विजः वरं विसदृशं मत्वा गाधिर्भार्गवम
ब्रवीत् ५ एकतः श्यामकर्णानां हयानां चंद्रवर्चसां सहस्रं दीयतां शुल्कं कन्यायाः कुशिकान्वयं ६

३ जह्नोः पुत्रः पुरुस्तस्य बलाकस्तस्याजकः ४ गाधेः पुत्रो विश्वामित्रो ब्रह्मर्षिरभूदित्युत्तराध्याये वक्ष्यति
गाधेरभून्महातेजा इत्यादिना तत्र तावदुपोद्घाते तेन भृगुवंशस्य ऋचीकस्य चरितं प्रसक्तानुपसक्ते
न च परशुरामावतारमाह तस्य सत्यवतीमित्यादिना विसदृशमननुरूपं भार्गवमृचीकं ५ दक्षिणवामयो ६७

मथनप्रकारमाह अधरारणिमुर्वशीं ध्यायन्नुत्तरां चारणिमात्मानं ध्यायन्नुभयोररण्योर्मध्ये यत्काष्ठं
तत्प्रजननं पुत्रं ध्यायन् तथा च मंत्रः उर्वश्यामुरसि पुरूरवा इति ४२ तस्य तेन कृतान्निर्मथ्याद्विभावसुरग्निर्जा
तः कथंभूतः जातवेदा धनं भोग्यं यस्मात् स च त्रय्या विद्यया विहितेनाधानसंस्कारेण त्रिवृत् आहवनीयादि
रूपः सन् राज्ञा पुरूरवसा पुत्रत्वे कल्पितः पुण्यलोकप्रापकत्वात् ४३ तदाह तेनेति ४४ तेन चनादिर्वेदत्र

उर्वशीं मंत्रतो ध्यायन्नधरारणिमुत्तरां आत्मानमुभयोर्मध्ये यत्तत्प्रजननं प्रभुः ४२ तस्य निर्म
थनाज्जातो जातवेदा विभावसुः त्रय्या स विद्यया राज्ञा पुत्रत्वे कल्पितस्त्रिवृत् ४३ तेनायजत यज्ञे
शं भगवन्तमधोक्षजं उर्वशीलोकमन्विच्छन्सर्वदेवमयं हरिं ४४ एक एव पुरा वेदः प्रणवः स
र्ववाङ्मयः देवो नारायणो नान्य एकोऽग्निर्वर्ण एव च ४५ पुरूरवस एवासीत्त्रयी त्रेतामु
खे नृप अग्निना प्रजया राजा लोकं गांधर्वमेयिवान् ४६

यबोधितो ब्राह्मणादीनामिंद्राद्यनेकदे
वयजनेन स्वर्गप्राप्तिहेतुः कर्ममार्गः कथं सादिरिव वर्ण्यते तत्राह एक एवेति द्वाभ्यां पुरा कृतयुगे
सर्ववाङ्मयः सर्वासां वाचां बीजभूतः प्रणव एक एव देवः देवश्च नारायण एक एव अग्निश्चैक एव लौ
किकः वर्णश्चैक एव हंसो नाम ४५ वेदत्रयी तु पुरूरवसः सकाशादेवासीत् एयिवान् प्राप अयं भावः कृते

युगे सत्वप्रधानाः प्रायशः सर्वेपि ध्याननिष्ठाः रजःप्रधा
ने त्रेतायुगे वेदादिविभागेन कर्ममार्गः प्रकटो बभूव
४६

अनीनशत्नाशातूनाशयामास तदेवाह रजस्तमोवृत्तमिति पाठांतरं सुगमं १५ १६ कार्त्तवीर्य्यार्ज्जुनेन
कृतमपराधं वक्तुं तस्य दर्प्पहेतुमैश्वर्य्यादिकमाह हैहयानामिति षड्भिः । परिकर्मभिः परिचर्य्यादिभिः

त्रिःसप्तकृत्वो यद्रमां चक्रे निःक्षत्रियां महीं ॥ अनीनशद्भुवो भारमब्रह्मण्यमधार्म्मिकं ॥ रज
स्तमोवृत्तो महान् फल्गुन्यपि कृते हसि ॥ १५ ॥ राजोवाच ॥ किं तदंहो भगवतो राजन्यैरकृता
त्मभिः ॥ कृतं येन कुलं नष्टं क्षत्रियाणामभीक्ष्णशः ॥ १६ ॥ श्रीबादरायणिरुवाच ॥ हैहयानामधि
पतिरर्ज्जुनः क्षत्रियर्षभः ॥ दत्तं नारायणांशांशमाराध्य परिकर्म्मभिः ॥ बाहून् दशशतं ले
भे दुर्द्धर्षत्वमरातिषु ॥ अव्याहतेन्द्रियौजःश्रीस्तेजोवीर्य्ययशोबलं ॥ योगेश्वरत्वमैश्वर्य्यं
गुणा यत्राणिमादयः १७ चचाराव्याहतगतिर्ल्लोकेषु पवनो यथा १८ स्त्रीरत्नैरावृतः
क्रीडन् रेवांभसि मदोत्कटः ॥ वैजयंतीं स्रजं बिभ्रद्रुरोध सरितं भुजैः १९ विप्लावितं स्व
शिबिरं प्रतिस्रोतःसरिज्जलैः ॥ नामृष्यत्तस्य तद्वीर्य्यं वीरमानी दशाननः २०

दत्तं दत्तात्रेयमाराध्याव्याहतमिंद्रियादिकं च लेभे यत्र यस्मिन्नैश्वर्य्येऽणिमादयो गुणाः १७ १८ रेवां
भसि नर्मदाजले सरितं नर्मदां १९ रावणो दिग्विजये माहिष्मत्याः समीपे नर्मदायां देवपूजां कुर्वन्

७ उभयैर्मंत्रैः ब्राह्मैर्मंत्रैः पत्न्यैश्वश्र्वैतु क्षात्रैरित्यर्थः ८ यावत्स्नातुंमुनिर्निर्गतस्तावद्भार्यायां भर्तृस्ने
हाधिक्यात्पुत्राः सत्यवत्याश्चरुश्रेष्ठंमत्वाऽनयामात्रासत्यवतीयाचितासतीब्राह्मणमंत्राभिमंत्रितम
स्वचरुमात्रेऽयच्छत् प्रादात् मातुश्चरुस्तात्रमंत्राभिमंत्रितंस्वयमदत् ९ कष्टंन्जुगुप्सितं तदेवाह ॥

इत्युक्तस्तन्मतंज्ञात्वागतःसवरुणांतिकं आनीयदत्वाताम्मातुपयेमेवरानना ७ सऋषिः
प्रार्थितःपत्न्याश्वश्र्वाचापत्यकाम्यया श्रपयित्वोभयैर्मंत्रैश्चरुंस्नातुंगतोमुनिः ८ तावत्सत्य
वतीमात्रास्वचरुंयाचितासती श्रेष्ठंमत्वाऽनयायच्छन्मात्रेमातुरदत्स्वयं ९ तद्विज्ञायमुनिःप्रा
हपत्नीकष्टमकारषीः घोरोदंडधरःपुत्रोभ्राताते ब्रह्मवित्तमः १० प्रसादितःसत्यवत्यामैवं
भूदितिभार्गवः अथतर्हिभवेत्पौत्रोजमदग्निस्ततोऽभवत् ११ साचाभूत्सुमहत्पुण्या कौशि
कीलोकपावनी १२ रेणोःसुतांरेणुकांवैजमदग्निरुवाहयां तस्यांवैभार्गवऋषेःसुतावसुमना
दयः १३ यवीयान्जज्ञएतेषांराममित्यभिविश्रुतः यमाहुर्वासुदेवांशंहैहयानांकुलांतकं १४

तत्पुत्रोघोरोभविष्यति भ्राताततुब्रह्मवित्तमोभविष्यतीति १० एवंमाभूदितिप्रसादितोभार्गवआह अथ
तर्हिपौत्रोघोरोभविष्यति ततोजमदग्निःपुत्रोऽभवदित्यर्थः ११ साचसत्यवतीकौशिकीनद्यभूत् १२ मा

 प्रहरन्नूपरश्वधोयस्यसः मनस्वानिलश्चतयोरिवौजोवीर्यंयस्य परेषांचक्रंसैन्यंसूदयतीतितथा छिन्नाभुजा

 उरवःकंधराश्चयेषां हताःस्सूतावाहनानिचयेषांतेवीरानिपेतुः ३० विद्धक्लृप्तश्चर्मीदयोयस्य ३१ पंचशतेषुधनुः

श्चोदयद्धस्तिरथाश्वपत्तिभिर्गदासिबाणर्ष्टिशतघ्निशक्तिभिः अक्षौहिणीःसप्तदशातिभीषणास्ता

रामएकोभगवानसूदयत् २९ यतोयतोऽसौप्रहरत्परश्वधोमनोनिलौजाःपरचक्रसूदनः ततस्तत

श्छिन्नभुजोरुकंधरानिपेतुरुर्व्यांहतसूतवाहनाः ३० दृष्ट्वास्वसैन्यंरुधिरौघकर्दमेरणाजिरेराम

 कुठारसायकैः विवृक्णचर्मध्वजचापविग्रहंनिपातितंहैहयआपतद्रुषा ३१ अथार्जुनःपंचशते

षुबाहुभिर्धनुःषुबाणान्युगपत्ससंदधे रामायरामास्त्रभृतांसमग्रणीस्तान्येकधन्वेषुभिरा

च्छिनत्समं ३२ पुनःस्वहस्तैरचलान्मृधेऽङ्घ्रिपानुत्क्षिप्यवेगादभिधावतोयुधि भुजान्कुठा

रेणकठोरनेमिनाचिच्छेदरामःप्रसभंत्वहेरिव ३३ कृत्तबाहोःशिरस्तस्यगिरेःशृंगमिवाहर

त् हतेपितरितत्पुत्राअयुतंदुद्रुवुर्भयात् ३४

पुसोऽर्जुनःरामायसंदधे एकएवधनुर्यस्यसः पाठांतरेएकएवबंधःसंधानंयेषांतैरिषुभिःतानिधनूंषिसमंस

हतत्स्तत्क्षणमेवाछिनत् ३२ मृधेसाधनभूतानचलानंघ्रिपांश्चोत्क्षिप्याभिधावतःतस्यभुजानूचिच्छेद अहेःफ

हृतविषयः ३३ समर्पितर समर्पयत् ३४

ततश्च कृतकिल्बिषः क्रीडंतमभिभवितुं प्रवृत्तः सन् गृहीत्वा माहिष्मत्यां स्वपुर्यां कृशिवसन्निरुद्ध अपुनश्च
वज्ञयायेन मुक्तः २१ इदानीं तत्कृतमपराधं दर्शयन्नाह एकदेत्यादिना २२ अर्हणमातिथ्यादि हविष्म

गृहीतो लीलया स्त्रीणां समक्षं कृतकिल्बिषः माहिष्मत्यां संनिरुद्धो मुक्तो येन कपिर्यथा २१ स
एकदा तु मृगयां विचरन्विजने वने यदृच्छयाश्रमपदं जमदग्नेरुपाविशत् २२ तस्मै स नरदेवाय
मुनिरर्हणमाहरत् ससैन्यामात्यवाहाय हविष्मत्या तपोधनः २३ स वीरस्तत्र तद्दृष्ट्वा आत्मैश्व
र्यातिशायिनं तन्नाद्रियताग्निहोत्र्यां साभिलाषः सहैहयः २४ हविर्धानीमृषेर्दर्पान्नरान्हर्तुम
चोदयत् ते च माहिष्मतीं निन्युः सवत्सां क्रंदतीं बलात् २५ अथ राजनि निर्याते राम आश्रम आग
तः श्रुत्वा तत्तस्य दौरात्म्यं चुक्रोधाहिरिवाहतः २६ घोरमादाय परशुं सतूणं चर्म कार्मुकं अन्वधा
वत दुर्मर्षो मृगेंद्र इव यूथपं २७ तमापतंतं भृगुवर्यमोजसा धनुर्धरं बाणपरश्वधायुधं ऐणेय
चर्मांबरमर्कधामभिर्युतं जटाभिर्ददृशे पुरीं विशन् २८

त्यो कामधेन्वा २३ तदर्हणं नाद्रियत तस्मिन्ना
तुष्यत् यतोऽग्निहोत्र्यां होमधेनौ साभिलाषः सहैहयः हैहयैः सह वर्तमानः २४ दर्पाद्धेतोः ऋषेर्हविर्धा

भा०न० किंचित् ईषच्चित्ररथे गंधर्वराजे स्पृहा यस्याः सा किंचिन्नसस्मारेतिवा ३ कलशं पुरोधाय अग्रेनिधाय
५० ६ व्यभिचारं मानसं ज्ञात्वा ५ आज्ञातिलंघिनो भ्रातृऋणं मातुश्चवधे संचोदितः सन् मुनेर्यः समाधिर्त्तेयश्च

विलोकयंती क्रीडंतमुदकार्थं नदीं गता होमवेलां न सस्मार किंचिच्चित्ररथस्पृहा ३ काला
त्ययं तं विलोक्य मुनेः शापविशंकिता आगत्य कलशं तस्थौ पुरोधाय कृतांजलिः ४ व्यभिचा
रं मुनिर्ज्ञात्वा पत्न्याः प्रकुपितोऽब्रवीत् घ्नतैनां पुत्रकाः पापामित्युक्तास्ते न चक्रिरे ५ रामः संचोदि
तः पित्रा भ्रातॄन्मात्रा सहावधीत् प्रभावज्ञो मुनेः सम्यक् समाधेस्तपसश्च सः ६ वरेण छंदयामा
स प्रीतः सत्यवतीसुतः वव्रे हतानां रामोपि जीवितं चास्मृतिं वधे ७ उत्तस्थुस्ते कुशलिनो निद्रा
पाय इवांजसा पितुर्विद्वांस्तपोवीर्यं रामश्चक्रे सुहृद्वधं ८ येऽर्जुनस्य सुता राजन्स्मरंतस्ते
पितुर्वधं रामवीर्यपराभूता लेभिरे शर्म न क्वचित् ९

तयोः प्रभावज्ञः यदि न हन्यां तर्हि मामपि शप्तुं समर्थः यदि हन्यां तर्हि मयि संतुष्टः सन् तानपि जीवयि
तुं समर्थ इति जानन्नित्यर्थः ६ ७ नन्वतिनिंदितं कथं कृतवानत्राह पितुर्विद्वानिति पूर्वोक्त एवाभिप्रायः

॥ ८ सर्वक्षत्रियवधेकारणं वक्तुमाह येऽर्जुनस्यसु
तारित्यादिना ७
५०

३६३१

३८॥ अर्हणतां पूज्यत्वं ॥३९॥ सौरी सूर्यस्य प्रभेव ॥४०॥ तीर्थसंसेवया ॥ चकाराद्यमनियमैश्चाच्युते चेतना चित्तं यस्य सः ॥
अग्निहोत्रीमुपावर्त्य सवत्सां परवीरहा ॥ समुपेत्याश्रमं पित्रे परिक्लिष्टां समर्पयत् ॥३५॥ स्वकर्म त
त्कृतं रामः पित्रे भ्रातृभ्य एव च ॥ वर्णयामास तच्छ्रुत्वा जमदग्निरभाषत ॥३६॥ राम राम महाबाहो भवा
न्पापमकारषीत् ॥ अवधीन्नरदेवं यत्सर्वदेवमयं वृथा ॥३७॥ वयं हि ब्राह्मणास्तात क्षमयार्हणतां ग
ताः ॥ यया लोकगुरुर्देवः पारमेष्ठ्यमगात्पदं ॥३८॥ क्षमया रोचते लक्ष्मीर्ब्राह्मी सौरी प्रभा यथा
क्षमिणामाशु भगवांस्तुष्यते हरिरीश्वरः ॥३९॥ राज्ञो मूर्द्धाभिषिक्तस्य वधो ब्रह्मवधाद्गुरुः ॥ तीर्थ
संसेवया चांहो जह्यंगाच्युतचेतनः ॥४०॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे श्रीपरशुरा
मचरिते पंचदशोध्यायः ॥१५॥ श्रीशुक उवाच ॥ पित्रोपशिक्षितो रामस्तथेति कुरुनंदन ॥ संवत्स
रं तीर्थयात्रां चरित्वाश्रममाव्रजत् ॥१॥ कदाचिद्रेणुका याता गंगायां पद्ममालिनं ॥ गंधर्वराजं
क्रीडंतमप्सरोभिरपश्यत ॥२॥

४०॥ इति श्री नवमे पंचदशः ॥१५॥ षोडशेथार्जुनसुते जमदग्नेर्हते मुहुः ॥ रामात्क्षत्रवधः प्रोक्तो विश्वा
मित्रस्य चान्वयः ॥१॥ २॥

भा० न० तथापिसर्वक्षत्रवधेकिंकारणंतत्राह हेतुंकृत्वेति सार्द्धेन अमंगलकारिणि अन्याप्यवर्त्तिनिसति त्रिःसप्तकृ
५१ त्वोरेणुकयादुःखावेशाद्धुरस्ताडनंकृतं ततोरामस्तावत्कृत्वः क्षत्रमुत्सादितवान् इतिप्रसिद्धः १८ १९ २०

हेतुंकृत्वापितृवधंक्षेत्रेऽमंगलकारिणि त्रिःसप्तकृत्वःपृथिवींकृत्वानिःक्षत्रियांप्रभुः स्य
मंतपंचकेचक्रेशोणितोदान्ह्रदान्नव १८ पितुःकायेनसंधायशिरआदायबर्हिषि सर्वदे श्री २
वमयंदेवमात्मानमयजन्मखैः १९ ददौप्राचींदिशंहोत्रेब्रह्मणेदक्षिणांदिशं अध्वर्य्यं
वेप्रतीचींवैउद्गात्रेउत्तरांदिशं अन्येभ्योऽवांतरदिशःकश्यपायचमध्यतः आर्यावर्त्त
मुपद्रष्ट्रेसदस्येभ्यस्ततःपरं २० ततश्चावभृथस्नानविधूताशेषकिल्बिषः सरस्वत्यांब्र
ह्मनद्यांरेजेव्यभ्रइवांशुमान् २१ स्वदेहंजमदग्निस्तुलब्ध्वासंज्ञानलक्षणं ऋषीणांमंड
लेसोऽभूत्सप्तमोरामपूजितः २२ जामदग्न्योपिभगवान्रामःकमललोचनः आगामि
न्यंतरेराजन्वर्त्तयिष्यतिवैबृहत् २३

२१ संज्ञानंस्मृतिस्तदेवलक्षणंचिह्नंयस्यतत् स्वदेहं
लब्ध्वासप्तर्षीणांमंडलेसप्तमऋषिरभूत् २२ बृहत्ब्रह्मवेदं वेदप्रवर्त्तकेषुसप्तमेष्वेकतमोभविष्यति

५१

भगवत्यावेशिताधीर्येनत्तं १० ११ १२ १३ १४ दुःखादीनांवेगेनविमोहिताः १५ १६ ब्रह्मघ्नैर्वित्तनाश्रीर्यस्याः

एकदाश्रमतोरामेसभ्रातरिवनंगते वैरंसिसाधयिषवोलब्धच्छिद्राउपागमन् १० दृष्ट्वाग्न्या
गारआसीनमावेशितधियंमुनिं भगवत्युत्तमश्लोकेजघ्नुस्तेपापनिश्चयाः ११ याच्यमानाःकृपणं
यारामभ्मात्रातिदारुणाः प्रसह्यशिरउत्कृत्यनिन्युस्तेक्षत्रबंधवः १२ रेणुकादुःखशोकार्त्तानिघ्नं
त्यात्मानमात्मना रामरामेतितातेतिविचुक्रोशोच्चकैःसती १३ तदुपश्रुत्यदूरस्थाहारामेत्या
र्त्तवत्स्वरं त्वरयाश्रममासाद्यददृशुःपितरंहतं १४ तेदुःखरोषामर्षार्त्तिशोकवेगविमोहिताः
१५ हातातसाधोधर्मिष्टत्यक्त्वास्मान्स्वर्गतोभवान् विलप्यैवंपितुर्देहंनिधायभ्रातृषुस्वयम्.
प्रगृह्यपरशुंरामःक्षत्रांतायमनोदधे १६ गत्वामाहिष्मतींरामोब्रह्मघ्नविगतश्रियं तेषां
सशीर्षभीराजन्मध्येचक्रेमहागिरिं तद्रक्तेननदींघोरामब्रह्मण्यभयावहाम् १७

तांहेराजन् सरामस्तेषांशीर्षभिर्माहिष्मत्यांमध्येमहांतंगिरिंचक्रे तेषांरक्तेन अब्रह्मण्यानांभयावहां घो

रा.टी.के २७

भा० न० ततकुतःभ्रगुवंशभवस्यदेवरातस्यकौशिकप्रवरत्वमित्याशंक्यतदुपपादयन्नाह पुत्रंकृत्वेत्यादि
५२ नायावत्समाप्तिः पूर्वमजीगर्तसुतत्वेमध्यमत्वेनपितृभ्यांममत्वाविहायविक्रीतत्वात्तस्यकृपया
सुतानाह ज्येष्ठएषप्रकल्प्यतां २८ एतदेवस्पष्टयितुंविशिनष्टि यइतिद्वाभ्यां मुमुचेअमुच्यत २९ भा

पुत्रंकृत्वाशुनःशेपंदेवरातंचभार्गवं आजीगर्तंसुतानाहज्येष्ठएषप्रकल्प्यतां २८ योवैहरिश्चं टि १
द्रमखेविक्रीतःपुरुषःपशुः स्तुत्वादेवान्प्रजेशादीन्मुमुचेपाशबंधनात् २९ योरातोदेवयज
नेदेवैर्गाधिषुतापसः देवरातइतिख्यातःशुनःशेपस्तुभार्गवः ३० येमधुच्छंदसोज्येष्ठाःकुश
लंमेनिरेनतत् अशपत्तान्मुनिःक्रुद्धोम्लेछाभवतदुर्जनाः ३१ सहोवाचमधुछंदाःसार्द्धंपंच
शतातः यन्नोभवान्संजानीतेतस्मिंस्तिष्ठामहेवयं ३२

र्गवोपिगाधिषुगाधेर्वंशजेषु देवरातइतिख्यातः ३० तत्तस्यज्येष्ठत्वंकुशलंनमेनिरे मध्यमस्या
नर्थावहत्वंदृष्ट्वानांगीकृतः मुनिर्विश्वामित्रः ३१ पंचाशताकनिष्ठैःसाकंसमध्यमोमधुछंदाउ
वाच नोऽस्माकंयजतत् ज्येष्टत्वंकनिष्टत्वंवाभवान्पितासंज्ञानीते मन्यतेतस्मिन्वयंतिष्ठामेत्ति ३२ ५२

२४ भुवोर्भरमहन् भारमेवाहन्नृपानिति २५ तदेवप्रसक्तानुप्रसक्तंसमाप्यप्रस्तुतमाह गाधेरितिमहा
तेजाः विश्वामित्रः २६ तेसर्वेलिंगसमवायन्यायेन प्राणभृतउपदधातीतिवन्मधुछंदःसएवोच्यतइ
ति तथाचश्रुतिः तस्यहविश्वामित्रस्यैकशतंपुत्राः आसुः पंचाशदेवज्यायांसोमधुछंदसः पंचाशत्कनी

आस्तेऽद्यापिमहेंद्राद्रौन्यस्तदंडप्रशांतधीः उपगीयमानचरितःसिद्धगंधर्वचारणैः २४
एवंभृगुषुविश्वात्माभगवान्हरिरीश्वरः अवतीर्य्यपरंभारंभुवोहन्बहुशोनृपा
३३ न् २५ गाधेरभून्महातेजाःसमिद्धइवपावकः तपसाक्षात्रमुत्सृज्ययोलेभेब्रह्मव
र्चसम् २६ विश्वामित्रस्यचैवासन्पुत्राएकशतंनृप मध्यमस्तुमधुछंदामधुछं
दसएवते २७

यांसइत्यादि तत्रचविश्वामित्रपुत्रेषुभार्गवस्याजीगर्त्तस्यदेवरातस्यज्येष्ठत्वमवगम्यते तथाच
आश्वलायनबोधायनादिभिः कौशिकानांदेवरातप्रवरत्वमुक्तं प्रवरस्तुतस्मिन्नेववंशेऽवांत
रभेदः नतुवंशांतरं तथाचस्मृतिः एकएवऋषिर्यावत्प्रवरेष्वनुवर्त्तते तावत्समानगोत्रंवि

नाभगवंशिरोमणादिति २१

भा०न० आयोः सप्तदशे त्वैलज्येष्ठपुत्रस्य पंचसु सुतेषु तत्र वृद्धादिचतुर्णां वंशवर्णनं इह श्रीहंसावतारप्रस्तावाय वं
५३ शानुक्रमेण प्रक्रांतमिति यस्य वंशे हंसावतारस्तस्य वंशोऽस्तीति विततत्वादंते निरूप्यते अतः पुरूरवसः
सुतानां पंचानां कनिष्ठानां वंशानुक्तेरानीं प्रथमस्य वंशमाह ॥ य इति ॥ एवं नहुषययातियदुप्रभृतिष

श्रीबादरायणिरुवाच ॥ यः पुरूरवसः पुत्र आयुस्तस्याभवन्सुताः ॥ नहुषः क्षत्रवृद्धश्च रजी राभ
श्च वीर्यवान् अनेना इति राजेन्द्र शृणु क्षत्रवृधोऽन्वयं १ क्षत्रवृद्धसुतस्यासन्सुहोत्रस्यात्म
कु३ जास्त्रयः काश्यः कुशो गृत्समद इति गृत्समदादभूत् २ शुनकः शौनको यस्य बह्वृचः प्रवरो मु
निः काश्यस्य काशिस्तत्पुत्रो राष्ट्रो दीर्घतमःपिता धन्वंतरिर्दीर्घतमस आयुर्वेदप्रवर्तकः य
ज्ञभुग्वासुदेवांशः स्मृतमात्रार्तिनाशनः ३ तत्पुत्रः केतुमानस्य जज्ञे भीमरथस्ततः दिवोदासो
द्युमांस्तस्मात्प्रतर्दन इति स्मृतः ४ स एव शत्रुजिद्वत्स ऋतध्वज इतीरितः तथा कुवलया
श्वेति प्रोक्तोऽलर्कादयस्ततः ५

पिद्रष्टव्यम् क्षत्रवृद्धः क्षत्रवृद्धस्य १ २ दीर्घतमसः पिता स्मृत मात्र एवार्तिरोगदुःखं नाशयतीति
तथा ३ ४ ततः प्रतर्दनादिश ˚ कुवलयाश्वात् द्युमतः सकाशादलर्कादयः ५ रामरामरामरामराम ५३

एवमुक्त्वा मंत्रदृशं कस्यन्नूनंक ॥ तमस्याम् तानामित्यादि मंत्राणां द्रष्टारं शुनःशेफं ज्येष्ठं चक्रुः तदाह
वयं सर्वे त्वामन्वंच स्महि अनुगंतारः कनिष्ठाः स्म इत्यर्थः ततः प्रसन्नो विश्वामित्रस्तान् सुतानाह वीरवंतः
पुत्रवंतो भविष्यथ ये यूयं मे मानं पूज्यत्वं अनुगृह्णंतः अनुवर्तमानाः संतः मां वीरवंतं पुत्रवंतं अक

ज्येष्ठं मंत्रदृशं चक्रुस्त्वामन्वंचो वयं स्महि विश्वामित्रः सुतानाह वीरवंतो भविष्यथ ये मानं मेन
गृह्णंतो वीरवंतमकर्त्त मां ३३ एष वः कुशिका वीरो देवरातस्तमन्वित अन्ये चाष्टकहारितज
यक्रतुमदादयः ३४ एवं कौशिकगोत्रं तु विश्वामित्रैः पृथग्विधम् प्रवरांतरमापन्नं तद्धि चैवं
प्रकल्पितं ॥३५॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे परशुरामचरिते षोडशोध्यायः ॥१६॥

र्त्तकृत इत्यर्थः ॥३३॥ हे कुशिकाः एष देवरातः वो युष्मदीयः कौशिक एव यत्तवीरः मत्पुत्रः तमेतं अ
न्वितः अनुगच्छत अन्ये चाष्टकादयस्तस्य सुता आसन् ३४ उपसंहरति एवमिति एके सृष्टाः एके
नुगृहीताः न्यस्तु पुत्रत्वेन स्वीकृत्त इत्येवं कौशिकगोत्रं पृथग्विधं नानाप्रकारं जातं तच्च प्रवरांतरमाप
न्नं प्राप्तं हि यस्मादेवं देवरातज्येष्ठत्वेन प्रकल्पितं ॥३५॥ इति नवमे षोडशः ॥१६॥

भा० न०
५४

तेषामतिभ्रंशाय गुरूणा बृहस्पतिना ॥ अभिचारविधानेनाग्नौ हूयमानेसति ॥ १५ ॥ सिंहावलोकेनाह ॥ क्षात्रवृद्धे
पौत्रात्कुशात् ॥ प्रतिः प्रतेः संजयः ॥ १६ ॥ १७ ॥ १८ ॥ इति नवमे सप्तमः ॥ १७ ॥ अष्टादशे ययातेस्तु नाहुषस्य कथोच्य

गुरुणा हूयमानेऽग्नौ बलभित्तनयान् रजेः ॥ अवधीद् भ्रंशितान्मार्गान्न कश्चिदवशेषितः १५ कुशा
त्प्रतिः क्षात्रवृद्धात्संजयस्तत्सुतो जयः ॥ ततः कृतः कृतस्यापि जज्ञे हर्यवनो नृपः १६ सहदेवस्ततो ही
नो जयसेनस्तु तत्सुतः ॥ संकृतिस्तस्य च जयः क्षत्रधर्मा महारथः १७ क्षत्रवृद्धान्वया भूपा इ
मे शृण्वथ नाहुषान् ॥ १८ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे युवंशः सप्तदशोध्यायः ॥ १७ ॥ श्री
शुक उवाच ॥ यतिर्ययातिः संयातिरायतिर्वियतिः कृतिः षडिमे नहुषस्यासन्निन्द्रियाणीव
देहिनः १ राज्यं नैच्छद्यतिः पित्रा दत्तं तत्परिणामवित् यत्र प्रविष्टः पुरुष आत्मानं नावबुध्य
ते २ पितरि भ्रंशिते स्थानादिन्द्राण्या धर्षणाद्द्विजैः प्रापितेऽजगरत्वं वै ययातिरभवन्नृपः ३
चतसृष्वादिशद्दिक्षु भ्रातॄन्भ्राता यवीयसः कृतदारो जुगोपोर्वी काव्यस्य वृषपर्वणः ४

ते यस्य पंच सुपुत्रेषु कनीयानग्रहीज्जरां १ तस्य राज्यस्य परिणाममन्तर्थो वहत्वं वेत्तीति तथा तत्र हेतुः
यत्रेति २ स्थानात्स्वर्गात् द्विजैरगस्त्यादिभिः ३ यवीयसो भ्रातॄन् आदिशत् काव्यस्य शुक्रस्य वृषपर्व

श्री ४

[illegible]
५४

६ संततिसंज्ञः ७ सत्यकेतुः धृष्टकेतुः तस्मात्सुकुमारस्तस्माद्वीतिहोत्रः तस्य भर्गः अतो भर्गात् भार्गभूमिः
८ काशयः काशेर्वंश्याः काशेः प्रपितामहस्य क्षत्रवृद्धस्यान्वयमयंते यान्तीति तथा ९ १० ततः अनेनसः सु

षष्टिंवर्षसहस्राणिषष्टिंवर्षशतानिच नालर्कादपरोराजन्बुभुजेमेदिनींयुवा ६ अलर्कात्संत
तिस्तस्मात्सुनीथोथसुकेतनः धर्मकेतुःसुतस्तस्मात्सत्यकेतुरजायत ७ धृष्टकेतुःसुतस्तस्मा
त्सुकुमारःक्षितीश्वरः वीतिहोत्रस्यभर्गोतोभार्गभूमिरभून्नृप ८ इतीमेकाशयोराजन्क्ष
त्रवृद्धान्वयायिनः ९ राभस्यरभसःपुत्रोगंभीरश्चाक्रियस्ततः तस्यक्षेत्रेब्रह्मजज्ञेशृणुवंशम
नेनसः १० शुद्धस्ततःशुचिस्तस्मात्त्रिककुद्धर्मसारथिः ततःशांतरयोजज्ञेकृतकृत्यःसआत्म
वान् ११ रजेःपंचशतान्यासन्पुत्राणाममितौजसां देवैरभ्यर्थितोदैत्यान्हत्वेंद्रायाददा
द्दिवं १२ इंद्रस्तस्मैपुनर्दत्वागृहीत्वाचरणौरजेः आत्मानमर्पयामासप्रह्लादाद्यरिशंकितः
१३ पितर्युपरतेपुत्रायाचमानायनोददुः त्रिविष्टपंमहेंद्रस्ययज्ञभागान्समाददुः १४ ॥ ऽऽ

योजज्ञे कृतकृत्यः सयतः आत्मवान् ज्ञानी अतः पुत्रोत्पादनं न कृतवानित्यर्थः ११ १२ १३ १४ ॥ ऽऽ

भा० न० अन्यायमेवब्राह्मणोत्कर्षवर्णनेनव्यनक्ति यैरितित्रिभिः येब्राह्मणाःपरस्यपुंसोमुखंमुखादुत्पन्नत्वेनतत्प्रियद्वारत्वेनच
५५ श्रेष्ठाइत्यर्थ ज्योतिर्ब्रह्मपंथाः वेदमार्गः ११ १२ तदेवब्राह्मणमात्रमेवतावत्पूज्यं तत्रापिवयंभृगवः अस्याश्च

यैरिदंतपसासृष्टंमुखंपुंसःपरस्यये धार्य्यतेयैरिहज्योतिःशिवःपंथाःप्रदर्शितः ११ यान्वंदंत्युपति
ष्ठंतिलोकनाथाःसुरेश्वराः भगवानपिविश्वात्मापावनःश्रीनिकेतनः १२ वयंतत्रापिभृगवःशिष्यो
ऽस्यानःपितासुरः अस्मद्धार्य्यंधृतवतीशूद्रोवेदमिवासती १३ एवंक्षिपंतींशर्मिष्ठागुरुपुत्रीम
भाषत रुषाश्वसंत्युरंगीवधर्षितादष्टदच्छदा १४ आत्मवृत्तमविज्ञायकत्थसेबहुभिक्षुकि
किंनप्रतीक्षसेस्माकंगृहान्बलिभुजोयथा १५ एवंविधैःसुपरुषैःक्षिप्त्वाचार्य्यसुतांसतीं श
र्मिष्ठाप्राक्षिपत्कूपेवासश्चादायमन्युना १६ तस्यांगतायांस्वगृहंययातिर्मृगयांचरन् प्राप्तो
यदृच्छयाकूपेजलार्थीतांददर्शह १७ दत्त्वास्वमुत्तरंवासस्तस्यैराजाविवाससे गृहीत्वापा
णिनापाणिमुज्जहारदयापरः १८ तंवीरमाहौशनसीप्रेमनिर्भरयागिरा १९ राजंस्त्वयागृ
हीतोमेपाणिःपरपुरंजय हस्तग्राहोऽपरोमाभूद्गृहीतायास्त्वयाहिमे २०

पितानःशिष्यः एवंसत्यप्यस्माभिर्धार्य्यंवासइयमसतीधृतवती १३ १४ १५ १६ १७ १८ १९ २० एम ५५

१ तद्वच

५ नात्रप्रतिलोमतादोषईश्वरघटनादितिदर्शयन्कथामाह एकदेत्यादिना प्रतिज्ञग्राहेइत्यं तेन गुरोः
शुक्रस्यपुत्र्यादेवयान्याचव्यचरदितिद्वयोरन्वयः कलगीताअलयोयेषुतानिनलिनी पुलिनानियस्मिन्

राजोवाच ॥ ब्रह्मर्षिर्भगवान्काव्यःक्षत्रबंधुश्चनाहुषः राजन्यविप्रयोःकस्माद्विवाहःप्रतिलो
मकः ॥ ४ ॥ श्रीशुकउवाच ॥ एकदादानवेंद्रस्यशर्मिष्ठानामकन्यका सखीसहस्रसंयुक्तागुरु
पुत्र्याचभामिनी ॥ देवयान्यापुरोद्यानेपुष्पितेद्रुमसंकुले व्यचरत्कलगीतालिनलिनीपुलिनेंब
ला ६ ताजलाशयमासाद्यकन्याःकमललोचनाः तीरेन्यस्यदुकूलानिविजह्रुःसिंचतीर्मिथः
७ वीक्ष्यव्रजंतंगिरिशंसहदेव्यावृषस्थितं सहसोत्तीर्य्यवासांसिपर्य्यधुर्व्रीडिताःस्त्रियः ८ शर्मिष्ठा
ऽजानतीवासोगुरुपुत्र्याःसमव्ययत् स्वीयंमत्वाप्रकुपितादेवयानीदमब्रवीत् ९ अहोनिरीक्ष्यता
मस्यादास्याःकर्म्महस्यसांप्रतं अस्मद्धार्य्यंधृतवतीशुनीवहविरध्वरे १० ॥ ऽऽ ॥ ऽऽ

पुरोद्याने अबलाशर्मिष्ठा ६ सिंचतीः सिंचत्यः ७ ८ अजानती स्वीयं मत्वा गुरुपुत्र्यावासःसमव्ययत् पर्य्य
धात् ९ असांप्रतं अन्याय्यं १० ॥

भा० न० २७ सानुगा सखीसहिता शर्मिष्ठा मामनुयात्विति २८ तत्तस्मान्निर्गतात् शुक्रात् संकटं वीक्ष्य तत्तस्मादव
५६ स्थितात् दर्थस्य प्रयोजनस्य गौरवं च वीक्ष्य २९ तल्पे नाधाः नोपगच्छेदित्यर्थः ३० ऋपत्यार्थमृतुकाले ३१

त्वणाह्वेमनुभेगवाञ्छिष्यं व्याच ए भार्गवः कामोऽस्याः क्रियतां राजन्नैनां त्यक्तुमिहोत्सहे
२७ तथेत्यवस्थिते प्राह देवयानी मनोगतं पित्रा दत्ता यतो यास्ये सानुगा यातु मामनु २८
स्वानां तत्संकटं वीक्ष्य तदर्थस्य च गौरवं देवयानीं पर्यचरत्स्त्रीसहस्रेण दासवत् २९ नाहु
षाय सुतां दत्वा सह शर्मिष्ठयोशनाः तमाह राजन्शर्मिष्ठामधास्तल्पे न कर्हिचित् ३०
विलोक्यौशनसीं राजन्शर्मिष्ठा सुप्रजां क्वचित् तमेव वव्रे रहसि सख्याः पतिमृतौ स
ती ३१ राजपुत्र्यार्थितोपत्ये धर्मं चावेक्ष्य धर्मवित् स्मरन्शुक्रवचः काले दिष्टमेवाभि
पद्यत ३२ यदुं च तुर्वसुं चैव देवयानी व्यजायत द्रुह्युं चानुं च पूरुं च शर्मिष्ठा वार्षपर्वणी ३३
गर्भसंभवमासुर्या भर्तुर्विज्ञाय मानिनी देवयानी पितुर्गेहं ययौ क्रोधविमूर्छिता ३४

प्रार्थनात्तस्याः कामपूरणं धर्मं मत्वा च शुक्रस्य वचश्च स्मरन् दिष्टं दैवप्रापितमेव तत्संगमभ्यपद्य ५६
त न तु कामत इत्यर्थः ३२ ३३ आसुर्यां शर्मिष्ठायां भर्तुः सकाशात् ३४ ॥

निषिद्धः प्रतिलोमसंबंध इतिचेत्तत्राह एषइति २१ ब्राह्मणमेवत्वंवृणीहि किमनेनाग्रहेणेतिचेत्तत्राह न
ब्राह्मण इति बृहस्पतेःसुतःकचःशुक्रान्मृतसंजीविनीविद्यामध्यगात् तदाचदेवयानीतंपतिंचकमे सचगुरु
पुत्रीममपूज्येतिनतामुदूहन् ततश्चकुपितासतीतवेयंविद्यानिष्फलाभवत्वितितंशशाप तदेवाह यमहमशपंतस्य

एषईशकृतोवीरसंबंधोनैनपौरुषः यदिदंकूपलग्नायाभवतोदर्शनंमम २१ नब्राह्मणोमेभ
विताहस्तग्राहोमहाभुज कचस्यबार्हस्पत्यस्यशापाद्यमशपंपुरा २२ ययातिरनभिप्रेतंदैवोप
हृतमात्मनः मनस्तुतद्गतंबुद्ध्वाप्रतिजग्राहतद्वचः २३ गतेराजनिसावीरेतत्रस्मरुदतीपितुः
न्यवेदयत्ततःसर्वमुक्तंशर्मिष्ठयाकृतं २४ दुर्मनाभगवान्काव्यःपौरोहित्यंविगर्हयन् स्तु
वन्वृत्तिंचकापोतींदुहित्रासययौपुरात् २५ वृषपर्वातमाज्ञायप्रत्यनीकविवक्षितं गुरुं
प्रसादयन्मूर्ध्नापादयोःपतितःपथि २६

शापात् २२ अशास्त्रीयत्वादनभिप्रेतमपिदैवेनोपहृतंप्रापितंबुद्ध्वातद्गतंतस्यांसकामंस्वमनश्चबुद्ध्वं
नह्यधर्मेमदीयंमनःप्रविशेदितितस्यावचःप्रतिजग्राह अंगीकृतवान् २३ शर्मिष्ठासंबंधोपिदै
ववशादेवाभवेदितिदर्शयन्नाह गतेराजनीतिनवभिः उक्तं भिक्षुकीत्यादिकृतंकूपप्रक्षेपादि २४ कापो-

तीमुञ्छवृत्तिं २५ प्रत्यनीकादेवास्तेविवक्षितान्जयंश्रा
पणीयादित्यभिप्रेतंयस्य तथाभूतंज्ञात्वाप्रत्यनी
कानांविवक्षितमित्तिवा २६

भा० न० आत्मकृतः स्वदेहकर्तृकोनुत्तमः ४२ तथापिपितुर्यश्चिंतितंकुर्यात्सउत्तमः यस्तुप्रोक्तकारीसमध्यमः
५७ यस्त्वश्रद्धयाकुर्यात्सोऽधमः अकर्त्तोपितुरुच्चरितंपुरीषप्रायं ४३ जुजुषेसेवितवान् ४४ यथोपजोषं

पूरुरुवाच ॥ कोनुलोकेमनुष्येंद्रपितुरात्मकृतः पुमान् प्रतिकर्तुंक्षमोयस्यप्रसादाद्विंदतेपरं ४२
उत्तमश्चिंतितंकुर्यात्प्रोक्तकारीतुमध्यमः अधमोऽश्रद्धयाकुर्यादकर्त्तोच्चरितंपितुः ४३ इति
प्रमुदितः पूरुः प्रत्यगृह्णाज्जरांपितुः सोपितद्वयसाकामान्यथावज्जुजुषेनृप ४४ सप्तद्वी
पपतिः सम्यक्पितृवत्पालयन्प्रजाः यथोपजोषंविषयान्जुजुषेऽव्याहतेंद्रियः ४५ देवया
न्यप्यनुदिनंमनोवाग्देहवस्तुभिः प्रेयसः परमांप्रीतिमुवाहप्रेयसीरहः ४६ अयजद्य
ज्ञपुरुषंक्रतुभिर्भूरिदक्षिणैः सर्वदेवमयंदेवंसर्ववेदमयंहरिं ४७ यस्मिन्निदंवि
रचितंव्योम्नीवजलदावलिः नानेवभातिनाभातिस्वप्नमायामनोरथः ४८ तमेवहृदि
विन्यस्यवासुदेवंगुहाशयम् नारायणमणीयांसंनिराशीरयजत्प्रभुः ४९ एवंवर्षस
हस्राणिमनः षष्ठैर्मनः सुखं विदधानोपिनातृप्यत्सार्वभौमः कदिंद्रियैः ५०

यथाप्रीतिजुजुषे ४५ ४६ ४७ नानेवभातियावदिंद्रियप्रवृत्ति तदुपरमे [illegible] भाति स्वप्नमायाभ्यांसहितोमनोरथ राम
इवेत्यर्थः ४८ ४९ मनः सुखंकामभोगः कदिंद्रियैः कुत्सितैः कामभोगपराङ्मुखैरिंद्रियैः ५० ५७

उपमंत्रयन् प्रसादयन् ३५ विरूतं रूपं करोतीति तथा ३६ तेदुहितरिकामेरथ्याप्यतृप्तोस्मि कामा
नांभोगेरितिवा शुक्रआह तर्हियोभिधास्यति अभितोधारयिष्यति तस्यवयसाकामंव्यत्यस्यतां ययो

प्रियामनुगतः कामी वचोभिरुपमंत्रयन् नप्रसादयितुंशेकेपादसंवाहनादिभिः ३५ शुक्रस्त
माहकुपितः स्त्रीकामानृतपुरुषम् त्वांजराविशतांमंदविरूपकरणीनृणां ३६ ययातिरुवा
च॥ अतृप्तोस्म्यद्यकामानांब्रह्मन् दुहितरिस्मते व्यत्यस्यतांयथाकामंवयसायोभ्यधास्य
ति ३७ इतिलब्धव्यवस्थानः पुत्रंज्येष्ठमवोचत यदोतातप्रतीच्छेमांजरांदेहिनिजंवयः॥ मा
तामहकृतांवत्सनतृप्तोविषयेष्वहं वयसाभवदीयेनरंस्येकतिपयाः समाः॥ ३८॥ यदुरुवाच॥
नोत्सहेजरयास्थातुमंतराप्राप्तयातव अविदित्वासुखंग्राम्यंवैतृष्ण्यंनैतिपूरुषः ३९ तुर्वसुश्चो
दितः पित्रादुह्युश्चानुश्चभारत प्रत्याचख्युरधर्मज्ञाह्यनित्येनित्यबुद्धयः ४० अपृच्छत्तन
यंपूरुंवयसोनंगुणाधिकं नत्वमग्रजवद्वत्समांप्रत्याख्यातुमर्हसि ४१
छंजरांव्यत्ययंनीयतामितिवा यद्वा व्यत्यस्येतिछेदः तांजरांव्यत्यस्य संगमयेत्यर्थः ३७ इतिग्रहीष्यसीत्य
लब्धव्यवस्थानं जरायाव्यवस्थितिर्येनसः ३८ ३९ यतोनधर्मज्ञाः अनित्येचयौवनेनित्यबुद्धयः ४० त्वं
जरांग्रहीष्यसीत्यपृच्छत् प्रत्याख्यानं माकृथाइत्याह नत्वमिति ४१

भा० न० नावबुध्यत नान्वबुध्यत ६ ७ स्वामिनमिति स्पष्टाभिप्रायेणाह ८ इडविडाकारं वस्तजातिशब्दं संधितुं प्रसादयि
५५ तुम् ९ वृषणमछिनत् जरया संभोगासामर्थ्यमकरोत् अर्थाय स्वपुत्र्याः कामभोगाय योगवित् उपायज्ञः जराव

सएकोजवृषस्तासां बह्वीनां रतिवर्द्धनः रेमे कामग्रहग्रस्त आत्मानं नावबुध्यत ६ तमेव प्रेष्ठतमया र
ममाणमजान्यया विलोक्य कूपसंविग्ना नामृष्यद्बस्तकर्म तत् ७ तं दुर्हृदं सुहृद्रूपं कामिनं क्षणसौ
हृदं इंद्रियाराममुत्सृज्य स्वामिनं दुःखिता ययौ ८ सोपि चानुगतः स्त्रैणः कृपणस्तां प्रसादितुं कुर्वन्नि
डविडाकारं नाशक्नोत्पथि संधितुं ९ तस्य तत्र द्विजः कश्चिदजास्वाम्यछिनद्रुषा लंबंतं वृषणं भूयः
संदधेर्थाय योगवित् १० संबद्धवृषणः सोपि ह्यजया कूपलब्धया कालं बहुतिथं भद्रे कामैर्नाद्
यापि तुष्यति ११ तथाहं कृपणः सुभ्रु भवत्याः प्रेमयंत्रितः आत्मानं नाभिजानामि मोहितस्तव मा
यया १२ यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः न दुह्यंति मनःप्रीतिं पुंसः कामहतस्य ते १३ न जा
तु कामः कामानामुपभोगेन शाम्यति हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते १४

त्ययेन नरतिशक्तिं ददावित्यर्थः १० कूपलब्धया सह कामैः सेव्यमानैर्न तुष्यति ११ १२ ननु तर्हि पुनरपि बहवो वि
षयाः सेव्यंतां ततो मनसि प्रीते सति कामोपशांत्या मोहो निवर्त्तेतेति चेत्तत्राह यदिति द्वाभ्यां न दुह्यंति न पूरयंति १३

५५

इति नवमे अष्टादशः॥१८॥ ततो विशेषयति स्वचेष्टितं मन्वनोपमं देवयानीसमाश्रयाद्विरक्तो मुक्तिमाप्तवान् भुक्तभो
गाम जो हास्यन्नजवद्वर्तमानः विडंवयन्प्रियामाह निर्वेद यितुमात्मवान् कामानाचरन्नुपभुंजानः गाथामितिह
सं १ मद्विधेनमत्सदृशेनाचरितामनुतिष्टन्तो मद्विधस्याचरितं यस्यामितिवा यस्य ग्रामनिवासिनः कामिनो मद्विध

इति श्रीमद्भागवते महापुराणे नवमस्कंधे ययातेरष्टादशोध्यायः॥१८॥ श्रीशुक उवाच॥ स इत्थमा
चरन्कामान्स्त्रैणोपह्नवमात्मनः बुद्ध्वा प्रियायै निर्विण्णो गाथामेतामगायत १ शृणु भार्गव्यमूं गाथां
मद्विधाचरितां भुवि धीरा यस्यानुशोचंति वने ग्रामनिवासिनः २ वस्त एको वने कश्चिद्विचिन्वन्प्रिय
मात्मनः ददर्श कूपे पतितां स्वकर्मवसगामजां ३ तस्या उद्धरणोपायं वस्तः कामी विचिंतयन् व्यधत्तती
र्थमुद्धृत्य विषाणाग्रेण रोधसि ४ सोत्तीर्य्य कूपात्सुश्रोणीतमेव चकमे किल तया वृतं समुद्वीक्ष्य वह्व्यो
जाः कांतकामिनीः पीवानं श्मश्रुलं प्रेष्ठं मीढ्वांसं याभकोविदं ५

स्याचरितं वने स्थिता धीराः शोचंति तस्य गाथां शृणु २ आत्मानमनुलक्ष्याह वस्त इति प्रियामनुलक्ष्याह अजामि
ति वने संसारे प्रियं विषयं ३ रोधसि तटे विषाणाग्रेण मृदादिकमुद्धृत्य तीर्थं निर्गममार्गं व्यधत्त ४ वह्व्य इति शर्मि
ष्ठाप्रमुखाः कामयामासुः कांतं प्रतिकामिनीः कामिन्यः पीवानं पुष्टं श्मश्रुलं श्मश्रुवद्भुलं रतिसमर्थमित्यर्थः मी
ढ्वांसं रेतःसिक्तारं याभकोविदमभिज्ञं अत एव प्रेष्ठं ५

पु१

भा० न० तस्यैवोवंशेस्थापयित्वा २३ विषयेषु शब्दादिषु आसेवितं षड्वर्गं षडिंद्रियसुखं मुमुचे तत्याज यद्वा विष
५९ येषु आसेवितं सेवांकारितं षण्णामिंद्रियाणां वर्गं मुमुचेउपेक्षितेत्यर्थः २४ विधुतं निरस्तं त्रिगुणात्मकं

भूमंडलस्य सर्वस्य पूरुमर्हत्तमं विशां अभिषिच्याग्रजांस्तस्य वशे स्थाप्य वनं ययौ २३ आसे
वितं वर्षपूगान् षड्वर्गं विषयेषु सः क्षणेन मुमुचे नीडं जातपक्ष इव द्विजः २४ स तत्र निर्मुक्तस
मस्तसंग आत्मानुभूत्या विधुतत्रिलिंगः परेमले ब्रह्मणि वासुदेवे लेभे गतिं भागवतीं प्रतीतः
२५ श्रुत्वा गाथां देवयानी मेने प्रस्तोभमात्मनः स्त्रीपुंसोः स्नेहवैक्लव्यात् परिहासमिवेरितं २६
सा सन्निवासं सुहृदां प्रपायामिव गच्छतां विज्ञायेश्वरतंत्राणां मायाविरचितं प्रभोः सर्वत्र सं
गमुत्सृज्य स्वप्नौपम्येन भार्गवी कृष्णे मनः समावेश्य व्यधुनोल्लिंगमात्मनः २७ नमस्तुभ्यं
भगवते वासुदेवाय वेधसे सर्वभूताधिवासाय शांताय बृहते नमः २८

लिंगं येन प्रतीतः प्रख्यातः २५ प्रस्तोभमेवाह परिहासमिवेति यद्वा प्रस्तोभं निवृत्तिमार्गप्रोत्साहनं मे
ने २६ २७ कथं समावेश्य तदाह नम इति नमनादिभिः समावेश्येत्यर्थः मुक्तोवा नमस्करोतीति २८ ॥ ५९

तर्हि केनोपायेन मनसः संपूर्णा प्रीतिः स्यात्तथा कामोपशमः स्यादित्यत आह यदेति षड्भिः अमंगलं भावं
रागद्वेषादि वैषम्यं १५ दुःखानि निवहं वहंतीति तथा तां १६ स्त्रीसन्निधानं तु सर्वथा त्याज्यमित्याह मात्रेति अ

यदा न कुरुते भावं सर्वभूतेष्वमंगलं समदृष्टेस्तदा पुंसः सर्वाः सुखमया दिशः १५ या दुस्त्यजा दुर्मति
भिर्जीर्यतो या न जीर्यति तां तृष्णां दुःखनिवहां शर्मकामो द्रुतं त्यजेत् १६ मात्रा स्वस्रा दुहित्रा वा ना
विविक्तासनो भवेत् बलवानिंद्रियग्रामो विद्वांसमपि कर्षति १७ पूर्णं वर्षसहस्रं मे विषयान्से
वतोऽसकृत् तथापि चानुसवनं तृष्णा तेषूपजायते १८ तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मा
नसं निर्द्वंद्वो निरहंकारश्चरिष्यामि मृगैः सह १९ दृष्टं श्रुतमसद्बुद्ध्वा नानुध्यायेन्न संविशे
त् संसृतिं चात्मनाशं च तत्र विद्वान्स आत्मदृक् २० इत्युक्त्वा नाहुषो जायां तदीयं पूरवे वयः
दत्वा स्वां जरसं तस्मादाददे विगतस्पृहः २१ दिशि दक्षिणपूर्वस्यां द्रुह्युं दक्षिणतो यदुं प्रतीच्यां
तुर्वसुं चक्रे उदीच्यामनुमीश्वरं २२

विविक्तं संकीर्णमासनं यस्य सः कर्षति आकर्षति १७ १८ १९ ननु कस्मात्त्यागः स्यात्ति दुष्करत्वात् कथं ब्रह्मणि
मनसः आधानं स्यात् तत्राह दृष्टमिति यो नानुध्यायेत् न संविशेत् न चोपभुंजीत तत्र दृष्टश्रुतयोरनुध्याना

२० २१ २२

दुष्यंतस्य शकुंतलायां भरतः पुत्रोऽभवदिति कथाद्वारेणाह दुष्यंतोमृगयामित्ति पंचदशभिः तमाश्रमंमंडयंती
स्त्रियं विलोक्य मुमुहेऽमुह्यत् ८ तस्यादर्शनेन प्रमुदितः अतएव संनिवृत्तःपरिश्रमोयस्य ९ १० पौरवा

दुष्यंतोमृगयांयातःकण्वाश्रममपद्यंगतः तत्रासीनांस्वप्रभयामंडयंतीरमामिव विलोक्य सद्यो
मुमुहेदेवमायामिवस्त्रियं ८ बभाषेतांवरारोहांभटैःकतिपयैर्वृतः तद्दर्शनप्रमुदितःसंनिवृ
त्तपरिश्रमः ९ पप्रच्छकामसंतप्तःप्रहसन्श्लक्ष्णयागिरा ॥ कात्वंकमलपत्राक्षिकस्यासिहृ
दयंगमे १० किंवाचिकीर्षितंतत्रभवत्यानिर्जनेवने ॥ व्यक्तंराजन्यतनयांवेद्म्यहंत्वांसुमं
ध्यमे नहिचेतःपौरवाणामधर्मेरमतेक्वचित् ११ ॥ सुकुंतलोवाच ॥ विश्वामित्रात्मजैवाहं
त्यक्तामेनकयावने वेदैतद्भगवान्कण्वोवीरकिंकरवामहे १२ आस्यतांह्यरविंदाक्षगृह्य
तामर्हणंचनः भुज्यतांसंतिनीवाराउष्यतांयदिरोचते १३ दुष्यंतउवाच ॥ उपपन्नमिदंसु
भ्रुजातायाःकुशिकान्वये स्वयंहिवृणुतेराज्ञांकन्यकासदृशंवरम् १४

रांचेतोनह्यधर्मेरमते अतोमद्वेतसस्त्वयिरमणाद्देवाहंत्वांराजन्यतनयांवेद्मि ११ विश्वामित्रस्या
त्मजाहंमेनकायांजाता तयाचस्वर्गंगच्छंत्यात्रवनेत्यक्ता अतोराजन्यैवाहमित्यर्थः १२ १३ किंकर

वामेत्यादिवाक्यात्तदभिप्रायंज्ञात्वाह उपपन्नमिति
१४

इति नवमे एकोनविंशः ॥ १९ ॥ विशेषपितृप्रसादात्प्राप्तराज्यासनमहोन्नतेः पूरोर्वंशे तु दौष्यंतेर्भरतस्योर्यतेयशः १ २ त
स्तुतः अहंयातेःस्तुतः ३ धर्मेयुश्चव्रतेयुश्चसत्येयुश्च धर्मसत्यव्रतेयवः ४ वनेयुश्चावमःस्मृतः एवं दशैते अ

इति श्रीमद्भागवते महापुराणे नवमस्कंधे एकोनविंशोध्यायः ॥ १९ ॥ श्रीबादरायणिरुवाच ॥ पूरोर्वंशं
प्रवक्ष्यामि यत्रजातोसि भारत यत्र राजर्षयो वंश्या ब्रह्मवंश्याश्च जज्ञिरे १ जनमेजयोह्यभूत्पूरोः प्रा
चिन्वांस्तत्सुतस्ततः प्रवीरोऽथ मनस्युर्वै तस्माच्चारुपदोऽभवत् २ तस्य सुद्युरभूत्पुत्रस्तस्मा
द्बहुगवस्ततः संयातिस्तस्याहंयाती रौद्राश्वस्तत्सुतःस्मृतः ३ ऋतेयुस्तस्य कक्षेयुः स्थंडिलेयुः
कृतेयुकः जलेयुः संनतेयुश्च धर्मसत्यव्रतेयवः ४ दशैतेप्सरसः पुत्रा वनेयुश्चावमःस्मृतः
घृताच्यामिंद्रियाणीव मुख्यस्य जगदात्मनः ५ ऋतेयोरंतिभारोभूत्त्रयस्तस्यात्मजा नृपाः सु
मतिर्ध्रुवोऽप्रतिरथः कण्वोप्रतिरथात्मजः ६ तस्य मेधातिथिस्तस्मात्प्रस्कण्वाद्या द्विजातयः
पुत्रोभूत्सुमतेरभ्यो दुष्यंतस्तत्सुतोमतः ७

येयुप्रमुखास्तस्य रौद्राश्वस्य घृताच्याम् अप्सरसि पुत्रा जाताः अप्सरस इति षष्ठीसप्तम्यर्थे वशवर्त्तित्वे
दृष्टांतः जगतः आत्मभूतस्य मुख्यस्य प्राणस्येंद्रियाणीव ५ ६ ७

चक्रवर्तीबभूवेतिशेषः तस्यमहिमागीयते तदपेतेश्लोकाअभिगीताइत्यादिव हृचमुत्याहहरेरंश
भुवः अंशाज्जातस्य २२ तत्रविंशमाह चक्रमिति २३ गंगायामनुलोमं पंचपंचाशतावाजिभिरि
जे २४ पुरोधायपुरोहितंकृत्वा यमुनामनुच यमुनायाश्चानुलोमम् अष्टाधिकसप्ततिमेध्यानश्वानबबंधे
किंकुर्वन् वसुधनंप्रकर्षेणाददत् २५ साचीगुणेप्रकृष्टगुणवतिदेशेग्निश्चितोऽभूत् यस्मिन्नग्निचे

पित्र्युपरतेसोऽपिचक्रवर्तीमहायशाः महिमागीयतेतस्य हरेरंशभुवोभुवि २२ चक्रंदक्षिणहस्ते
स्यपद्मकोशोऽस्यपादयोः २३ ईजेमहाभिषेकेणसोऽभिषिक्तोऽधिराड्विभुः पंचपंचाशतामेध्यै
गंगायामनुवाजिभिः २४ मामतेयंपुरोधाययमुनामनुचप्रभुः अष्टसप्ततिमेध्याश्वान्बबंधप्र
ददद्वसु २५ भरतस्यहिदौष्यंतेरग्निःसाचीगुणेचितः सहस्रंबद्वशोयत्रब्राह्मणागाविभेजिरे २६

यस्मिन्देशेवासहस्रंब्राह्मणाभरतेनदत्ताभूरिदानेदत्तागाः बद्वशः प्रत्येकंबद्वंबद्वं विभेजिरे विभज्यजगृहुः चतुर
शीतिरधिकेस्त्रयोदशसहस्रैरेकंबद्वंभवति तथाहि हिरण्येनपरिवृत्ता कृष्णान्शुक्लदतोमृगान् मष्णारे
भरतोऽददाच्छतंबद्वानिसप्तचेतिश्रुत्युक्तानिसप्ताधिकशतंबद्वानिशुकेनोत्तरश्लोकेचतुर्दशलक्षत्वेन
संगृहीतानि अदात्कर्मणिमष्णारेनियुतानिचतुर्दशेति एवंचचतुर्दशलक्षाणांसप्ताधिकशतभागोबद्वमित्युक्तं

[illegible]

गांधर्वविधिनामिथः समयपूर्वकेण २५ २६ २७ दुरत्ययं विक्रांतं चिक्रमणं यस्य तम् २८ २९ भस्त्रा
चर्मपात्रं तद्वन्माता आधारमात्रं पितुरेव पुत्रः तत्र हेतुः येनेति आत्मा वै पुत्रनामासीदिति श्रुतेः भरस्व पु
त्राणं अनेन भरतनामनिरुक्तिः ३० किंच रेतोधाः रेतःसेक्तावं शकृत्पुत्रो यमक्षयान्पितरं नयति तारय

ते इत्युक्ते यथाधर्ममुपयेमे शकुंतलां गांधर्वविधिना राजा देशकालविधानवित् २५ अमो
घवीर्यो राजर्षिर्महिष्यां वीर्यमादधे श्वोभूते स्वपुरं यातः कालेनासूत सा सुतं २६ काएवः कु
मारस्य वने चक्रे समुदिताः क्रियाः बद्ध्वा मृगेंद्रं तरसा क्रीडति स्म स बालकः २७ तं दुरत्ययवि
क्रांतमादाय प्रमदोत्तमाः हरेरंशांशसंभूतं भर्तुरंतिकमागमत् २८ यदा न जगृहे राजा भार्यापुत्रा
वनिंदितौ शृण्वतां सर्वभूतानां खे वागाहाशरीरिणी २९ माता भस्त्रा पितुः पुत्रो येन जातः स एव
सः भरस्व पुत्रं दुष्यंत मावमंस्थाः शकुंतलां ३० रेतोधाः पुत्रो नयति नरदेव यमक्षयात् त्वं चास्य
धाता गर्भस्य सत्यमाह शकुंतला ३१

ति तथा च स्मृतिः पुन्नाम्नो नरकाद्यस्मात्पितरं तारयते सुतः तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवेति
पाठांतरे माता पित्रोः पुत्रं प्रति विवादे यमक्षयात् धर्मनिर्णेतुर्यमस्य सभायाः सकाशात् रेतोधाः रेतःसे

क्ता पितैव धर्मेण विजित्य पुत्रं नयति न तु मातेत्यर्थः
ततश्च भार्यापुत्रौ स्वीकृतवानिति ज्ञेयम् २१

भा० न० तस्यवैराग्येणमोक्षप्रकारमाह सइति मृषैवेति विचार्येतिशेषः ३३ नानुरूपामत्सदृशानभवंतीतिभर्त्रोई
६२ रितेसति व्यभिचारशंकया।मांत्यक्ष्यतीति भयात्पुत्रान्जघ्नुः पुनःपुनःपुत्राणांवैसादृश्यानुसंधानेनत्य
जेन्नान्यथेत्याशयेनहतवत्यः ३४ वितथेव्यर्थेसति तदर्थंपुत्रार्थं मरुत्सोमेनयज्ञेनयजतस्तस्यप्रसन्ना
संतो

ससम्राड्लोकपालाख्यमैश्वर्यमधिराट्छ्रियं चक्रंचास्खलितंप्राणान्मृषेत्युपरराम
मह ३३ तस्यासन्नृपवैदर्भ्यः पत्न्यस्तिस्रःसुसंमताः जघ्नुस्त्यागभयात्पुत्रान्नानुरू
पाइतिरिते ३४ तस्यैवंवितथेवंशेतदर्थंयजतःसुतं मरुत्सोमेनमरुतोभरद्वाजं
मुपादुदुः ३५ अंतर्वत्न्यांभ्रातृपत्न्यांमैथुनायबृहस्पतिः प्रवृत्तोवारितोगर्भंशप्त्वा
वीर्यमवासृजत ३६

संतोभरद्वाजंनामपुत्रमुपाददुःसमर्पयामासुः ३५ मरुतोभरद्वाजागमप्रकारंदर्शयन्नाह अंत
र्वत्न्यामितिचतुर्भिः अंतर्वत्न्यां गर्भिण्यांभ्रातुरुतथ्यस्यपत्न्यां ममतायां चोर्थ्य एणमैथुनायकदाचित्प्र
वृत्तोबृहस्पतिः तदाद्वितीयगर्भस्यावकाशाभावादाक्रोशपूर्वकंगर्भस्थेनवारितः ततःक्रुद्धोबृहस्प ६२

देवानामपिमायावैभवमत्यगात् अत्यगात् अत्यशेत यतोगुरुं पूज्यं हरिमाययोप्राप्तः तदंशभवत्वात् मायवन्तरइ
इतिपाठेकृस्त्वंश्रुत्यनुसारेणमायावत्तांश्रेष्ठोहरिरेवासावित्यर्थः २७ मृगान्श्वेष्टगजान् भद्रमभद्रमृगा
योगजजातिभेदाः मष्णारइत्यस्यश्रुतिपदस्यव्याख्यानंकर्मणीतिकस्मिंश्चित्कर्मविशेषेकेचित्तुमष्णारेतीर्थेइति

त्रयस्त्रिंशच्छतंह्यश्वान्बद्ध्वाविस्मापयान्नृपान् दौष्यन्तिरत्यगान्मायांदेवानांगुरुमाययौ २७ मृगान्
शुक्लदतःकृष्णान्हिरण्येनपरिष्कृतान् अदात्कर्मणिमष्णारेनियुतानिचतुर्दश २८ भरतस्यम
हत्कर्मनपूर्वेनापरेनृपाः नैवापुर्नैवप्राप्स्यंतिबाहुभ्यांत्रिदिवंयथा २९ किरातहूणान्यवना
न्पौण्ड्रान्कंकान्खशाञ्छकान् अब्रह्मण्यान्नृपांश्चाहन्म्लेच्छान्दिग्विजयेऽखिलान् ३० जित्वा
पुरासुरादेवान्येरसौकांसिभेजिरे देवस्त्रियोरसांनीताःप्राणिभिःपुनराहरत् ३१ सर्वकामान्
दुदुहतुःप्रजानांतस्यरोदसी समास्त्रिनवसाहस्रीर्दिक्षुचक्रमवर्तयत् ३२

व्याचष्टे २८ २९ ३० पुरादेवान्जित्वायेऽसुरारसौकांसिरसातलादिस्थानानिभेजिरेतैःप्राणिभिर्बलिभि
र्देवस्त्रियोरसातलंनीताःसतीःपुनराहरत् आनिन्येप्राणिभिरन्यैर्मनुष्यादिभिःसहनीताइतिवा पणिभिरि
तिपाठेपणयोऽसुरास्तैर्नीताःसतीः यद्वापणयोदूतास्तैःदूतान्प्रस्थाप्याहरदित्यर्थः ३१ त्रिनवसाहस्रीः

भा० न० वितथं व्यभिचारसंभवात् तमात्मजं वितथं निरर्थकं मत्वा ममता व्यसृजन् तत्याज ॥ पाठांतरे आदितः प्रथ
६२ मजं भर्तुर्वीर्याज्जातमेवमुख्यमात्मजं मत्वा बृहस्पतेर्जातं तत्याजेत्यर्थः एवं तत्यक्तं मरुतो बिभ्रन् ॥ अवि
भरुः नष्टेवंमरुद्भिः प्राप्तोऽयं भरतस्यान्वये वितथे सति दत्तः ॥ ३९ ॥ इति नवमे विंशतितमः ॥ २० ॥ एकविं

चोद्यमानाः सुरैरेवं मत्वा वितथमात्मजं व्यसृजन्मरुतो बिभ्रन् दत्तोऽयं वितथेऽन्वये ॥ ३९ ॥
इति श्रीमद्भागवते महापुराणे नवमस्कंधे पुरुवंशानुकीर्तने नाम विंशतितमोऽध्यायः ॥ २० ॥ श्रीशु
क उवाच ॥ वितथस्य सुतो मन्युर्बृहत्क्षत्रो जयस्ततः ॥ महावीर्यो नरो गर्गः संस्कृतिस्तु न
रात्मजः ॥ १ ॥ गुरुश्च रंतिदेवश्च संस्कृतेः पांडुनंदन ॥ रंतिदेवस्य हि यश इहामुत्र च गीयते ॥ २ ॥

शिष्टं दौष्यंतेः सुतस्यान्वय उच्यते रंतिदेवाजमीढादेर्यत्र कीर्तिः प्रतन्यते १ भरतस्यान्वये वितथे जा
तेऽसति दत्तत्वाद्वितथसंज्ञो भरद्वाजः स च ब्राह्मणोऽपि भरतस्य दत्तः पुत्रो जात इति तद्वंशोऽनुक्रम्य
ते वितथस्य सुतो मन्युः तस्मात् बृहत्क्षत्र जय महावीर्य नर गर्गाः पंच पुत्रा बभूवुः १ २ ॥ म ६२

ततोबृहस्पतेःशापाद्गर्भस्थोदीर्घतमांधोबभूव तेनचतद्वीर्य्यंपार्ष्णिप्रहारेणयोनेर्बहिर्निःसारितंभूमौ
पतितंसद्य एवकुमारोऽभवत् तंचएववीर्यजंभर्त्तुस्त्यागाद्विशंकितासतीत्यक्तुकामांममतांप्रतिसुरा एतं
बृहस्पतेर्ममतायाश्चसंवादरूपंश्लोकंजगुः अतआह तस्यनामनिरूपयेयेनतत् तन्नामनिर्वचनेनै
वभर्त्तुस्त्यागशंकामपाकर्तुमित्यर्थः ३७ तत्रपुत्रंत्यक्त्वायांतीममतांबृहस्पतिराह हेमूढेइमंपुत्रंभरपु

तंत्यक्तुकामांममतांभर्त्तुस्त्यागविशंकितां नामनिर्वचनंतस्यश्लोकमेतंसुराजगुः ३७
मूढेभरद्वाजमिमंभरद्वाजंबृहस्पते यातौयदुक्त्वापितरौभरद्वाजस्ततस्त्वयं ३८

षाण भर्त्तुर्बिभेमीतिचेत्तत्राह द्वाजमेकस्यक्षेत्रेऽन्यस्यबीजाद्दित्येवंद्वाभ्यांजातं अतस्तस्याप्य
यंपुत्रइतिनतस्माद्भयशंकेत्यर्थः एवमुक्त्वासतीतंप्रत्याह हेबृहस्पते त्वमिमंभर यतःद्वाभ्यामावाभ्या
मन्यायतोजातं अतोनाहमेकाकिनीभरामीत्यर्थः यद्यस्मादेवमुक्त्वापितरौममताबृहस्पतीविवद [illegible]
मानौपुत्रंपरित्यज्ययातौ ततोहेतोरयंभरद्वाजइति पाठांतरेयस्यपुत्रस्यत्यागदुःखान्वितौयातावित्यर्थः

उच्छेषमुर्वरितं पर्यतीति तथा ९ १० परदुःखासहिष्णुतया सर्वेषां दुःखं स्वयं भोक्तुमास्ते नेति अणिमाद्य
ष्टसमृद्धियुक्तां सिद्धिमपि मोक्षमपि वाहं न कामये तर्हि किं कामयसे तदाह अखिलदेहभाजामार्तिं दुःखं
तत्तद्भोक्तृरूपेणान्तःस्थितः सन्नहं प्रपद्ये प्राप्नुयामित्येकं कामये न भोक्त्रा मया हेतुभूतेन ते सर्वे दुःखा

पानीयमात्रमुच्छेषं तच्चैकपरितर्पणं पास्यतः पुष्कसोऽभ्यागादपो देह्यशुभाय मे ९ तस्य तां
करुणां वाचं निशम्य विपुलश्रमां कृपया भृशसंतप्त इदमाहामृतं वचः १० न कामयेऽहं गति
मीश्वरात्परामष्टर्द्धियुक्तामपुनर्भवं वा आर्तिं प्रपद्येऽखिलदेहभाजामंतःस्थितो येन भवंत्य
दुःखाः ११ क्षुत्तृट्श्रमो गात्रपरिभ्रमश्च दैन्यं क्लमः शोकविषादमोहाः सर्वे निवृत्ताः कृपण
स्य जंतोर्जिजीविषोर्जीवजलार्पणान्मे १२ एवं प्रभाष्य पानीयं म्रियमाणः पिपासया पुष्क
सायाददाद्धीरो निसर्गकरुणो नृपः १३ तस्य त्रिभुवनाधीशाः फलदाः फलमिच्छतां आत्मानं दर्श
याञ्चक्रुर्माया विष्णुविनिर्मिताः १४

भवंति ११ ननु दुःखं किमिति प्रार्थयसे परदुःखनिवृत्त्यैवम
म सर्वदुःखनिवृत्तिरित्याह क्षुत्तृडिति कृपणस्य जंतोर्जीवनहेतोर्जलस्यार्पणान्मे सर्वे क्षुत्तृडादयो निवृत्ता
एव १२ इत्येवं प्रभाष्य १३ त्रिभुवनाधीशा ब्रह्मादयः मायाः तदीयधैर्यपरीक्षणार्थं प्रथमं मायया रच

६४

वियद्वृत्तस्य विपत्तेर्भाग्यनादिवोद्यमं विना दैवादुपस्थितमेव वित्तं भोग्यं यस्य यद्वा वियद्वृत्तं प्राप्नुवत
वित्तं भोग्यं यस्य तद्दैवाहृ बुभुक्षितोऽपि स ततो लब्धं लब्धं ददत् ततः तत प्रपंचयति निष्किंचनस्येत्यादि

वियद्वित्तस्य ददतो लब्धं लब्धं बुभुक्षतः निष्किंचनस्य धीरस्य सकुटुंबस्य सीदतः व्यती
युरष्टचत्वारिंशदहान्यपिबतः किल २ घृतपायससंयावं तोयं प्रातरुपस्थितं कृच्छ्रप्राप्तकुटुं
बस्य क्षुत्तृड्भ्यां जातवेपथोः अतिथिर्ब्राह्मणः काले भोक्तुकामस्य चागमत् ४ तस्मै संव्यभजत्
सोऽन्नमादृत्य श्रद्धयान्वितः हरिं सर्वत्र संपश्यन् स भुक्त्वा प्रययौ द्विजः ५ अथान्यो भोक्ष्यमा
णस्य विभक्तस्य महीपतेः विभक्तं व्यभजत्तस्मै वृषलाय हरिं स्मरन् ६ याते शूद्रे तमन्योऽगा
दतिथिः श्वभिरावृतः राजन्मे दीयतामन्नं सगणाय बुभुक्षते ७ स आदृत्यावशिष्टं यद्बहुमान
पुरस्कृतं तच्च दत्वा नमश्चक्रे श्वभ्यः श्वपतये विभुः ८ सार्द्धैः पंचदशभिः अपिबतो जलपानमकु
र्वतः २ घृतादित्रयाणां द्वंद्वैकं तोयं च ३ ४ ५ अथान्यो वृषलोऽतिथिरागमत् विभक्तस्य कुटुंबादिभ्यो
र्थमन्नादिकं विभक्तवतः ६ सगणाय श्वपृथं सहिताय ७ ८

भा० न० अजमीढाद्देवान्यः पुत्रो बृहदिषुनामाभवत् २२. २३ पारस्य पुत्रो नीपः नीपस्य पुत्रशतं २४ स एव कृत्वी संज्ञायां शु

६५ ककन्यायां ब्रह्मदत्तं जनयामास तदुक्तं हरिवंशे पराशरकुलोत्पन्नः शुको नाम महायशाः व्यासादरण्यां संभूतो

विधूमोऽग्निरिव ज्वलन् स तस्यां पितृकन्यायां वीरिण्यां जनयिष्यति कृष्णं गौरं प्रभुं शंभुं तथा भूरिश्रुतं जयं क

अजमीढाद्बृहदिषुस्तस्य पुत्रो बृहद्धनुः बृहत्कायस्ततस्तस्य पुत्र आसीज्जयद्रथः २२ तत्सुतो वि

शदस्तस्य सेनजित्समजायत रुचिराश्वो दृढहनुः काश्यो वत्सश्च तत्सुताः २३ रुचिराश्वसुतः पा

रः पृथुसेनस्तदात्मजः पारस्य तनयो नीपस्तस्य पुत्रशतं त्वभूत् २४ स कृत्व्यां शुककन्यायां ब्रह्म

दत्तमजीजनत् योगी स गवि भार्यायां विष्वक्सेनमधात्सुतम् २५ जैगीषव्योपदेशेन योगतं

त्रं चकार ह उदक्सेनस्ततस्तस्माद्भल्लाटो बार्हदीषवः २६ यवीनरो द्विमीढस्य कृतिमांस्तत्सुतः

स्मृतः नाम्ना सत्यधृतिर्यस्य दृढनेमिः सुपार्श्वकृत् २७

न्यां कीर्त्तिमतीं षष्ठी योगिनीं योगमातरं ब्रह्मदत्तस्य जननीं महिषीमणुहस्य चेति यद्यपि शुक उत्पत्त्यैव विमुक्तसंगो

निर्गतस्तथापि विरहातुरं व्यासमनुयान्तं दृष्ट्वा छायाशुकं निर्माय गतवान् तदभिप्रायेणैवायं गार्हस्थ्यादि

व्यवहारस्त्यविरोधः स च ब्रह्मदत्तो योगी गवि वाचि सरस्वत्यां २५ स एव योगतंत्रं चकार बार्हदीषवाः बृह

दिवोवैश्यारमेदोघत्वमार्षं २६ दृढनेमिः सुपार्श्वस्य पिता २७

६५

परं केवलं वासुदेवे भक्त्या मनश्चक्रे न तु तान् किमपि याचितवान् १४ अनन्यराधसः ईश्वरातिरिक्तफलांतरा
नपेक्षस्य प्रत्यलीयत आत्मन्येव लीना बभूव १६ १७ मन्युसुतस्य नरकस्य वंशमुक्त्वा तत्सुतस्य गर्गस्य वंश
माह महावीर्यात् दुरितक्षयः तस्य त्रय्यारुणिः कविः पुष्करारुणिश्चेति त्रयः पुत्राः कथंभूताः ये अत्र वंशे ब्राह्म

सर्वे तेभ्यो नमस्कृत्य निःसंगो विगतस्पृहः वासुदेवे भगवति भक्त्या चक्रे मनः परं १५ ईश्वरा
लंबनं चित्तं कुर्वतोऽनन्यराधसः मायागुणमयी राजन्स्वप्नवत्प्रत्यलीयत १६ तत्प्रसंगानु
भावेन रंतिदेवानुवर्तिनः अभवन्योगिनः सर्वे नारायणपरायणाः १७ गर्गाच्छिनिस्त
तो गार्ग्यः क्षत्राद्ब्रह्म ह्यवर्तत १८ दुरितक्षयो महावीर्यात्तस्य त्रय्यारुणिः कविः पुष्करारु
णिरित्यत्र ये ब्राह्मणगतिं गताः १९ बृहत्क्षत्रस्य पुत्रोऽभूद्धस्ती यद्धस्तिनापुरं २० अज
मीढो द्विमीढश्च पुरुमीढश्च हस्तिनः अजमीढस्य वंश्याः स्युः प्रियमेधादयो द्विजाः २१

णगतिं ब्राह्मणरूपतां गतास्ते १९ मन्युपुत्राणां पंचानां ज्येष्ठस्य वंशमाह बृहत्क्षत्रस्येति यत् येन ह
स्तिनापुरं कृतमित्यर्थः २० अजमीढादयस्त्रयो हस्तिनः पुत्राः २१

भा० न० ३५॥३६॥ इतिनवमेएकविंशः॥२१॥ द्वाविंशेऽथदिवोदासवंशमुक्त्वाथवर्णितः॥ ऋक्षवंशेजरासंधःपार्थदुर्यो

६६

तस्यसत्यधृतिःपुत्रोधनुर्वेदविशारदः शरद्वांस्तत्सुतोयस्मादुर्वशीदर्शनात्किल शरस्तंभेप
तद्रेतोमिथुनंतदभूच्छुभं ३५ तद्दृष्ट्वाकृपयागृह्णाच्छंतनुर्मृगयांचरन् कृपःकुमारः
कन्याचद्रोणपत्न्यभवत्कृपी॥३६॥इतिश्रीमद्भागवतेमहापुराणेनवमस्कंधेभरतवंशानु
कीर्तनेएकविंशोध्यायः॥२१॥श्रीशुकउवाच॥ मित्रायुश्चदिवोदासाच्च्यवनस्तत्सुतोनृप
सुदासःसहदेवोथसोमकोजंतुजन्मकृत॥१॥ तस्यपुत्रशतंतेषांयवीयान्पृषतःसु
तः द्रुपदोद्रौपदीतस्यधृष्टद्युम्नादयःसुताः २ धृष्टद्युम्नाद्धृष्टकेतुर्भार्म्याःपांचालकाइ
मे ३ योजमीढसुतोह्यन्यऋक्षःसंवरणस्ततः तपत्यांसूर्यकन्यायांकुरुक्षेत्रपतिःकुरुः ४
परीक्षिःसुधनुर्जह्नुर्निषधश्चकुरोःसुताः सुहोत्रोऽभूत्सुधनुषश्च्यवनोथततःकृती ५

धनादयः १ तस्यसोमकस्यपुत्राणांशतंबभूव तेषांजंतुर्ज्येष्ठः यवीयान्पृषतः २ ३ अजमी
ढस्यैववंशांतरमाह यइति ततःसंवरणात्कुरुः ४ ५

६६

प्राच्यसाम्नां षट् संहितां जगौ विभज्याध्यापितवान् २८ २९ अजमीढस्य वंश्याः प्रियमेधादयः केचिद्ब्राह्मणा बभूवुः बृहदिषुप्रमुखाः क्षत्रियाश्चेति वंशद्वयमुक्तं तस्यैव वंशांतरमाह नलिन्यामित्यादिना यावदध्याय

सुपार्श्वात्सुमतिस्तस्य पुत्रः सन्नतिमांस्ततः कृती हिरण्यनाभाद्यो योगं प्राप्य जगौ स्म षट् सं
हिताः प्राच्यसाम्नां वै नीपो ह्युग्रायुधस्ततः २८ तस्य क्षेम्यः सुवीरोऽथ सुवीरस्य रिपुंजयः त
तो बहुरथो नाम पुरुमीढोऽप्रजोऽभवत् २९ नलिन्यामजमीढस्य नीलः शांतिस्तु तत्सुतः ३०
शांतेः सुशांतिस्तत्पुत्रः पुरुजोऽर्कस्ततोऽभवत् भर्म्याश्वस्तनयस्तस्य पंचासन्मुद्गलादयः य
वीनरो बृहद्विश्वः कांपिल्यः संजयः सुताः ३१ भर्म्याश्वः प्राह पुत्रा मे पंचानां रक्षणाय हि वि
षयाणामलमिमे इति पंचालसंज्ञिताः ३२ मुद्गलाद्ब्रह्मनिर्वृत्तं गोत्रं मौद्गल्यसंज्ञितं ३३ मि
थुनं मुद्गलाद्भार्म्याद्दिवोदासः पुमानभूत् अहल्या कन्यका यस्यां शतानंदस्तु गौतमात् ३४

समाप्ति ३० मुद्गलः एकः यवीनराद्यश्चत्वार इत्येवं पंच ३१ ३२ ३३ भार्म्यात् भर्म्याश्वपुत्रात् मि
थुनं चाभवत् तदेवाह दिवोदासः पुमान् अहल्या कन्यकेति ३४ ॥ ऽऽ ॥ ऽऽ ॥

भा० न०
६७

यदा दे रो देवो न वर्षति तदा शंतनुस्तत्कारणं ब्राह्मणान्पप्रच्छ ब्राह्मणैश्चैवमुक्तः दाराग्निहोत्रसंयोगं कु-
रुते योऽग्रजे स्थिते परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वज इति स्मृतेरग्रभुग्भुवमग्रतो भुनक्ति अयं त्वादृशो-
ऽपि परिवेत्तैव भवति अतस्तद्दोषपरिहाराय राज्यमग्रजायाद्देहि ततो वृष्टिर्भविष्यतीति १४ एवमुक्तः शंतनुः
वनं गत्वा ज्येष्ठं छंदयामास राज्ञः प्रजानां पालनादिः परो धर्मः अतस्त्वं राज्यं स्वीकुर्विति प्रार्थितवान् ततः पूर्वमे

समा द्वादश तद्राज्ये न ववर्ष यदा विभुः शंतनुर्ब्राह्मणैरुक्तः परिवेत्तात्वमग्रभुक् राज्यं देह्यग्रजा-
याशु पुरराष्ट्रविवृद्धये १४ एवमुक्तो द्विजैर्ज्येष्ठं छंदयामास सोऽब्रवीत् तन्मंत्रिप्रहितैर्विप्रै-
र्वेदाद्विभ्रंशितो गिरा वेदवादातिवादान्वै तदा देवो ववर्ष ह १५ देवापिर्योगमास्थाय कलाप-
ग्राममाश्रितः सोमवंशे कलौ नष्टे कृतादौ स्थापयिष्यति १६ वाह्लीकात्सोमदत्तोऽभूद्भूरिर्भूरिश्र-
वास्ततः शलश्च शंतनोरासीद्गंगायां भीष्म आत्मवान् सर्वधर्मविदां श्रेष्ठो महाभागवतः कविः ॥
वीरयूथाग्रणीर्येन रामोऽपि युधि तोषितः १७

ततन्मंत्रिणा अश्मरथसंज्ञेन देवापिं पाषंडीकृत्य राज्यानर्हं कर्तुं ये प्रहिताः विप्राः पाषंडमतास्तस्य यो गिरा वेदा-
द्विभ्रंशितः सन् वेदवादस्यातिवादान् निंदादिवचनानि सोऽब्रवीत् ततस्तस्य पातित्येन राज्यानर्हत्वे जाते
शंतनोर्दोषाभावात् देवो ववर्षेत्यर्थः १५ १६ ततः सोमदत्ताद्भूरिः भूरिश्रवाः शलश्चेति त्रयः पुत्राः रामो

रामः
६७

तस्यकृतिनः उपरिचरोवसुः ततोवसोर्बृहद्रथोमुखमादिर्येषांते तानेवाहकुशांवेति ६ ततस्ततःपुष्पवान्
जज्ञेतस्यापत्यंसत्यहितइतियोज्यं ७ जरयाएकत्वस्या ८ यद्यस्मात्सोमापेःश्रुतश्रवाः कुरोःपुत्रः परीक्षिरन

वसुस्तस्योपरिचरोबृहद्रथमुखास्ततः कुशांबमत्स्यप्रत्यग्रचेदिपाद्याश्चचेदिपाः ६ बृहद्र
थात्कुशाग्रोभूदृषभस्तस्यतत्सुतः जज्ञेसत्यहितोपत्यंपुष्पवांस्तत्सुतोजहुः अन्यस्यांचापि
भार्य्यायांशकलेद्वेबृहद्रथात् ७ तेमात्राबहिरुत्सृष्टेजरयाचाभिसंधिते जीवजीवेतिक्रीडं
त्याजरासंधोभवत्सुतः ८ ततश्चसहदेवोभूत्सोमापिर्यच्छ्रुतश्रवाः परीक्षिरनपत्योभूत्सु
रथोनामजाह्नवः ९ ततोविदूरथस्तस्मात्सार्वभौमस्ततोभवत् जयसेनस्तत्तनयोराधिकोऽतो
ऽयुतोह्यभूत् १० ततश्चक्रोधनस्तस्माद्देवातिथिरमुष्यच ऋष्यस्तस्यदिलीपोऽभूत्प्रतीपस्त
स्यचात्मजः ११ देवापिःशंतनुस्तस्यबाह्लीकइतिचात्मजाः पितृराज्यंपरित्यज्यदेवापिस्तुवनंगतः
१२ अभवच्छंतनूराजाप्राङ्महाभिषसंज्ञितः यंयंकराभ्यांस्पृशतिजीर्णंयौवनमेतिसः शांति
माप्नोतिचैवाग्र्यांकर्मणातेनशंतनुः १३

पत्यःजाह्नवःजह्नोःपुत्रः ९ अतोराधिकादयुतोह्यभूदित्यर्थः १० ११ तस्यप्रतीपस्यदेवापिशंतनुबाह्लीकाः

१२ प्राकुपूर्वजन्मनिमहाभिषेकइतिसंज्ञायस्यसः १३

भा० न० पंचभ्योयुधिष्ठिरादिभ्यः पंचाभवन् २६ तथापरेत्रभार्य्यांतरेषु २७ कालीचान्याभीमस्यभार्य्यातस्यां ततो
६८ भीमात्सर्वगतोनामपुत्रोऽभूदित्यर्थः २८ उलुप्यांनागकन्यायां मणिपुरपतेःसुतायां पुत्रिकाधर्मेणदत्ता

द्रौपद्यांपंचपंचभ्यःपुत्रास्तेपितरोऽभवन् २६ युधिष्ठिरात्प्रतिविंध्यःश्रुतसेनोवृकोदरात् अर्जु
नाच्छ्रुतकीर्त्तिस्तुशतानीकस्तुनाकुलिः सहदेवसुतोराजन्श्रुतकर्मातथाऽपरे २७ युधिष्ठि
रात्तुपौरव्यांदेवकोऽथघटोत्कचः भीमसेनाद्धिडिंबायांकालीसर्वगतस्ततः २८ सहदेवा
त्सुहोत्रंतुविजयासूतपार्वती करेणुमत्यांनकुलोनिरमित्रंतथार्जुनः इरावंतमुलूप्यां
वैसुतायांवभ्रुवाहनं मणिपुरपतेःसोपितत्पुत्रःपुत्रिकासुतः २९ तवतातःसुभद्रायामभिम
न्युरजायत सर्वातिरथजिद्वीरउत्तरायांततोभवान् ३० परिक्षीणेषुकुरुषुद्रौणेर्ब्रह्मास्त्रतेजसा
त्वंचकृष्णानुभावेनसजीवोमोचितोंऽतकात् ३१ तवेमेतनयास्तातजनमेजयपूर्वकाः श्रुतसे
नोभीमसेनउग्रसेनश्चवीर्य्यवान् ३२ जनमेजयस्त्वांविदित्वातक्षकान्निधनंगतं सर्पान्वैस
र्पयागाग्नौसहोष्यतिरुषान्वितः ३३

यां वभ्रुवाहनमसूत अतस्तत्पुत्रःसन्नपि पुत्रिकासुतः मातामहसुत इत्यर्थः २९ ३० ३१ ३२ ३३॥ ६८

दासकन्यायामिति उपरिचरवसोर्वीर्येण मत्स्यगर्भादुत्पन्ना कन्या दासैः कैवर्तैः पालिता अतो दासकन्ये
तिप्रसिद्धायां सत्यवत्यां नाम्ना तत्समाननाम्ना चित्रांगदेन गंधर्वेण युद्धे हतः १८ यस्यां सत्यवत्यां शंतनुप
रिग्रहात्पूर्वमेव गुप्तायेन यतोऽहं जातः इदं श्रीभागवतं चाध्यगाम् अधीतवान् १९ २० स्वयंवराद्भीष्मेण बला

शंतनोर्दासकन्यायां जज्ञे चित्रांगदः सुतः विचित्रवीर्यश्चावरजो नाम्ना चित्रांगदो हतः १८ यस्यां
पराशरात्साक्षादवतीर्णो हरेः कला वेदगुप्तो मुनिः कृष्णो यतोऽहमिदमध्यगां १९ हित्वा स्वशि
ष्यान् पैलादीन्भगवान्बादरायणः मह्यं पुत्राय शांताय परं गुह्यमिदं जगौ २० विचित्रवीर्योथो
वाह काशिराजसुते बलात् स्वयंवरादुपानीते अंबिकांबालिके उभे २१ तयोरासक्तहृदयो गृहीतो यक्ष्म
णा मृतः २२ क्षेत्रेऽप्रजस्य वै भ्रातुर्मात्रोक्तो बादरायणः धृतराष्ट्रं च पांडुं च विदुरं चाप्यजीजनत् २३
गांधार्यां धृतराष्ट्रस्य जज्ञे पुत्रशतं नृप तत्र दुर्योधनो ज्येष्ठो दुःशला चापि कन्यका २४ शापान्मै
थुनरुद्धस्य पांडोः कुंत्यां महारथाः जाता धर्मानिलेंद्रेभ्यो युधिष्ठिरमुखास्त्रयः नकुलः सहदेवश्च मा
द्र्यां नासत्यदस्रयोः २५

दुपानीते २१ २२ मात्रा सत्यवत्या उक्तः इति निषेधाभावमाह अपतिरपत्यलिप्सुर्देवरात् गुरुप्रयुक्ता ऋतुमती
यायादिति वचनात् २३ दुःशला नाम कन्यका च जज्ञे २४ अरण्ये मृगशापान्मैथुने रुद्धस्य प्रतिरुद्धस्य ना

भा० न०
६९

बृहद्रथस्य जरासंधस्तस्य जरासंधस्तस्य सहदेवः ॥ तस्य मार्जारिः ॥ तस्मान्मार्जारेः श्रुतश्रवाः ॥४३॥४४॥४५॥४६
साहस्रसंवत्सरमिते भाव्याः भूपालाः ॥ ततः परं भाव्यान्द्वादशस्कंधे वक्ष्यति ॥४७॥ इति नवमे द्वाविंशः ॥२२॥ श्री॥ त्रयो

अथ मागधराजानो भवितारो वदामि ते भविता सहदेवस्य मार्जारिर्यच्छ्रुतश्रवाः ४२ ततोऽयु
तायुस्तस्यापि निरमित्रोथ तत्सुतः सुनक्षत्रः सुनक्षत्राद्बृहत्सेनोथ कर्मजित् ४४ ततः सु
तंजयाद्विप्रः शुचिस्तस्य भविष्यति क्षेमोथ सुव्रतस्तस्माद्धर्मसूत्रः शमस्ततः द्युमत्सेनोथ
सुमतिः सुबलो जनिता ततः सुनीथः सत्यजिदथ विश्वजिद्यद्रिपुंजयः ४६ बार्हद्रथा
श्च भूपाला भाव्याः साहस्रवत्सरं ४७ ॥ इति श्रीमद्भागवते महापुराणे नवमस्कंधे शंतनु
वंशानुकीर्तनं द्वाविंशोध्यायः ॥ २२ ॥ श्रीशुक उवाच ॥ अणोः सभानरश्चक्षुः परेष्णुश्च त्रयः
सुताः सभानरात्कालनरः संजयस्तत्सुतस्ततः जनमेजयस्तस्य पुत्रो महाशीलो महा
मनाः १

विंशे तु यदोर्द्रुह्योस्तुर्वसोश्चान्वयः क्रमात् यदोश्च वंशोनुक्रांतो यावान्न्यामघसंभवः तदेवं ययातेः पुत्रा
णां पंचमस्य पूरोर्वंशोनुक्रांतः इदानीं चतुर्थस्य वंशमनुक्रामति अणोरिति कर्णस्य जगतिपतेरित्यंत तस्य
जनमेजयस्य महाशीलः तस्य महामनाः १

६९

तुरसंज्ञं पुरोहितं कृत्वा ३४ भविष्यानाह तस्य पुत्र इति यावत्समाप्तिः याज्ञवल्क्यात् क्रियाज्ञानं परं चा
त्मज्ञानं शौनकात्प्राप्स्यति अस्त्रज्ञानं कृपाचार्यादिति द्रष्टव्यं याज्ञवल्क्यात्त्रयीमधीत्य कृपादस्त्राण्यवाप्येति वै

कावषेयं पुरोधाय तुरं तुरगमेधया॥ समंतात्पृथिवीं सर्वां जित्वा यक्ष्यति चाध्वरैः ३४ तस्य पुत्रः
शतानीको याज्ञवल्क्यात्त्रयीं पठन् अस्त्रज्ञानं क्रियाज्ञानं शौनकात्परमेष्यति ३५ सहस्रानीकस्त
त्पुत्रस्ततश्चैवाश्वमेधजः असीमकृष्णस्तस्यापि नेमिचक्रस्तु तत्सुतः ३६ गजाह्वये हृते नद्या।
कौशांब्यां साधु वत्स्यति उक्तस्ततश्चित्ररथस्तस्मात्कविरथस्सुतः ३७ तस्माच्च वृष्टिमांस्तस्य सु
षेणोथ महीपतिः सुनीथस्तस्य भविता नृचक्षुस्तु सुखीनलः ३८ परिप्लवः सुतस्तस्मान्मेधा
वी सुनमात्मजः ३९ नृपंजयस्ततो दूर्वस्तिमिस्तस्माज्जनिष्यति तिमेर्बृहद्रथस्तस्माच्छतानीकः
५२ सुदासजः ४० शतानीकाद्दुर्दमनस्तस्यापत्यं वहीनरः दंडपाणिर्निमिस्तस्य क्षेमको भविता
नृपः ४१ ब्रह्मक्षत्रस्य वै प्रोक्तो वंशो देवर्षिसत्कृतः क्षेमकं प्राप्य राजानं संस्थां प्राप्स्यति वै कलौ ४२

भवोक्तेः क्वचित्तु अस्त्रज्ञानं कृपाचार्यादित्येव पाठः ३५ ३६ ३७ यद्यस्मात्सुखीनलः पुत्रः ३८ तस्मात्प
परिप्लवः तस्य सुनयः तस्यात्मजो मेधावीत्यर्थः ३९ तस्मात्सुदासः ततः शतानीक इत्यर्थः ४० ४१ ४२

भा० न० १३ १४ सदुष्यंतः स्ववंशंपौरवंशं १५ १६ १७ प्रथमस्यसहस्रजितस्यात्मजः १८ १९ सोहंजो महि

७०

गो२

धृतस्यदुर्मदस्तस्मात्प्रचेताः प्राचेतसः सुताः म्लेच्छाधिपतयोऽभूवन्नुदीचीं दिशमाश्रिताः १३
तुर्वसोश्च सुतो वह्निर्वह्नेर्भर्गोऽथभानुमान् त्रिभानोस्तत्सुतस्यापिकरंधम उदारधीः १४ म
रुतस्तत्सुतोऽपुत्रः पुत्रं पौरवमन्वभूत् दुष्यंतः सपुनर्भेजे स्ववंशं राज्यकामुकः १५ ययाते
र्ज्येष्ठपुत्रस्य यदोर्वंशं नरर्षभ वर्णयामि महापुण्यं सर्वपापहरं नृणाम् १६ यदोर्वंशं नरः
श्रुत्वा सर्वपापैः प्रमुच्यते यत्रावतीर्णो भगवान्परमात्मा नराकृतिः १७ यदोः सहस्रजि
त्क्रोष्टानलोरिपुरितिश्रुताः चत्वारः सूनवस्तत्र शतजित्प्रथमात्मजः १८ महाहयोवे
णुहयो हैहयश्चेति तत्सुताः १९ धर्मस्तु हैहयसुतो नेत्रः कुंतेः पिताततः सोहंजिरभव
त्कुंतेर्महिष्मान्भद्रसेनकः २० दुर्मदो भद्रसेनस्य धनकः कृतवीर्यसूः कृताग्निः कृत
वर्मा च कृतौजा धनकात्मजाः २१ अर्जुनः कृतवीर्यस्य सप्तद्वीपेश्वरोऽभवत् दत्तात्रेयाद्धरे
रंशात्प्राप्तयोगमहागुणः २२

ष्मतोभद्रसेनकः २० तस्यदुर्मदोधनकश्चेति द्वौपुत्रौ कृतवीर्यसूः कृतवीर्यस्यजनकः कृतवीर्याद्यश्च

लोधनकस्यात्मजाः हृषीः २१ २९

७०

रु७

चत्वारः उशीनरात्मजाः संधिरार्षः २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १२ १२ ॥

उशीनरस्तितिक्षुश्च महामनस आत्मजौ शिविर्वनः शमिर्दक्षश्चत्वारोशीनरात्मजाः २ वृषदर्भः सुवीर
श्च मद्रकैकय आत्मजाः शिवेश्चत्वार एवासंस्तितिक्षोश्च उशद्रथः ततो हेमोथ सुतपा वलिः सुतपसो
भवत् ३ अंगवंगकलिंगाद्याः सुम्हपुंड्रोड्रसंज्ञिताः जज्ञिरे दीर्घतमसो वलेः क्षेत्रे महीक्षितः ४
चक्रुः स्वनाम्ना विषयान्षडिमान्प्राच्यकांश्च ते ५ खनपानोंऽगतो जज्ञे तस्माद्दिविरथस्ततः सुतो
धर्मरथो यस्य जज्ञे चित्ररथोऽप्रजः रोमपाद इति ख्यातस्तस्मै दशरथः सखा शांतां स्वकन्यां प्रायच्छ
दृष्यशृंग उवाह यां ६ देवेऽवर्षति यं रामा आनिन्युर्हरिणीसुतं नाट्यसंगीतवादित्रैर्विभ्रमालिंगना
र्हणैः ७ स तु राज्ञोऽनपत्यस्य निरूप्येष्टिं मरुत्वतः प्रजामदाद्दशरथो येन लेभेऽप्रजः प्रजाः ८ चतु
रंगो रोमपादाच्च पृथुलाक्षस्तु तत्सुतः वृहद्रथो वृहत्कर्मा वृहद्भानुश्च तत्सुताः ९ आद्याद्वृहन्म
नास्तस्माज्जयद्रथ उदाहृतः विजयस्तस्य संभूत्यां ततो धृतिरजायत १० ततो धृतव्रतस्तस्य सत्क
र्माधिरथस्ततः योसौ गंगातटे क्रीडन्मंजूषांतर्गतं शिशुं कुंत्यापविद्धं कानीनमनपत्योकरोत्सुतं ॥
वृषसेनः सुतस्तस्य कर्णस्य जगतीपते ११ द्रुह्योश्च तनयो वभ्रुः सेतुस्तस्यात्मजस्ततः आरब्धस्त
स्य गांधारस्तस्य धर्मस्ततो धृतः १२

पृथुकीर्त्तिःपृथुश्रवाःइत्यादयःषट्प्रधानाःनिश्रेष्ठाःयेषांतेषांमध्ये ३० पंचआत्मजाआसंतानस्पष्टत्वात्तानेवाहपु
रुजिदिति ३१ भार्य्याभयादेवैकभार्य्यस्यवंध्यायत्त्वेज्यामघस्यापुत्रस्यतद्भयमेवपुत्रप्रदमभवदितिदर्शयन्ना
हज्यामघस्त्विति ३२ ३३ यदिमेसपत्नीस्यात्तर्हिस्नुषेयंयुज्येतापि नत्वेतदस्तीत्याह असपत्नीचेति ३४

तेषांतुषट्प्रधानानांपृथुश्रवसआत्मजः धर्मोनामोशनास्तस्यहयमेधशतस्ययाट् ३० तत्सु
तोरुक्मकवचस्तस्यपंचासनात्मजास्तथा पुरुजिद्रुक्मरुक्मेषुपृथुज्यामघसंज्ञिताः ३१ ज्यामघ
स्त्वप्रजोप्यन्यांभार्यांशैव्यापतिर्भयात् नाविंदच्छत्रुभवनाद्भोज्यांकन्यामहारषीत् ३२ रथ
स्थांतांनिरीक्ष्याहशैव्यापतिममर्षिता केयंकुहकमस्यानंरथमारोपितेतिवै ३३ स्नुषात
वेत्यभिहितेसम्यक्तीपतिमब्रवीत् अहंवंध्याऽसपत्नीचस्नुषामेयुज्यतेकथं ३४ जन
यिष्यतियंराज्ञितस्येयमुपयुज्यते अन्वमोदंततद्विश्वेदेवाःपितरएवच ३५ शैव्याग
र्भमधात्कालेकुमारंसुषुवेशुभं सविदर्भइतिप्रोक्तउपयेमेस्नुषांसती ३६

अतिभयव्याकुलस्तमाह जनयिष्यतीति भार्य्याभयात्कंपमानःखिन्नसर्वांगस्यराज्ञःप्राणसंकटमालोक्या
नुकंपितास्तेनपूर्वंबहुकालमाराधिताविश्वेदेवाःपितरश्चनतथास्त्वित्यनुमोदंतः ॥३५ ततश्चदेव
ताप्रसादेनजनयिष्यतीति प्रतिवचनमुहूर्त्तगुणेनचनिरस्तरजस्कापि शैव्यागर्भमधात् तस्यचमहि

मापराशरादिभिरुक्तः यदुक्तं भार्य्यावश्यास्तु येके
चिद्भविष्यंत्यथवामृताः तेषांतु ज्यामघश्रेष्ठः शैव्या
पतिरभून्नृपः ३६

२३ अनष्टमविनाशं वित्तं येन तं यथाविधि स्मरणं यस्य सः अव्यत्ययं षडिंद्रियविषयं बुभुजे २४ २५ और्वस्य तेजसा
सगरेण संहृतं इत्यर्थः २६ तेषां तालजंघपुत्राणां ज्येष्ठः तस्य मधोः पुत्रशतं वृष्णिर्ज्येष्ठो यस्मिन् यतो मधोर्हैहे

नन्वनं कार्त्तवीर्यस्य गतिं यास्यंति पार्थिवाः यज्ञदानतपोयोगैः श्रुतवीर्यजयादिभिः २३ पंचाशी
तिसहस्राणि ह्यव्याहततः बलः समाः अनष्टवित्तस्मरणो बुभुजेऽव्ययषट्सु २४ तस्य पुत्रसहस्रेषु
पंचैवोर्वरिता मृधे जयध्वजः शूरसेनो वृषभो मधुरूर्जितः २५ जयध्वजात्तालजंघस्तस्य पुत्र
शतं त्वभूत् ततं ते तालजंघाख्या और्वतेजोपसंहृतं २६ तेषां ज्येष्ठो वीतिहोत्रो वृष्णिः पुत्रो म
धोः स्मृतः तस्य पुत्रशतं त्वासीद्वृष्णिर्ज्येष्ठं यतः कुलं माधवा हैहया राजन्यादवाश्चेति संज्ञिताः
२७ यदुपुत्रस्य च क्रोष्टोः पुत्रो वृजिनवांस्ततः स्वाहिस्ततो रुशेकुर्वै तस्य चित्ररथस्ततः शशबिंदु
र्महायोगी महाभोजो महाननभूत् चतुर्दशमहारत्नश्चक्रवर्त्यपराजितः २८ तस्य पत्नीसहस्राणां
दशानां सुमहायशाः दशलक्षसहस्राणि पुत्राणां तास्वजीजनत् २९

यदोश्च हेतोः इदं कुलं २७ चतुर्दशमहारत्नानि तत्तज्जातिश्रेष्ठानि यस्य सः तानि च मार्कंडेयपुराणे वर्णितानि गजवा
जिरथस्त्रीषुनिधिमाल्यांवरद्रुमाः शक्तिपाशमणिछत्रविमानानि चतुर्दशेति २८ दशानां पत्नीसहस्राणां भा
र्यापुत्रस्य प्रत्येकं लक्षं लक्षमित्येवं तासु पुत्राणां दशलक्षसहस्राणां दशलक्षसहस्राणि जनयामास २९

भा० न० ६ ७ ८ ततस्तदुपदेशेनयेपंचषष्ट्याद्दिसंख्याःपुरुषाः तेऽमृतत्वंमोक्षंप्राप्ताः ९ १० तस्यपृथुधाजित्त्वंसिनि र
७२
भजमानस्यनिम्लोचिःकिंकिणोधृष्टिरेवच एकस्यामात्मजाःपत्न्यामन्यस्यांचत्रयःसुताः श
ताजिच्चसहस्राजिदयुताजिदितिप्रभो ६ बभ्रुर्देवावृधसुतस्तयोःश्लोकंपठंत्यमू ७ यथै
वशृणुमोदूरात्संपश्यामस्तथांतिकात् बभ्रुःश्रेष्ठोमनुष्याणांदेवैर्देवावृधःसमः ८ पु
रुषाःपंचषष्टिश्चषट्सहस्राणिचाष्टच येऽमृतत्वमनुप्राप्ताबभ्रोर्देवावृधादपि ९
महाभोजोपिधर्मात्माभोजाआसंस्तदन्वये १० वृष्णेःसुमित्रःपुत्रोऽभूद्युधाजिच्चपरं
निस्त७ तप सिनिस्तस्यानमित्रश्चनिघ्नोऽभूदनमित्रतः ११ सत्राजितःप्रसेनश्चनिघ्नस्याथास
तुःसुतौ अनमित्रसुतोयोन्यःशिनिस्तस्याथसत्यकः १२ युयुधानःसात्यकिर्वैजयस्तस्य
कुणिस्ततः युगंधरोनमित्रस्य वृष्णिःपुत्रोऽपरस्ततः श्वफल्कश्चित्ररथश्चगांदिन्यांतु
श्वफल्कतः अक्रूरप्रमुखाआसन्पुत्राद्वादशविश्रुताः १३
नमित्रस्य ११ १२ सात्यकिःसत्यकस्यपुत्रोयुयुधानः तस्यजयस्तस्यकुणिस्ततःकुणेर्युगंधरः अनमि
त्रस्यैवापरोवृष्णिर्नामपुत्रः अक्रूरप्रमुखायेषामित्यतद्गुणसंविज्ञानोबहुव्रीहिः १३ ॥ ॥ ७२

इति नवमे त्रयोदशः ॥२३॥ चतुर्विंशे विदर्भस्य पुत्रत्रयः समुद्भवाः वंशा नानामुखाः प्रोक्ता रामकृष्णो
द्भवावधि १ चैद्यादयः दमघोषादयः २ ३ ततो दशरथात्सकुनिः पुराणांतरादेवमादिविशेषो द्रष्टव्यः

इति श्रीमद्भागवते महापुराणे नवमस्कंधे यदुवंशकथनं त्रयोविंशोऽध्यायः ॥२३॥ श्रीशुक उ
वाच ॥ तस्यां विदर्भोऽजनयत्पुत्रौ नाम्ना कुशक्रथौ तृतीयं रोमपादं च विदर्भकुलनंद
नं ॥१॥ रोमपादसुतो बभ्रुर्बभ्रोः कृतिरजायत उसिकस्तत्सुतस्तस्माच्चेदिश्चैद्यादयो नृपाः
२ क्रथस्य कुंतिः पुत्रोऽभूद्वृष्णिस्तस्याथ निर्वृतिः ततो दशार्हो नामाभूत्तस्य व्योमः सुत
स्ततः जीमूतो विकृतिस्तस्य यस्य भीमरथः सुतः ३ ततो नवरथः पुत्रो जातो दशरथस्ततः क
रंभिः शकुनेः पुत्रो देवरातस्तदात्मजः देवक्षेत्रस्ततस्तस्य मधुः कुरुवशादनुः ४ पुरुहोत्र
स्त्वनोः पुत्रस्तस्यायुः सात्वतस्ततः भजमानो भजिर्दिव्यो वृष्णिर्देवावृधोऽंधकः सात्वतस्य
सुताः सप्त महाभोजश्च मारिष ५

ततः कुरुवशादनुः ४ ततोऽनोः पुत्रः पुरुहोत्रः महाभोजश्चेत्येवं सप्त मारिष हे आर्य ५ एमरामर

औग्रसेनयः उग्रसेनस्यसुताः २० वसुदेवस्ययेऽनुजाः देवभागादयस्तेषांस्त्रियोभार्याः अंधकस्यसुतानां
चतुर्णांप्रथमस्यकुकुरस्यवंशउक्तः २१ द्वितीयस्यभजमानस्यवंशमाह शूरोविदूरथादिति भजमानाच्चविदू
रथः पुत्रोऽभवत् विदूरथाच्चशूरइतिपराशरादिवचनात् यद्वा पृथुर्विदूरथाद्यांश्चेति पूर्वोक्तात् चित्ररथात्

कंसः सुनामान्यग्रोधः कंकः शंकुः सुहूस्तथा राष्ट्रपालोथसृष्टिश्च तुष्टिमानौग्रसेनयः
२० कंसाकंसवतीकंकाशूरभूराष्ट्रपालिका उग्रसेनदुहितरोवसुदेवानुजस्त्रियः २१ शू
रोविदूरथादासीद्भजमानस्तुतत्सुतः शिनिस्तस्मात्स्वयंभोजोहृदिकस्तत्सुतोमतः २२
देववाहुः शतधनुः कृतवर्मेतितत्सुताः २३ देवमीढस्यशूरस्यमारिषानामपत्न्य
भूत् तस्यांसजनयामासदशपुत्रानकल्मषान् वसुदेवंदेवभागंदेवश्रवसमानकं
सृंजयंश्यामकंकंकंशमीकंवत्सकंवृकं २४

त्रजात् विदूरथात् २२ २३ देवमीढस्ययःशूरोनामपुत्रस्तस्यदेवमीढोहृदीकस्यैवसुतः यथाहप
राशरः तस्यापिकृतवर्मशतधनुदेवमीढुषाद्याः पुत्रावभूवुः देवमीढस्यशूरः शूरस्यापिमारिषाना
नामापत्न्यभवत् तस्यांचासौदशपुत्रानजनयत् वसुदेवपूर्वानिति २४ ॥ ऽऽ ॥ ऽऽ

श्रतोक्रूरातिरिक्तानष्टादशदर्शयति १४ पृथुरेकविदूरथाद्याश्रन्येचवहवः विपृथुधामाद्याइतिपा
ठे श्राद्यशब्देनविदूरथोप्युक्तः ततश्चशूरोविदूरथादासीदितिवक्ष्यमाणनिर्देशोपपत्तिः १५ कुकुरा

श्रासंगःसारमेयश्चमृदुरोमृदुविर्गिरिः धर्मवृद्धःसुकर्माचक्षत्रोपेक्षोरिमर्दनः शत्रुघ्नोगंध
प्रतिवाहुश्च २ मादश्चाष्टादशः १४ तेषांस्वसारौसाद्वीख्याष्टावक्रूरसुतावपि देववानुपदेवश्चतथाचित्ररथा
त्मजाः पृथुविदूरथाद्याश्चवहवोवृष्णिनंदनाः १५ कुकुरोभजमानश्चशुचिःकंवलवर्हिषः कु
कुरस्यसुतोवह्निर्विलोमातनयस्ततः १६ कपोतरोमातस्यानुःसखायस्यचतुंवुरुः श्रंधकाद्दुंदु
भिस्तस्यदरिद्योतःपुनर्वसुः १७ तस्याहुकश्चाहुकीचकन्याचैवाहुकात्मजौ देवकश्चो
ग्रसेनश्चचत्वारोदेवकात्मजा देववानुपदेवश्चसुदेवोदेववर्द्धनः १८ तेषांस्वसारःसप्ता
सन्धृतदेवादयोनृप शांतिदेवोपदेवाचश्रीदेवादेवरक्षिता सहदेवादेवकीचवसुदेवउवा
हताः १९
दयश्चत्वारोंऽधकसुताइतिज्ञेयं यथाचश्रीपराशरः कुकुरभजमानशुचिकंवलवर्हिषाख्यास्तथांधकस्य
पुत्राइति १६ श्रनोरंधकः श्रंधकाद्दुंदुभिरित्यपितद्वचनादेवज्ञेयं १७ १८ धृतदेवाश्रादियासांशांतिदेवा

 ३१ ३२ ३३ ३४ आवंत्यौविंदानुविंदौ ३५ ३६ सदेवं वसुदेवस्य भगिनीनां पतीन् पुत्रांश्चोक्त्वा तन्न्रा

इतितस्यांसआधायगर्भंसूर्योदिवंगतः सद्यःकुमारःसंजज्ञेद्वितीयइवभास्करः ३१ तं
सात्यजन्नदीतोयेकृच्छ्राल्लोकस्यबिभ्यती प्रपितामहस्तामुवाह पांडुर्वैसत्यविक्रमः
३२ श्रुतदेवांतुकारूषोवृद्धशर्मासमग्रहीत् यस्यामभूद्दंतवक्त्रऋषिसप्तोदितःसु
तः ३३ कैकेयोधृष्टकेतुश्चश्रुतकीर्तिमविंदत संतर्दनादयस्तस्याःपंचासन्कैक
याःसुताः ३४ राजाधिदेव्यामावंत्यौजयसेनोजनिष्ठह ३५ दमघोषश्चेदिराजःश्रुतश्रव
समग्रहीत् शिशुपालःसुतस्तस्याःकथितस्तस्यसंभवः ३६ देवभागस्यकंसायांचि
त्रकेतुबृहद्बलौ कंसवत्यांदेवश्रवसःसुवीरइषुमांस्तथा कंकोयामानकाज्जातःसत्यजि
त्पुरुजित्तथा ३७
तृणांनवानांपत्नीः पुत्रांश्चाह देवभागस्येत्ति नवभिःश्लोकार्द्धैः ३७ रामरामरामरामरामराम

श्चानकाश्चनेदुः हरेः प्रादुर्भावस्थानं २५ २६ २७ पृथायाः कन्यावस्थानं कर्णोत्पत्तिप्रकारमाह कुंतेरिति
पंचभिः कदाचिद्गृहमागतं दुर्वाससं पृथा परिचर्यादिना तोषयामास ततश्च सा तस्माद्देवाह्वाने हेतुविद्या

देवदुंदुभयो नेदुरानकायस्य जन्मनि वसुदेवं हरेः स्थानं वदंत्यानकदुंदुभिं २५ पृथा च श्रु
तदेवा च श्रुतकीर्तिः श्रुतश्रवाः राजाधिदेवी चैतेषां भगिन्यः पंचकन्यकाः २६ कुंतेः सख्युः
पिता शूरो ह्यपुत्रस्य पृथामदात् २७ साप दुर्वाससो विद्यां देवहूतिं प्रतोषितात् तस्या वीर्यपरी
क्षार्थमाजुहाव रविं शुचिः २८ तदैवोपागतं देवं वीक्ष्य विस्मितमानसा प्रत्ययार्थं प्रयुक्ता
मे याहि देव क्षमस्व मे २९ अमोघं दर्शनं देवि आधास्ये त्वयि चात्मजं योनिर्यथा न दु
ष्येत कर्त्ताहं ते सुमध्यमे ३०

मवाप तदाह सापेति २८ देवमुपागतं वीक्ष्य सा प्राह प्रत्ययार्थं परिक्षार्थं मे मया विद्या प्रयुक्ता
न त्वया किंचित्कार्यमित्यभिसंधिना अतस्त्वं याहि २९ इत्येवमुक्तो रविरुवाच अमोघं देवदर्शनमिति क
न्याहमिति चेत्तत्राह यथा योनिर्न दुष्येत तथाहं क
त्तीकरिष्यामि ३० ॥ ऽऽ ॥

भा० न० ४६ ४७ ४८ अष्टमस्तुस्वयमेवासीत् नतत्कर्मादिनाहेतुना ताभ्यांजनितोवायतोसौहरिः ४९ तदेवोपा
७५ दयति यदेतित्रिभिः ५० ईशस्यमायानियंतुः परस्यअसंगस्य द्रष्टुःसाक्षिणः आत्मनः सर्वगतस्य

देवरक्षितयालब्धानवचात्रगदादयः ४६ वसुदेवःसुतानष्टावादधेसहदेवया पु
रुविश्रुतमुख्यांश्चसासाक्षद्धर्मोवसूनिव ४७ वसुदेवस्तुदेवक्यामष्टोपुत्रानजीजनत्
कीर्तिमंतंसुषेणंचभद्रसेनमुदारधीः ऋजुंसंमर्दनंभद्रंसंकर्षणमहीश्वरं ४८ अ
ष्टमस्तुतयोरासीत्स्वयमेवहरिःकिल सुभद्राचमहाभागातवराजन्पितामही॥
४९ यदायदाहिधर्मस्यक्षयोवृद्धिश्चपाप्मनः तदातुभगवानीशआ
त्मानंसृजतेहरिः ५० नह्यस्यजन्मनोहेतुःकर्मणोवामहीपते आत्ममा
यांविनेशस्यपरस्यद्रष्टुरात्मनः ५१

नह्येवंभूतस्यमायाविनोदंविनाजन्मनःकर्मणोवाहेतुःसंभवतीत्यर्थः ५१ ॥ रामराम

वसुदेवस्यपत्नीःपुत्रांश्चाह पौरवीत्येकादशभिः ३९ ४० ४० कौशल्याभद्रा ४२ ४३ ऽऽ ४४ ४५

श्रृंजयोराष्ट्रपाल्यांचवृषदुर्मर्षणादिकान् हरिकेशहिरण्याक्षौशूरभूम्यांतुश्यामकः मि
श्रकेश्यामप्सरसिवृकादीन्वत्सकस्तथा तक्षपुष्करसाल्वादीन्दुर्वाक्ष्यांवृकआदधे सुमि
त्रार्जुनपालादीन्समीकात्तुसुदामिनी कंकश्चकर्णिकायांवैऋतधाममजयावपि ३८ पौरवीरो
हिणीभद्रामदिरारोचनाइला देवकीप्रमुखाश्चासन्पत्न्यश्चानकदुंदुभेः ३९ बलंगदंसारणं
चदुर्मदंविपुलंध्रुवं वसुदेवस्तुरोहिण्यांकृतादीनुदपादयत् ४० शुभद्रोभद्रबाहुश्चदुर्मदो
भद्रएवच पौरव्यास्तनयाह्येतेभूताद्याद्वादशाभवन् ४१ नंदोपनंदकृतकशूराद्यामदिरात्म
जाः कौशल्याकेशिनंत्वेकमसूतकुलनंदनं ४२ रोचनायामतोजाताहस्तहेमांगदादयः
इलायामुरुवल्कादीन्यदुमुख्यानजीजनत् ४३ विपृष्टोधृतदेवायामेकआनकदुंदु
भेः शांतिदेवात्मजाराजन्प्रश्रमःप्रश्रुतादयः ४४ राजानःकल्पवर्षाद्याउपदेवासु
तादश वसुहंससुवंशाद्याःश्रीदेवायास्तुषट्सुताः ४५ ॥ ऽऽ ॥ ऽऽ ॥

रामरामरामरामरामरामगोविंदगोपालहरेमुरारे ५७

यस्मिन्सतां कर्णपीयूषे यशोरूपे तीर्थवरे श्रोत्रमेवांजलिः पानसाधनं यस्य सः पुरुषः सकृदप्युपस्पृश्य
श्राचमनमात्रं कृत्वा तत्सौहृद्याकृष्टचित्तः कर्मवासनां धुनुते ५५ तदेवाह द्वाभ्यां भोजादिभिः श्लाघ
नीयमीहितं यस्य सर्वैरंगैः रमयामृत्यांच ५६ तत्र प्रदर्शनार्थे रवशोभामाह यस्याननं दृशिभिर्नेत्रैः

यस्मिन्सत्कर्णपीयूषे यशस्तीर्थवरे सकृत श्रोत्रांजलिरुपस्पृश्य धुनुते कर्मवासनां ५५ भोज
वृष्ण्यंधकमधुशूरसेनदशार्हकैः श्लाघनीयेहितः शश्वत्कुरुसृंजयपांडुभिः स्निग्धस्मिते
क्षितोदारैर्वाक्यैर्विक्रमलीलया नृलोकं रमयामास मूर्त्या सर्वांगरम्यया ५६ यस्याननं
मकरकुंडलचारुकर्णभ्राजत्कपोलसुभगं सविलासहासं नित्योत्सवं न ततृपुर्दृशिभिः
पिबंत्यो नार्यो नराश्च मुदिताः कुपिता निमेश्च ५७

पिबंत्यो नार्यो नराश्च न ततृपुः न तृप्ताः निमेषोन्मेषमात्रव्यवधानमप्यसहमानास्तत्कर्तुर्निमेः
कुपिताश्च बभूवुः कथंभूतमाननं मकरकुंडलाभ्यां चारू कर्णौ भ्राजंतौ कपोलौ च तैः सुभगं सविला
सोहासो यस्मिन् नित्यमुत्सवो यस्मिन ५७

म किंच यस्य मायाचेष्टितं पुंसो जीवस्यानुग्रहः तस्य सर्वजीवानुग्राहकस्य कुतः कर्म्मादिपारतंत्र्येण जन्मा
दिसंभवः अनुग्रहमेवाह हि यस्मात्तद्देवस्थित्यादय इष्यंते प्रलये लीनोपाधेर्जीवस्य धर्माद्यसंभवात् उ
पाधिसृष्ट्यादिना धर्मादिसंपादनेनानुग्रहः तथात्मलाभाय स्वरूपप्राप्तये च इष्यते तत्र हेतुस्तेनैव श्रूय

यन्मायाचेष्टितं पुंसः स्थित्युत्पत्त्यप्ययाय हि अनुग्रहस्तन्निवृत्तेरात्मलाभाय चेष्यते ५२
अक्षौहिणीनां पतिभिरसुरैर्नृपलांछनैः भुव आक्रम्यमाणाया अभाराय कृतोद्यमः कर्माण्य
परिमेयाणि मनसापि सुरेश्वरैः सह संकर्षणं चक्रे भगवान्मधुसूदनः ५३ कलौ जनिष्य
माणानां दुःखशोकतमोनुदम् अनुग्रहाय भक्तानां सुपुण्यं व्यतनोद्यशः ५४

यमाणेन तस्य स्थित्यादेर्निवृत्तेः ५२ तस्य चेष्टितं भ्रमेरप्यनुग्रह इत्याह अक्षौहिणीनामिति द्वाभ्यां अ
भाराय भारपरिहाराय सुरेश्वरैरपि मनसाप्यपरिमेयाणि अवितर्क्याणि संकर्षणसहितश्चक्रे ५३ संक
ल्पमात्रेण भूभारहरणसमर्थस्यापि कर्मकरणं यशोविस्तारद्वारा भक्तानुग्रहार्थमित्याह कलाविति द्वा
भ्याम् दुःखशोकतमांसि नुदतीति तथा तद्यशो व्यतनोत् ५४ ॥

भा०न० श्रीकृष्णचरितं समासेन वर्णयति जात इति द्वाभ्यां जातो निजरूपेण पश्चात्पुरुषो मायाकारः सन् व्रजं
७७ गतः व्रजवासिनामेधितार्थो येन तेषु दारेषु सुतानां शतान्युत्पाद्य आत्मनिगममात्मानुगतं स्वकी
यं वेदमार्गं ५८ अंतःसमुत्थेन कलिना निमित्तेन उरुभरं क्षपयन् दृष्ट्यैव भूपचमूर्विधूय विजये ज

जातो गतः पितृगेहाद्व्रजमेधितार्थो हत्वा रिपून्सुतशतानि कृतोरुदारः उत्पाद्य तेषु पु
रुषः क्रतुभिः समीजे आत्मानमात्मनिगमं प्रथयन्जनेषु ५८ पृथ्व्याः स वै गुरुभरं क्षपयन्
कुरूणामंतःसमुत्थकलिना युधि भूपचम्वः दृष्ट्या विधूय विजये जयमुद्विघोष्य प्रोच्योद्ध
वाय च परं समगात्स्वधाम ५९ इति श्रीमद्भागवते महापुराणे नवमस्कंधे यदुवंशानुकीर्तनं ना
म चतुर्विंशोध्यायः ॥ २४ ॥ शुभमस्तु ॥ ॥ ॥

यं अर्जुने जितमित्येवमुद्घोषं कृत्वा परं तत्वमुद्धवायोपदिश्य स्वधाम सम्यक्कृते नैव स्वरूपेण जगामेति ॥
५९ नवभिर्लक्षितैर्लक्ष्यं नवभक्तिसुलक्षितं ब्रह्मतत्परमं वंदे परमानंदविग्रहं ॥ इति श्रीश्रीधरस्वामिवि
रचितायां भावार्थदीपिकायां नवमस्कंधसंबंधिन्यां चतुर्विंशोध्यायः ॥ २४ ॥

७७

स्कंध
९

श्री

नवमं स्कंधः